TRIVANDRUM SANSKRIT SERIES.
No. LVIII.

THE
SIDDHÂNTASIDDHÂNJANA

BY

SRÎ KRISHNÂNANDA SARASVATÎ

EDITED BY

T. GANAPÂTI SÂSTRI

Curator of the Department for the publication of Sanskrit manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

Part III.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५८.

S.NO.22


सिद्धान्तसिद्धाञ्जनं

श्रीकृष्णानन्दसरस्वतीप्रणीतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितम् ।



तृतीयो भागः ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९३, क्रैस्ताब्दाः

विषयानुक्रमणी ।

विषयः.	पृष्ठम्.
ब्रह्मणो निर्विशेषाद्वितीयत्वे गीतावचनानि	१
निष्प्रपञ्चनिर्विशेषवस्तुपरविष्णुपुराणवचनानि	३
विष्णुपुराणस्य प्रकृतिपुरुषविलक्षणसविशेषवस्तुपरत्वशङ्का	८
सिद्धान्तः—उपबृंहणस्वरूपम्	२१
विष्णुपुराणोपक्रमप्रश्नप्रतिवचनस्वारस्यविमर्शः	,,
अविकारायेत्यादिपद्यानामर्थविचारः	२६
ज्ञानस्वरूपमित्यादिपद्यानामर्थः	३०
परमार्थस्त्वमेवैक इत्यादिपद्यार्थः	३३
ज्ञानस्वरूप इत्यादिपद्यैकादशकार्थः	३४
आत्माभेदः	३८
नित्यो नित्यानामिति श्रुत्यर्थः	,,
बद्धमुक्तादिव्यवस्था	३९
ब्राह्मेणेत्यादित्रिसूत्री	४०
ऐकात्म्यविदोऽप्युपदेष्टृत्वम्	४१
जीवन्मुक्तिः	४२
गीताया अभेदपरत्वम्	४५
प्रत्यस्तमितभेदमिति श्लोकार्थः	,,
ब्रह्मणः परापरमूर्तामूर्तरूपचतुष्कम्	४७
तद्भावम् आत्मभावम् इति श्लोकौ	५०
एकस्य प्राप्यप्राप्तृभावे परसम्मतिः	५१
विभेदजनके इत्यादेरैकात्म्ये अस्वारस्यभङ्गः	५२
द्वे रूपे इत्यादेर्जीवब्रह्मभेदपरत्वायोगः	,,
द्वाविमौ पुरुषौ इत्यादेरर्थः	५४
पुराणस्य कारणातीतपरत्वम्	५५
जगत्कारणत्वस्य निर्विशेषब्रह्मलक्षणत्वम्	,,
ऊर्ध्वमूलमित्याद्यध्यायतात्पर्यम्	५७
सायुज्यशब्दार्थः	५९
सायुज्यपदस्याभेदार्थत्वे दोषोद्धारः	६०
ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्यर्थः	६२
साम्यशब्दस्यैक्यविषयता	६५
मुक्तस्य भोगायोगः	

मुक्तस्य ब्रह्मसाम्ये विरोधः	६७
सम्पद्याविर्भाव इत्यादिसूत्रविचारः	६८
ब्राह्मेण जैमिनिरित्यादिसूत्रार्थः	६९
निर्गुणविद्यायामैश्वर्योक्त्यन्यथासिद्धिः	७०
अविभागेन दृष्टत्वादितिसूत्रार्थः	७१
पुराणाद्यर्थनिष्कर्षः	,,
सूत्राणां सविशेषपरत्वनिरासः	७२
कुतर्कनिरासः	७३
यत्र त्वस्येति श्रुत्यर्थः	७७
प्रज्ञानघन एवेति श्रुत्यर्थः	७८
यावद्विकारं तु विभाग इतिसूत्रार्थः	७९
परमतम्	८०
न स्थानतोऽपीति न्यायः	,,
आह च तन्मात्रमितिसूत्रार्थः	८२
अरूपवदेव हीतिसूत्रार्थः	८४
प्रत्यक्षादिप्रमाणानामविशिष्टविषयत्वम्	८५
सत्तामात्रग्राहिप्रत्यक्षम्	८६
सत्तामात्रब्रह्मणोऽपि शास्त्रविषयत्वम्	८७
स्वप्नापारमार्थ्यम्	८८
बाध्यबाधकतानियामकचिन्ता	९०
विधिकाण्डविरोधः	९२
प्रत्यक्षादिदोषमूलत्वसम्भावनाहेतुनिरूपणम्	,,
भेदग्रहानुपपत्तिः	९३
भेदस्वरूपानुपपत्तिः	,,
सिद्धान्ते भेदग्रहोपपत्तिः	९५
भेदस्य तादात्म्याप्रतियोगित्वं नञर्थः	९६
सत्तापारमार्थ्यभेदापारमार्थ्यानुमानम्	९७
परमते भेदादिनिर्वाहः	९८
परोक्तजातिः	९९
भेदासत्यत्वानुमाने परोक्तदूषणम्	१००
सिद्धान्तः	१०२
संस्थानस्य भेदत्वनिरासः	,,
वस्तुसंस्थानस्य जातित्वनिरासः	१०३
सिद्धान्ते अनुगतव्यवहारोपपादनम्	१०४
सत्ताया एव जातित्वम्	१०५

भेदापारमार्थ्यानुमाने दूषणोद्धारः	१०५
बाधबाधे बाध्यसत्यत्वनिरासः	१०८
शून्यनिरासः	१०९
परोक्तभ्रमानवस्थित्यादिदूषणपरिहारः	११०
व्यावर्तमानत्वस्य ब्रह्मणि व्यभिचारोद्धारः	११२
सत्तापारमार्थ्यानुमानाभासत्वनिरासः	११४
दृश्यते त्वय्ययेति श्रुत्यर्थः	११५
ज्ञानस्य स्वप्रकाशत्वम्	११६
ज्ञाततानिरासः	११८
स्वप्रकाशत्वनिरुक्तिः	१२१
संविदोऽवेद्यत्वे शङ्का	१२४
परोक्षा विषयसंविदः स्वरूपस्वभावादिविचारः	१२५
संविद्रूपज्ञातुरात्मनोऽहमर्थत्वम्	१२८
परोक्षा ज्ञातुरात्मनो ज्ञानसम्बन्धभानोपपादनम्	१२९
ज्ञानस्य ज्ञानाश्रयत्वम्	१३०
दीपप्रभास्वरूपविवेकः	१३१
अहङ्कारस्याहमर्थत्वे शङ्का	१३२
परोक्षाहमर्थस्य ज्ञातुरात्मत्वनिरूपणम्	१३३
ज्ञातृत्वस्याध्यस्तत्वनिरासः	१३५
संविन्मात्रात्मनोऽन्तःकरणप्रतिबिम्बितत्वतद्वयङ्ग्यत्वनिरासः	,,
सुषुप्तावहमर्थानुवृत्तिसमर्थनम्	१३७
मुक्तावहमर्थानुवृत्तिसमर्थनम्	१३८
सिद्धान्तः	१४०
ज्योतिःपदवृत्तिनिमित्तम्	,,
दृश्यत्वनिरुक्तिः	१४१
आत्मनोऽवेद्यत्वम्	१४३
अविज्ञातं विजानतामित्यादिश्रुत्यर्थः	१४६
ब्रह्मणोऽदृश्यत्वे आक्षेपपरिहाराः	१४८
सत्तासंविदोरेकत्वमात्मत्वं च	१५०
संवित्स्वयम्प्रकाशत्वनिर्वचनम्	१५१
अतीतादिसंविदोऽनुमेयत्वनिरासः	१५२
आत्मनोऽणुपरिमाणत्वम्	१५४
ज्ञानस्य जन्यत्ववादिमतनिरासः	,,
नित्यात्मसंविदो विषयावभासकत्वाक्षेपः	१५५
धर्मभूतज्ञानस्य विषयावभासकत्वम्	१५६

धर्मभूतज्ञानस्य संकोचविकासानुपपत्तिः	१५६
आत्माणुत्वभङ्गः	१५७
अणुत्वश्रुत्युपपत्तिः	१५८
स चानन्त्याय कल्पत इति श्रुत्यर्थः	१५९
अङ्गुष्ठमात्रत्वाद्युपपत्तिः	,,
प्रत्यक्त्वपराक्त्वे	१७०
सङ्कोचासंभवनिरूपणम्	१७२
जडाहङ्कारानात्मत्वम्	१७३
युष्मदस्मदित्यादिभाष्यार्थः	१७६
सुप्तावहमभावः	,,
कामादिमनोधर्मता	१८०
उपादानोपादेयाभेदः	,,
मुक्तावहमभावः	१८५
अहङ्कारादेशवाक्यार्थः	१८८
भूमवाक्यार्थः	१८९
आत्मानहन्त्वानुमानम्	१९३
स एवाधस्तादित्यादिश्रुत्यर्थः	,,
कर्मकर्तृविरोधचिन्ता	१९५
ज्ञातृत्वोपपत्तिः	१९७
अहमितिद्विरूपावभासत्वम्	१९८
अविनाशीवेत्यादिश्रुत्यर्थः	२००
ज्ञोऽत एवेति सूत्रार्थः	२०१
आत्मनः शब्दादेश्च प्रतिबिम्बः	२०२
आभास एव चेति सूत्रार्थः	२०३
प्रवेशशब्दार्थः	,,
अहङ्कारात्मनोर्व्यङ्ग्यत्वनिर्वचनम्	२०४
आत्मनोऽकर्तृत्वं — यथा च तक्षेति सूत्रार्थः	२०६
असङ्गश्रुत्यर्थः	२०७
कर्तृत्वश्रुत्याद्यन्यथासिद्धिः	२११
स समानः सन्निति श्रुत्यर्थः	२१२
अकर्तृत्वे स्मृतिः	२१३
हन्ताचेदित्यादिश्रुत्यर्थः	२१४
मिथ्यात्वे सूत्राविरोधः	२१६
भेदमानजातस्य प्रबलाभेदमानबाध्यत्वनिगमनम्	२१८

पाठभेदः ।

पृष्ठे.	पङ्क्तौ.	क. ख. ग्रन्थपाठः.	ग. ग्रन्थपाठः.
३	१६	भ्रान्त	भ्रान्ति
७	१८	तो वि	तोऽपि वि
२७	३	गतः सत्ता	गतः निष्कर्षे सत्ता
३९	८	विभ्रम	विभेद
४१	१२	न भेद	न च भेद
४२	१०	तो हि जी	तो जी
८०	२०	न्मादिना	न्मत्तेन
९०	१४	रणानि	रणनि
१०२	१३	मते भा	मते तु भा
१०३	१२	गतव्य	वृत्तव्य
१०६	१३	तस्मि	अस्मि
११२	२	अदृष्ट	अदृष्टाविदित
११४	६	दाने	दादे
,,	२०	अथवा	अन्यथा वा
११५	,,	येऽपि	येष्वपि
१२१	३	सिद्धविषयस्व	सिद्धविषयताया निर्वाह इत्युच्येत, स्व
१२६	१०	तत्रात्रत्य	तत्रत्य
१२९	२३	यज्ञा	यविज्ञा
१३२	१५	काशस्य	काशत्वस्य
१३५	२	प्रभेव	प्रागेव
१५१	२३	स्यात्म	स्याप्यात्म
१५३	३–४	स्वावभासा	स्वानुभवा
१६०	११	स इदं	य इदं
१६१	१४	शत्वो	शत्वा
२००	५	त्यगा	त्यभ्यगा

शुद्धिपत्रम्।

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
२२	१३	अतो वि	अतो न वि
५२	२	चिदभेद	चिद्भेद
५६	१०	खायं	खायां
६२	२२	णान्तरा	णान्यतरा
१०३	१७	गतिः कि	गतौकि
१०८	२२	परार्था	परमार्था
११५	२०	त्यर्थ	त्यर्थः।
,,	२५	रित्वं	रित्वं। न,
११६	१८	न परो	नवा परो
१४७	२४	श्रुते	श्रुतेः
१४८	१४	चान्यच्च	चैतन्याच्च
१६५	७	नत्वा	नवत्वा

॥ श्रीः ॥

सिद्धान्तसिद्धाञ्जनं

श्रीकृष्णानन्दसरस्वतीप्रणीतम् ।

तृतीयो भागः ।

ब्रह्मणो निर्विशेषाद्वितीयत्वे गीतावचनानि ।

अपिचैवं स्मृत्यादयोऽपि निर्विशेषं ब्रह्माद्वितीयं च प्रतिपादयन्ति । यथा —

"ज्ञेयं यत् तत् प्रवक्ष्यामि यज् ज्ञात्वामृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते ॥"

नात्र ब्रह्मविलक्षणः प्रत्यगात्मा अमृताय ज्ञेयमुच्यते । 'नारायणं महाज्ञेयं', 'तमेव विदित्वातिमृत्युमेति',

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥"

इत्यादिविरोधात्, परं ब्रह्मेति विशेषणाच्च । न च अहं वासुदेवः परो यस्य तन्मत्परमितिच्छेदः, अन्यथा मतुबानर्थक्यादिति वाच्यम् ।

"कर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तः",

'परमात्मायमव्ययः', 'तिष्ठन्तं परमेश्वरम्' इत्याद्यनाद्यस्यप्रसङ्गात् । 'क्षेत्रज्ञं चापि मां विद्धि' इत्यभेदोपक्रमाच्च । न चेह क्षेत्रज्ञं चापीति क्षेत्रसमुच्चयाद्-मयशरीरत्वं ब्रह्मणो विवक्षितम् । ऊक्षणापातात् । क्षेत्रज्ञं चापीति न

"एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः"

इत्युक्तानुस्मरणार्थत्वेन समुच्चयासिद्धेः । तथापि सामानाधिकरण्येन स्वरूपाभेदप्रत्ययोपपत्तेश्च । अतो न मत्परमिति च्छेदः । न चैवं मतुबानर्थक्यम् । 'न सत् तन्नासदुच्यत' इति प्रागुत्तरावस्थवृत्तसदसत्पदावाच्यत्वे वृत्तिभेदेन हेतुलाभार्थत्वात् । आदिरस्यास्तीत्यादिमत् कार्यं यस्य नास्ति यच्च न भवति तदकारणमकार्यं च तन्त्रेणानादिमदित्यतो 'न सत् तन्नासदुच्यत' इति ब्रह्मातिरिक्तप्रत्यगात्मनि चाप्रसक्तप्रतिषेधानाञ्जस्यात् । सूक्ष्मस्थूलचिदचिद्वस्तुसंहतस्य ब्रह्मणः प्रागुत्तरावस्थस्य 'असद् वा इदमग्र आसीत् । ततो वै सदजायत' इति सदसच्चिर्देश्यत्वेऽपि तदेकदेशे जीवे तत्प्रसङ्गनिषेधयोराञ्जस्यायोगात् । अपिच कथं 'ज्योतिषामपि तज्ज्योतिः' । स्वव्यतिरिक्तसर्वजडाजडज्योतिरवभासकत्वात् । ब्रह्मापि तथा 'ज्योतिषां ज्योतिरि'ति परं ज्योतिर्न व्यवतिष्ठेत, 'तमेव भान्तमनुभाति सर्वमि'ति च नावध्रियेतेत्यादिबहुसामञ्जस्याच्च ।

नहि 'यो मामजमि'त्यचितोऽचिद्विशिष्टाद् बद्धजीवादजमनादिमिति विशेषणे महोदार इत्यादावौदार्यमहत्त्वस्येवाजत्वानादित्वलाभेन ज्ञानाधीनाजन्मवतो मुक्ता(लो?ल्लो)कमहेश्वरमिति नित्यमुक्ताच्च ब्रह्मणो वैलक्षण्यमुच्यते, लोकमहेश्वरमित्येव तत्सिद्धौ शेषवैयर्थ्यात् । 'गुणानां च परार्थत्वादन्योन्यमसंबन्ध' इत्यतोऽजमनादिमिति तुल्यवदन्यविशेषणत्वात् । उदारशब्दस्य मत्सरादिवद् गुणगुणिवृत्त्या भावपरत्वेन वा महोदार इत्यादौ बहुव्रीह्युपपत्तेः, अप्रामाणिकानपेक्षितमुक्तवैलक्षण्यपरत्वकल्पनायोगाच्च । 'अहमादिर्हि देवानाम्' इत्युक्तोपपादनेनाजमनादिं लोकमहेश्वरमित्युपादाननिमित्तपरतयार्थवत्त्वोपपत्तेः । तद्विदोऽसम्मूढत्ववचनस्य तत्प्रसादलभ्यप्रत्यगेकरसब्रह्मज्ञानान्तरितविषयत्वात् ।

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥"

इत्यनन्तरमभिधानात् । अन्यत्र च

"ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।"
"ते प्राप्नुवन्ति मामेव"

इति विशेषणात् । यत्तु अत्राक्षरशब्दं केवलं प्रत्यगा(त्मन उ?त्मानमु)पासीना मां मत्समानाकारमात्मानं प्राप्नुवन्त्येवेति व्याख्यायते, तत्र दुर्मेधसोऽक्षरानानुगुण्यं व्यवहितान्वयश्चापराध्यति ।

"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥"

इत्यादावपि न विशुद्धात् प्रत्यगात्मनोऽन्यत्वं ब्रह्मणो गम्यत इति प्राप्तावसरं वक्ष्यामः ॥

निष्प्रपञ्चनिर्विशेषवस्तुपरविष्णुपुराणवचनानि ।

"ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥"

(विष्णुपु० अं० १. अ० २. श्लो० १)

"परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते ! ।
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥
यदेतद् दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ! ॥"

(विष्णुपु० अं० १. अ० ४. श्लो० ३८–४१)

"सर्गस्थित्यन्तकालेषु त्रिधैवं सम्प्रवर्तते ।
गुणप्रवृत्त्या" (विष्णुपु० अं० १. अ० २२. श्लो० ४०)

इति ब्रह्मादिरूपेण सर्गादिहेतुत्वं गुणोपाधिकमभिधाय,

"परमं पदं तस्यागुणं महत् ।
तच्च ज्ञानमयं व्यापि स्वसंवेद्यमनूपमम् ॥"

(विष्णुपु० अं० १. अ० २२. श्लो० ४१)

इति निर्विशेषप्रकाशज्ञानमात्रं ब्रह्मरूपमुक्त्वा,

"चतुःप्रकारं तदपि स्वरूपं परमात्मनः"

इति प्रतिज्ञाय,

"साधनालम्बनज्ञानं मुक्तये योगिनां हि यत् ।
स भेदः प्रथमस्तस्य ज्ञानभूतस्य वै मुने! ॥
युञ्जतः क्लेशमुक्तयर्थं साध्यं यद् ब्रह्म योगिनः ।
तदालम्बनविज्ञानं द्वितीयोंऽशो महामुने! ॥
उभयोस्त्वविभागेन साध्यसाधनयोर्हि यत् ।
विज्ञानमद्वैतमयं तद्भागोऽन्यो मयोदितः ॥"

(विष्णुपु० अं० १. अ० २२. श्लो० ४५—४७)

इति साध्यसाधनगोचरवृत्तिद्वयोपधाननिमित्तव्यावृत्तानुवृत्तरूपत्रयमुक्त्वा, त्रिरूपातीतमनुपाधिकमविशेषं तुरीयं रूपमुच्यते 'ज्ञानत्रयस्ये'त्यादिना। अन्ये तु साध्यसाधनगोचरे तत्त्वम्पदार्थविज्ञाने तयोरविभागेन ज्ञानं वाक्यार्थज्ञानम्। तत्र च विशेषाः पारोक्ष्यपरिच्छेदतदुभयपरामर्शा इति व्याचक्षते।

"ज्ञानत्रयस्य चैतस्य विशेषो यो महामुने! ।
तन्निराकरणद्वारं दर्शितात्मस्वरूपवत् ॥
निर्व्यापारमनाख्येयं व्याप्तिमात्रमनूपमम् ।
आत्मसम्बोधविषयं सत्तामात्रमलक्षणम् ॥
प्रशान्तमभयं शुद्धं दुर्विभाव्यमसंश्रयम् ।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् ॥"

(विष्णुपु० अं० १. अ० २२. श्लो० ४८—५०)

तन्निराकरणद्वारं व्यावृत्त्यनुवृत्तिरूपविशेषनिराकरणेन लक्षणीयमव्यावृत्तानुगतम्। तत् तर्हि शून्यम्। न। दर्शितात्मस्वरूपवत्। नात्रोपलब्धुः स्वप्रकाशगुणेन स्वात्मानं दर्शयति संविदिति विवक्षितम्। परमपदशब्दितब्रह्मात्मसामानाधिकरण्यात्। न च स्वात्मन एव स्वात्मदर्शनं, तस्यैव तद्विषयत्वविरोधात्। तद् यदि णिजर्थोऽवश्यं विवक्षणीयः, तदौपाधिकजीवरूपं बोद्धारमपेक्ष्यैव। न च

दर्शनमपि स्वगुणेन, किन्तु प्रकाशात्मनैव, संविदस्तावन्मात्रत्वात् । तदाह—निर्व्यापारमिति । प्रकाशगुणद्वारा चात्मनोऽन्यस्य वा भाने निर्व्यापारत्वविरोधात् । हन्त तर्हि प्रकाशमानमिदं तदित्युच्यताम् । न । अनाख्येयं, सर्वविधशब्दप्रवृत्तिनिमित्तविशेषाभावात् । अथ ज्ञातृज्ञेयसम्बन्धेन ख्यायेत मधुमाधुर्यादिवत् । न । व्याप्तिमात्रम् । अविद्याविषये हि ज्ञातृज्ञानज्ञेयभेदाध्यासाज्ज्ञाता ज्ञेयं ज्ञानेन व्याप्नोतीव । 'प्रज्ञया चक्षुः समारुह्य सर्वाणि रूपाण्याप्नोती'ति श्रुतेः । विद्याविषये च भेदविलयाद् व्याप्तिमात्रम् । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदि'ति श्रुतेः । तर्हि गुणादिभिराख्यायेत । न । अनूपमम् । गुणादिसामान्यं ह्युपमा,

"सामान्यान्येव भूयांसि गुणावयवकर्मणाम् ।
भिन्नप्रधानसामान्यवर्ति सादृश्यमुच्यते ॥"

इत्यभियुक्तोक्तेः । तर्हि जात्या । न । सत्तामात्रम् । तर्हि सतोऽयं धर्मः । न । (अ)लक्षणं, न कस्यचिद् धर्मः । कुतः, प्रशान्तं, प्रपञ्चोपशमात्मकम् । अत एव अभयम् । 'द्वितीयाद् वै भयं भवति' । ननु 'प्रपञ्चोपशमः शिवोऽद्वैतः' आत्मा अभयः श्रूयते । सत्यम् । इदमेव तद् आत्मसम्बोधविषयम् । पाठक्रमाग्रहे तु नन्वनूपम आत्मा 'न तस्य प्रतिमास्ति', 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति । सत्यम् । इदमेव तदात्मसम्बोधविषयमिति व्याख्येयम् । कथं विषयाश्रयरूपितस्वभावप्रकाशमात्रमुत्पादविनाशदूषितं ज्ञानमात्मा । न । शुद्धमसंश्रयम् । प्रकाशैकरसस्यैव ज्ञानस्य निर्विषयाश्रयभावोपपत्तिरग्रे वक्ष्यते । एवं तर्ह्युपदेशानर्थक्यम् । न । दुर्विभाव्यं, सर्वप्रकारासंस्पर्शात् । असंशयमिति पाठे तर्हि प्राप्तसंशयविरोधि(व ! वि)शेषवदुपदेश्यम् । न । असंशयं, प्रकाशमात्रे हि न संशयः । तदेव च सर्वविशेषबाधेनोपदिश्यत इति ज्ञानमयस्य ज्ञानमिति पुरुषस्य चैतन्यमितिवद् व्यपदेशमात्रम् ।

अथ ज्ञानमयस्य परमात्मनः शरीरतया सम्बन्धिज्ञानं प्रत्यगात्मतत्त्वमुच्यताम् । अनन्तरमेव

"एवम्प्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥"
(विष्णुपु० अं० १. अ० २२. श्लो० ५२)

इति मुक्तात्मप्रकारातिदेशात्। 'विष्णोः परमं पदं', 'विष्ण्वाख्यं परमं पदम्,' इति निर्देशभेदाच्च । मैवम् । प्रकृमभङ्गप्रसङ्गात् । अब्रह्मात्मकत्वज्ञानेन च

"तत्रान्यज्ञानरोधेन योगिनो यान्ति ये लयम् ।
संसारकर्षणोत्तौ ते यान्ति नि(बी)जतां द्विज! ॥"
(विष्णुपु० अं० १. अ० २२. श्लो० ९१)

इति क्लशकर्माशयरूपसंसारबीजात्ययवचनायोगात् । 'तमेव विदित्वातिमृत्युमेति' ,

"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"

इत्यादिश्रुतेः । अनुपमत्वशुद्धत्वाभयत्वादिविशेषणानाञ्जस्यप्रसङ्गाच्च । न व एवम्प्रकारमिति जीवसाम्यमतिदिश्यते । निरङ्कुशसाम्यनिषेधश्रुत्यादिविरोधात् । 'परमं साम्यमुपैती'त्यादि च व्याख्यातम् । तस्मान्निर्व्यापारमित्यादिनिर्देशभेदापेक्षया एवम्प्रकारमित्युक्तरूपमनुकृष्य, शुद्धमित्युपक्षिप्तमर्थम् अमलं नित्यमिति व्यक्तीकृत्य, व्यापकमक्षयमिति विषयोपाधिकोपचयापचयौ वारयति । समस्तहेयरहितमिति च न सद्गुणपरिशेषपरम् । सर्वस्यैव विशेषस्य परिच्छेददोषावहतया हेयत्वात् । किन्तु परिगणनादन्यो विशेषो मानुज्ञायीत्युक्तानुक्तसर्वविशेषनिषेधसङ्ग्रहपरम् । एवं निर्विशेषप्रकाशमात्रमात्मतत्त्वं 'विष्ण्वाख्यं परमं पदमि'ति षष्ठीनिर्देशप्रसक्तभेदशङ्कामपोह्य,

"तद् ब्रह्म परमं योगी यतो नावर्तते पुनः"
(विष्णुपु० अं० १. अ० २२. श्लो० ९२)

इत्युक्तमेवार्थमुपसंहरति तस्यैव ब्रह्मणो निष्पन्नयोगिध्येयरूपभेदविवक्षयेति युक्तम् । 'द्वे रूपे ब्रह्मणस्तस्ये'ति प्रकृम्य,

"मूर्तं यद् योगिभिः पूर्वं योगारम्भेषु चिन्त्यते"
(विष्णुपु० अं० १. अ० २२. श्लो० ९०)

इति अनन्तरमुच्यत इति ।

"आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्धयपचयौ नास्य एकस्याखिलजन्तुषु ॥"
(विष्णुपु० अं० २. अ० १२. श्लो० १७)

"यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ! ।
तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥"

(विष्णुपु० अं० २. अ० १३. श्लो० ८६)

पर इति प्रकृत्यादिविविक्त उच्यते । अथवा अन्य इति प्रकारतः, पर इति स्वरूपतश्च भेद आक्षिप्यते । अन्यथा द्वैरुक्त्यात् ।

"यदा समस्तभूतेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् सोऽहमित्येतद् विफलं वचः ॥"

(विष्णुपु० अं० २. अ० १३. श्लो० ८७)

"एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ।
जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः ॥
परज्ञानमयो(य ? ऽस)द्विर्नामजात्यादिभिर्विभुः ।
न योगवान्न युक्तोऽभूत्नैव योक्ष्यति पार्थिव ! ॥

तस्यात्मपरदेहेषु सतोऽप्येकमयं हि तत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ॥"

(विष्णुपु० अं० २. अ० १४. श्लो० २९—३१)

आत्मपरदेहेष्विति व्यवहारदृशा, ऐकात्म्यस्य प्रस्तुतत्वात् । एकमयमिति च तत्रैव, सहौपाधिकभेदेनानुगताशेषस्वरूपावभासप्राधान्यात् । सतो विज्ञानमिति पुरुषचैतन्यवदेव, न त्व(आ?)भेदालम्बनतया । तन्मयं सद्विषयमौपदेशिकविज्ञानम् । मुक्तिसाधनस्य तस्य पारमार्थ्ययोगात् । 'परमार्थो न साधनमि'त्युक्तम् ।

"वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथासौ परमात्मनः ॥"

(विष्णुपु० अं ०२. अ० १४. श्लो० ३२)

"सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥"

"एकः समस्तं यदिहास्ति किञ्चित् तदुच्यते नास्ति परं ततोऽन्यत् ।

सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥"
"तत्याजभेदं परमार्थदृष्टिः ॥"
(विष्णुपु० अं० २. अ० १६. श्लो० २२—२३)

"प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥"
(विष्णुपु० अं० ६. अ० ७. श्लो० ५३)

"आत्मभावं नयत्येनं तद् ब्रह्म ध्यायिनं मुने! ।
विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥"
(विष्णुपु० अं० ६. अ० ७. श्लो० ३०)

"तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥"
(विष्णुपु० अं० ६. अ० ७. श्लो० ९३—९४)

इत्याद्याः ॥

विष्णुपुराणस्य प्रकृतिपुरुषविलक्षणसविशेषवस्तुपरत्वशङ्का।

अत्राह — 'यतो वा इमानि भूतानि जायन्ते', 'सदेव सोम्येदमग्र आसीत्', 'तदैक्षत', 'तत् जोऽसृजते'त्यादिश्रुतेः जगत्कारणं ब्रह्मेत्यवसिते शास्त्रार्थे, तदुपबृंहणम्

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेद्"

इति विधीयते । तदेतज्जानानो मैत्रेयो

"देवतापारमार्थ्यं च यथावद् वेत्स्यते भवान्"
(विष्णुपु० अं० १. अ० १ श्लो० ३०)

इति पुलस्त्यवसिष्ठवरप्रदानलब्धदेवतापारमार्थ्यविज्ञानं पराशरं मुनिवरं कारणविषयमेव पप्रच्छ भुवनकोशादिविषयं च ।

"सोऽहमिच्छामि धर्मज्ञ! श्रोतुं त्वत्तो यथा जगत् ।
बभूव भूयश्च यथा महाभाग! भविष्यति ॥
यन्मयं च जगत् सर्वं यतश्चैतच्चराचरम् ।
लीनमासीद् यथा यत्र लयमेष्यति यत्र च ॥"

(विष्णुपु० अं० १. अ० १. श्लो० ८, ९)

इत्यादि । उत्तरयति च पराशरः —

"विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम् ।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः ॥"

(विष्णुपु० अं० १. अ० १. श्लो० ३९)

इत्यादि । तत्र यदि निर्विशेषमेव ब्रह्म शास्त्रार्थः स्याद्, उक्तप्रश्नप्रतिवचने न सङ्गच्छेयाताम् । तद्विवरणरूपं कृत्स्नं च शास्त्रम् । एवं तु ते स्यातां — किं प्रपञ्चभ्रमस्याधिष्ठानं निर्विशेषचैतन्यमात्रमिति । एवं सङ्गृह्योक्तविवरणाय प्रवर्तमानः 'अविकाराये'त्यादिना स्वेन रूपेण सकलजडजीवविलक्षणं परव्यूहविभवादिसर्वावस्थासु सकलहेयप्रत्यनीककल्याणैकस्वभावं सर्वात्मानं भगवन्तं प्रणम्य, 'नमो हिरण्यगर्भाये'त्यादिना त्रिमूर्तिरूपावस्थितम्, 'एकानेकस्वरूपाये'त्यादिना कार्यकारणावस्थं, 'सर्गस्थितिविनाशानामि'त्यादिना कालात्मकमाधारभूतं, 'विश्वस्ये'त्यादिना

"जीवभूतां महाबाहो! ययेदं धार्यते जगद्"

इत्युक्तक्षेत्रज्ञसमष्टिरूपावस्थितं च नत्वा क्षेत्रज्ञव्यष्टिविशिष्टं नमस्यति 'ज्ञानस्वरूपमि'त्यादिना । ज्ञानैकाकारस्यात्मनो देवादिभेददर्शनं भ्रान्तिदर्शनं, तेन सद्भावेन देवादिरूपेण स्थितमित्यर्थः । अन्यथा निर्विशेषब्रह्ममात्रपरत्वे

"निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ॥"

(विष्णुपु० अं० १. अ० २. श्लो० १)

इति पर्यनुयोगे

"शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता ।"

(विष्णुपु० अं०१. अ०३. श्लो० २, २३)

इति परिहारो न घटेत । चोद्ये निर्गुणत्वोक्त्यैवाशेषविशेषनिषेधसिद्धावप्रमेयत्वादिविशेषणवैयर्थ्यात् । उत्तरे सर्वशक्तियोगवचनायोगाच्च । एवं तु प्रत्युच्येत — निर्गुणस्य ब्रह्मणो न पारमार्थिकः सर्गः, अपि तु भ्रान्तिकल्पितः । तत्र च दुर्घटत्वं भूषणमिति । तथाच सत्त्वादिगुणयुक्तोऽपरिपूर्णः कर्मवश्यो हि कर्ता भवति । नैवं ब्रह्मेति चोद्यार्थः । न ह्येकरूपा भावा भवन्ति । अतः समस्तविश्वविजातीयस्य ब्रह्मणः सर्वशक्तियो(ग उ)पपद्यत इति परिहारार्थः ।

'परमार्थस्त्वमि'त्याद्यपि नान्यस्य स्वरूपेण मिथ्यात्वं ब्रवीति । एकशब्दोपादानाद्, जगतः पते! येन त्वयैतच्चराचरं व्याप्तम्, एष व्याप्तिलक्षणस्तव महिमेति जगतो व्याप्यस्य सतः शेषत्वाभिधानाच्च । किन्तु कृत्स्नशरीरं ब्रह्मवैकं स्वप्रधानं परमार्थः । अतच्छरीरभूतमस्वप्रधानं चान्यन्मिथ्येति, सर्वस्यैव तदात्मकतया ब्रह्मविशेषणत्वात् । अन्यथा तवैषा भ्रान्तिरित्युच्येत । जगतः पते! इत्यधिष्ठानलक्षणा च स्यात् । किमिति तर्हि शुक्लादि द्रव्यपर्यन्तमिव जगदात्मपर्यन्तमस्वतन्त्रं न प्रतियन्ति, ब्रह्मणोऽज्ञानात् । यत् कारणं दृश्यमानमेतज्ज्ञानात्मनस्तव मूर्तं रूपं शरीरभूतमेव सदयोगिनः सदात्मकत्वरहितं केवलदेवमनुष्यादिरूपमेव भ्राम्यन्ति । तथाचान्यथासिद्धा जगतः स्वातन्त्र्यप्रतिपत्तिरपरोक्षापि शास्त्रीयपारतन्त्र्यप्रतिपत्तिबाध्येत्युच्यते — 'यदेतद् दृश्यते' इति । न तु जगदसत्यत्वं न केवलं त्वया सात्मके जगति त्वामजानतां स्वातन्त्र्यविभ्रमः, देहातिरिक्तमात्मानमप्यजानतां देहभेदेषु स्वातन्त्र्यविभ्रम इत्युच्यते — 'ज्ञानस्वरूपमखिलमि'ति । एवं च न पौनरुक्त्यम् । अत्र

"त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति"

इत्यत्रेवाखिलं जगदिति चेतनपरम् । अत्र ज्ञानैकाकारस्य देवाद्यर्थरूपत्वदर्शनं भ्रम इत्युच्यते । न त्वर्थदर्शनमेव । योगलब्धज्ञानात्मविज्ञानास्तु ज्ञानात्मनात्वेया सात्मकमखिलं जगत् त्वच्छरीरं च पश्यन्तीति निगद्यते—'ये तु ज्ञानविद' इति । अन्यथा जगतः पते! परमेश्वर! तवैष महिमा, त्वमित्यादिशब्दासामञ्जस्यप्रसङ्गात् । आदिवराहस्तुतिप्रकरणविरोधाच्च । स्तोतृणामद्वैतात्मविज्ञाने स्तुत्यनुपपत्तेः । तदभावे च नितरां, शास्त्रोपक्रमादिविरोधाच्च ।

"ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदाज्ञानीहि विज्ञानविजृम्भितानि ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ३९)

इत्यत्र च न वस्तुभूत इति न स्वरूपत एव शैलादिमिथ्यात्वपरम् । नापि विविधं विपरीतं वा ज्ञायतेऽनेनेति व्युत्पत्त्या विज्ञानशब्दस्याविद्यावाचित्वे विज्ञानविजृम्भितानीत्याविद्यकत्वमुच्यते । सर्वज्ञस्य ज्ञानात्मक(स्य?स्या)ज्ञानतद्विभ्रमसम्बन्धानुपपत्तेः । प्रकरणविरोधाच्च । भुवनकोशस्वरूपप्रपञ्चनं हि प्रस्तुतम् । तन्मिथ्यात्वविवक्षायां च प्रागेव भ्रान्तस्य भ्रान्तिपरिष्कारवैयर्थ्यात् । किन्तु 'यदंबु वै(ष्णः?ष्णवः) काय' इति निर्दिष्टसमष्ट्यवस्थचिदचिच्छरीरस्य परमात्मनः संसृष्टचिद(चि)द्व्यष्टिशरीरत्वं

"ज्योतींषि विष्णुर्भुवनानि विष्णुर्वेनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वम्" (विष्णुपु० अं० २. अ० १२. श्लो० ३८)

इति सामानाधिकरण्येनोक्त्वा, जीवं प्रति सङ्घातस्यैव शरीरत्वं नान्यथेति दर्शनाद् इहापि तथा मा भूदाशङ्केति निष्कृष्टचिदचिद्व्यष्टीनामप्यात्मशरीरत्वं वक्तुं 'यदस्ति यन्नास्ति च विप्रवर्ये'ति सदसदात्मकौ चिदचितौ विष्ण्वात्मकतया निर्दिष्टौ । तयोरस्तिनास्तिसत्यानृत्यशब्दाभिधेयत्वे निमित्तं नाबाध्यत्वबाध्यत्वं, किन्तु परिणामित्वापरिणामित्वमिति 'सत्यं चानृतं च सत्यमभवदि'त्यादिश्रुत्यर्थप्रतिपत्त्युपयोगाय निरूप्यते । अस्पृष्टाचिदंशक्षेत्रज्ञरूपो भगवान्

ज्ञानैकाकारस्वभावो न देवादिवस्तुभूतः । ततः शैलादयो देवादयश्च विज्ञानविजृम्भितानि । क्षेत्रज्ञस्य वैविध्यज्ञानं विज्ञानं, तस्य विजृम्भितानि तद्धेतुकर्ममूला(स्त)द्विकासतयोपचर्यन्ते । देवाद्याकारानुसन्धानहेतुकर्ममूला इत्यर्थः । 'निजकर्मभेदंविभिन्नचित्तैः', 'सर्वकर्मक्षय' इतीह, अन्यत्र च 'बाह्यकर्मावृतिप्रजः', 'भूपैते कर्मयोनयः', 'देवाद्याः कर्मयोनयः' इति कर्ममूलत्वाभिधानात् । तथाच विज्ञानात्मा सदैकरूपतया सत्यात्मकः । अन्यच्च क्षेत्रज्ञकर्मानुगुणपरिणामतयानवस्थितेः नास्त्यात्मकमित्युक्तं भवति । विज्ञानविजृम्भितत्वमेव व्यतिरेकमुखेनाख्यायते —

"यदा तु शुद्धं निजरूपि सर्वं कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ४०)

ज्ञानैकाकार आत्मा देवादिभेदानुसन्धानमूलकर्मक्षये निर्दोषः शरीरसम्बन्धरहितः शु(द्ध)स्तत्कृतरागद्वेषादिहीन आविर्भूतस्वरूपश्च भवति यदा, तदा चिदचिदेकीकारेण देवाद्यात्मकल्पनामूलकर्मफलभूताः सुखाद्युपपादकभोग्यदेवाद्याकारभेदा वस्तुशरीरकेषु जीवेषु न भवन्ति । एतेनात्मनित्यत्वमचित्कादाचित्कत्वं चास्तिनास्तिशब्दवृत्तिनिमित्तमुक्तं भवति । प्रतिक्षणमचिद्वस्तुनोऽन्यथाभावादेवमित्याह —

"वस्त्वस्ति किं कुत्रचिदादिमध्यपर्यन्तहीनं सततैकरूपम् ।
यच्चान्यथात्वं द्विज ! याति भूयो न तत् तथा तस्य कुतो हि तत्त्वम् ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ४१)

नित्यं हि वस्त्वस्तिशब्दाभिधेयं, तादृशं च किम् । कुत्रचिदचिद्वर्गे दृष्टचरम् । यच्च प्रतिक्षणमन्यथा भवति न तत् तथा, उत्तरोत्तरपरिणामेन पूर्वपूर्वपरिणामापायात् । कुतः प्रमाणात् तस्य तत्त्वं, तदिदमित्यप्रत्यभिज्ञानात् । न प्रागवस्थत्वं हि, तस्माद् नास्तिशब्दाभिधेयमिति । तदेतदुदाहरति —

"मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ४२)

स्वकर्मनिर्मितदेवादिदेहसम्बन्धप्रतिबद्धात्मनिश्चयैर्बाह्यदृष्टिभिरपि भोग्यत्वेनोपलभ्यमानमेव प्रतिकलमन्यथा भवति । किमेवं सति वस्त्वस्तिशब्दार्हम् । एतदुक्तमन्यत्रापि —

"यत् तु कालान्तरेणापि नान्यसंज्ञामुपैति वै ।
परिणामादिसम्भूतं तद् वस्तु नृप ! तच्च किम् ॥"

(विष्णुपु० अं० २. अ० १३. श्लो० ९६.)

इति । यस्मादेवं,

"तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचिद् द्विज ! वस्तुजातम्
विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाप्युपेतम् ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ४३)

विज्ञानातिरिक्तं सर्वमेवाचिद्वस्तु न केवलास्तिशब्दवाच्यम् । विज्ञानं पुनरनेकत्वेऽपि

"एको व्रीहिः सुनिष्पन्नः सुपुष्टं कुरुते प्रजाः"

इत्यादिवदेकप्रकारतयैकत्वव्यपदिष्टं कर्ममूलदेवादिशरीरानुप्रवेशेन देवाद्याकारविषयभेदविभिन्नबुद्धिभिः बहुप्रकारं विभाव्यते । न स्वाभाविको ज्ञानात्मप्रकारभेद इत्याह —

"ज्ञानं विशुद्धं विमलं विशोकमशेष*लोभादिनिरस्तसङ्गम् ।
एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ॥"

(विष्णुपु० अं० २. अ० १२. श्लो० ४४)

---

* 'शब्दादि' इति मुद्रितविष्णुपुराणपाठः ।

कर्माविद्याहीनतया तन्मूलदेहसम्बन्धरूपमलाभावे तत्कृतशोकमलाभावो (वि)-शुद्धत्वादिनोच्यते,

"अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य(तेः)
धूत्वा शरीरमकृतं कृतात्मा"

इति श्रवणात् । अनेकावयवत्वाभावेनात एवोपचयाद्यभावेन च द्विरेकपदम् । सवासुदेव इति च शरीरशरीरितया । न यतो वासुदेवादन्यत् स्वपर्यवसितमस्ति, सर्वस्यैव ब्रह्मणा सात्मकत्वात् । नाचिदंशस्वरूपनिषेधः,

"तदेतदक्षयं नित्यं जलं मुनिवराखिलम्"

इति विरोधात् । परमतोक्तिशङ्कानिरासेनोक्तार्थमुपसंहरति —

"सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत् तु यत् संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ॥"
(विष्णुपु० अं० २. अ० १२. श्लो० ४९)

यथा ज्ञानमिति चिदात्मनो ब्रह्मशरीरत्वमनुसन्धत्ते । यथा सत्यं यथा चासत्यमिति परिणामित्वापरिणामित्वेन सत्यासत्यशब्दप्रवृत्तिनिमित्ते अनुस्मरति । अत्र त्वन्यदसत्यमिति च यन्नास्ति चेत्युपक्रान्तनास्तिशब्दार्हतामाह, न तुच्छत्वं, न वा ज्ञानबाध्यत्वम् । 'वस्त्वस्ति किं', 'मही घटत्वमि'त्यत्र परं परं परिणामान्तरमापद्यमाने वस्तुनि पूर्वपूर्वपरिणामविनाशाद् नास्तिप्रत्ययनिमित्तं विनाशार्हत्वमेव नास्तिशब्दार्थत्वनिमित्तमुच्यते । नचैवंविधस्य प्रमाणसम्बन्धानर्हत्वलक्षणं तुच्छत्वम्, अस्तित्वप्रत्ययैकदेशकालनास्तित्वप्रत्ययविषयत्वलक्षणं बाध्यत्वं वासत्यत्वं घटते । 'अनाशी परमार्थश्चे'त्यत्र च नाशित्वमेवापरमार्थत्वेऽसत्यत्वे निबन्धनमित्युक्तं भवति । तस्मात् सर्वत्रैव यदनाशि नित्यं चिदात्मकं, तत् सत्यं सदैवास्तिशब्दार्हं परमार्थश्चेत्युच्यते । यच्चाचिदात्मकं परिणामभेदेन विनाश्यनित्यं, तदसत्यं नास्तिशब्दार्हमपरमार्थश्चेत्युच्यते । एतत् तु ज्ञानं समस्तभावमनिर्देश्यभेदमपि भुवनाश्रितं चिन्मिश्रं सद् देवमनुष्यादिव(त्) स्पष्टभेदेन सम्यग्व्यवहारं भूतं प्राप्तं यद् वर्तते, तत्रापि चोक्तं कर्मैव हेतुरिति ।

'यज्ञः पशुः' (विष्णुपु० अं० २. अ० १२. श्लो० ४६) इत्यादिना तदेव कर्मरूपमुपवर्ण्य

"यच्चैतद् भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि[1] तत्र कर्मवश्यः"

(विष्णुपु० अं० २. अ० १२. श्लो० ४७)

इत्यग्रे निर्देशात् । तस्मान्नात्र विशेषनिषेध उपलक्ष्यते । 'यद्यन्योऽस्ती'त्यादौ च नात्मनो भेदमाक्षिप्याभेदो विवक्ष्यते । जीवबहुत्वस्य श्रुतिसिद्धत्वात् । 'सर्व एत आत्मानो व्युच्चरन्ति' इति लिङ्गात् । अचिद्विशिष्टस्य जनिमृतिमत्त्वे सति

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्"

इति निष्कृष्टनित्यचेतनबहुत्वाम्नानात् । विविक्तात्मभेद(स्य ? स्या)पूर्वत्वेन तात्पर्यविषयत्वोपपत्तेः । आत्मैकत्वे भिन्नशरीरावच्छे(द)वृत्तेरपि सुखादेरप्रतिबन्धे सति पादाद्यवच्छेदवृत्तेरिव स्वैकसम्बन्धानुसन्धानप्रसङ्गाद् । बद्धमुक्तव्यवस्थायोगाद्, उपदेशानुपपत्तेश्च । गुरोरज्ञत्वे तदयोगात्, तज्ज्ञत्वे चोपदेश्याद्यभावात् । किन्तु ज्ञानैकाकारतया प्रकाराद्वैतमेव । ब्रह्माद्वैतं जीवाद्वैतमिति द्वैतं द्विविधम् । तत्राद्यं प्रकार्यद्वैतम् । द्वितीयं प्रकाराद्वैतमिति । तत्र भेदनिषेधः

"पुमान् न देवो न नरो न पशुर्न च पादपः"

(विष्णुपु० अं० २. अ० १३. श्लो० ९४)

"चतुर्विधोऽपि देहोऽयं मिथ्याज्ञाननिबन्धनः ।"

"देवादिभेदेऽपध्वस्ते" (विष्णुपु० अं० २. अ० १४. श्लो० ३३)

इत्यादिश्रुतविशेषविषयेऽवस्थाप्यते ।

"अहं त्वं च तथान्ये च तत्र त्वमहमप्यथ"

इत्यादि(प्र ? प्रा)करणिकवचनानुरोधादेकत्वादिवचनस्य च 'एको व्रीहिः सुनिष्पन्नः' इत्यादिवदाकारैक्यविषयत्वोपपत्तेः । 'परः कोऽपी'त्यनूद्य 'यद्यन्योऽस्ती'ति प्रकारभेद आक्षिप्यते । अतो(ऽय)मीदृशः, अयमन्यादृश इति विविच्य दुर्वचमि-

---

१. 'हि कर्मवश्य एकः' इति मुद्रितविष्णुपुराणपाठः ।

ति। 'समस्तभूतेषु पुमानेक' इति वैजात्यबहुत्वैकजात्याभ्यामेव बहुवचनैकवचने। 'एको व्यापी'ति सर्वशरीरानुप्रवेशाभिप्रायम्। सर्वगत्वं स्वज्ञानेनोभयं व्यत्ययेन वा। नामजात्यादीनामसत्त्ववचनं कादाचित्कत्वाभिप्रायम्। तदत्यन्तायोगवचनं चाद्वारकतयैवोपपाद्यं, देहद्वारत्वात् तद्योगस्य। एवं ज्ञानैकाकारत्वेन सर्वात्मनां सर्वदेहेषु समत्वे देवादिरूपेण भेददर्शनमतथ्यमित्युच्यते 'तस्यात्मे'त्यादिना। एकमयमिति शुद्धात्मनो बाह्यान्तरभेदकाभावादैक्यप्राचुर्यमुच्यते। अन्यथा देहेषु सदेकं विज्ञानमेव परमार्थ इत्युच्येत, न त्वात्मपरदेहेषु सत एकमयं विज्ञानमिति। एवं प्रकारैक्ये विहिते 'द्वैतिनोऽतथ्यदर्शिनः' इति देवादिवैजात्यदर्शिन उच्यन्ते। समदर्शिनमेव हि तत्त्वदर्शिनमिति भगवतोक्तं—

"शुनि चैव श्वपाके च पण्डिताः समदर्शिनः"

इति। ननु 'द्वैतिनोऽतथ्यदर्शिनः' इति सामान्यापवादः कथं देवादिद्वैतविषयं नीयेत, आत्मद्वैतविषयं वा, कथं पिण्डात्मा द्वैतमपि स्यात्। 'पिण्डः पृथग्यतः पुंसः' (विष्णुपु० अं० २. अ० १३. श्लो० ८५) इति पिण्डात्मभेदः प्रामाणिक इति चेद्, आत्मभेदोऽपि तथेति। एवञ्च जात्येकत्वादात्मस्वेकवचनं, वैजात्यबहुत्वाद् देहेषु बहुवचनं च विवक्षयैव। तेन आत्मद्वैतानिषेधे 'विज्ञानम्' 'आत्मा शुद्धः' इत्याद्येकवचनायोगः। जातावेकवचनं च देहेऽपि स्यादिति निरस्तम्। शुद्धात्मनि वैजात्यविवक्षायोगात्। 'वेणुरन्ध्राविभेदेने'त्यपि नैकात्म्यमेव विवक्षितम्, 'आत्मपरभेदेष्वि'त्यादिविरोधादेव। किन्तु ज्ञानैकाकारस्यात्मनो देहसम्बन्धनिबन्धनं देवादिसंज्ञितं वैषम्यमित्येतावदेव। दृष्टान्ते नैकरन्ध्रवर्तिनां वाय्वंशानां स्पर्शवद्द्रव्यतया भेदोपपत्तेः, वायुत्वैकाकारत्वमतिहायैकात्म्यासम्भवात्। नभोदृष्टान्तोऽप्येकस्यैवात्मनः पर्यायेण देवादिवैषम्यदर्शनाभिप्रायः। अथवा नभसोऽपि पञ्चीकरणादंशभेदोपगमात्, अन्यथाप्याकाशसंयोगे सत्युभयोरणुत्वमहत्त्वान्यतरापत्तेः। अंशानां च नभसो भिन्नानामेकाकारत्वे वैषम्यदर्शनमौपाधिकमिवात्मनामपीत्येव नभो दृष्टान्तीक्रियते।

'सोऽहं स च त्वमि'यत्र ज्ञानैकाकारतया अभेदेन प्रस्तुत आत्मा स इति परामृश्यते। अहं त्वं सर्वमेतद् अचित्संसर्गोपाधिनिबन्धनभेदावभासम्। आत्मस्वरूपं ज्ञानैकाकार आत्मेत्यर्थः। अन्यथा

"पिण्डः पृथग् यतः पुंसः शिरःपाण्यादिलक्षणः"

इति विविक्तात्मोपदेशेऽधिकृते अहं त्वमित्यादिभेदनिर्देशायोगात् । न चाहं त्वमिति विशिष्टविषयस्यैवात्मनि लक्षणा युक्ता । मु(ख?ख्य)सम्भवाद्, यथोपदेशं च ज्ञानैकाकारपरमार्थदृष्टिः देवाद्याकारभेदमोहं तत्याजेति ।

'प्रत्यस्तमितभेदमि'त्यादि च न निर्विशेषाद्वितीयब्रह्मपरं, तदुपक्रमोपसंहारविरोधादित्युक्तम् । 'आत्मभावं नयत्येनमि'त्यत्रापि आत्मनः स्वस्य शक्त्या

"अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते"

(विष्णुपु० अं० ६. अ० ७. श्लो० ६१)

इत्युक्तया विकार्यं नेयावस्थाभेदं ध्यायिनं तद् ब्रह्म आत्मशक्त्या स्वसामर्थ्येनेति । ब्रह्मविशेषण वा आत्मभावं स्वभावं, कर्माविद्यापनयेन निर्दोषत्वं नयति । दोषानाकर्षतीत्याकर्षकोऽग्निः पुटपकं लोहम् इह मलापनयनेन स्वभावम् ।

"यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥"

(विष्णुपु० अं० ६. अ० ७. श्लो० ७३)

इति तत्प्रकरणेऽभिधानात् । अथवा आकर्षकोऽयस्कान्तो यथात्मनः स्वस्य भावं चलनादि लोहं नयति, तच्चलनादौ लोहचलनादिदर्शनात् । तथा ब्रह्म आत्मनो भावं सर्वज्ञत्वं सत्यकामत्वं सत्यसङ्कल्पत्वं कामा(न्नी?न्नि)त्वं कामरूपित्वं कामचार इत्येवमादि नयति, तुल्यभोगं करोति । अथवा यथायस्कान्तो दारुनिमग्नं लोहमात्मभावं दारुतः पृथगाकृष्य स्वरूपं निष्कर्षं नयति, तथा ब्रह्म प्रकृतिसम्बन्धाद् निष्कृष्य शुद्धतां नयति । अथवा भवतेः प्राप्तिकर्मणो भावशब्दः । एवं चात्मभावं स्वप्राप्तिं नयति । ओदनपाकं पचतीतिवदित्येवमर्थभेदोपपत्तेर्नाभेदविवक्षा गम्यते । नह्याकर्षकं प्राप्तस्य लोहस्य तदभेदः सम्भाव्यते । तथा ब्रह्म प्राप्तस्यापि, दृष्टान्ताऽस्यात् । 'तद्भावभावमापन्नः' इति च न स्वरूपैकत्वाभिप्रायम् । अत्रैव प्रकरणे

"विज्ञानं प्रापकं *प्राप्ये परे ब्रह्मणि पार्थिव ! ।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥"

(विष्णुपु० अं० ६. अ० ७. श्लो० ९१)

---

* 'सर्वं इति मुद्रितविष्णुपुराणपाठः.

इति तथाशब्देन ब्रह्मवद् ब्रह्मकर्मोभयभावनात्रयोत्तीर्णो विशुद्धात्मापि प्राप्य इति सोऽप्यनुसन्धेय इत्यभिप्रैति। तथा च यद् ब्रह्मणः प्रक्षीणाशेषभावनत्वं स्वभावः स तद्भावः, तस्य भावं सत्तामापन्नः। स्वयमपि ज्ञानेन प्रक्षीणाशेषभावन इत्यर्थः। अन्यथा तद्भावमापन्न इत्येव स्वरूपैक्योक्तौ परभावपदवैयर्थ्यात्। 'भवत्यभेदी'। ज्ञानैकाकारतया परमात्मैकप्रकारः स्यात्। देवादिरूपो भेदस्तु तस्य तत्सम्बन्धहेतुकर्मरूपाज्ञानमूल इति।

*"एकस्य रूपभेदस्तु बाह्यकर्मावृतिप्रजः।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः॥"
(विष्णुपु० अं० २. अ० १४. श्लो० ३३)

इति ह्युक्तम्। 'सितनीलादी'त्यनेनात्मनो देहादिबाह्यभेदराहित्यमुक्तम्। आन्तरसुखादिभेदराहित्यमनेनोच्यते। बाह्यमात्मनोऽस्वाभाविकं कर्मैवावृतिः स्वरूपज्ञानतिरोधानं, तेन प्रजायते। एकस्वरूपस्य रूपभेदः सुखित्वदुःखित्वादिभेदः। स च देवादिभेदेऽपध्वस्ते नास्ति। अवरणो हि सः। सुखादिहेतुदेवादिदेहसम्बन्धमूलकर्मावरणशून्यत्वादित्यर्थः। 'विभेदजनके' इति चैकप्रकारस्यैव देवादिमयभेदजनके कर्मरूपाज्ञाने ब्रह्मदर्शनेनात्यन्तनष्टे पुनर्हेत्वभावादसन्तमनित्यं हेतुजं देवादिभेदं कः करिष्यति। हेत्वभावात्। ब्रह्मदर्शी न पुनरावर्तत इत्यर्थः। अन्यथास्यात्यन्तास्वरसत्वात्। जनकशब्दस्तावद् नाध्यासहेतौ स्वरसः। अज्ञानशब्दस्य चानिर्वचनीयपरत्वमव्युत्पन्नम्। व्युत्पन्नं तु कर्मणि, 'अविद्यया मृत्युं तीर्त्वा', 'अविद्याकर्मसंज्ञान्या' इत्यादिप्रयोगात्। नाशशब्दश्च बाधे न स्वरसः। असन्तमिति च व्यर्थं, सद्भेदानुपगमेन व्यावर्त्याभावात्। अतो नायं जीवपरस्वरूपाभेदपरः।

'द्वे रूपे ब्रह्मणस्तस्य' इत्यादौ च क्षराक्षरशब्दितबद्धमुक्तशरीरकत्ववचनेन ब्रह्मणो भेदावगमात्। गीतासु च

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥"

इत्यत्र ज्ञानसङ्कोचादिमत्त्वतदभावाभ्यां क्षराक्षरपुरुषौ बद्धमुक्तावु(च्य?च्ये)ते। अत एवाविकारतया मुक्ता(त्म?त्मा) कूटस्थः। विभूतिद्वयसाधारण्याद् वा। आभ्याम्

* 'एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः' इति मुद्रितपुस्तकपाठः।

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः",
"तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः"

इत्यादिषु

"यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः"

'तद् विश्वमुपजीवति', 'पतिं विश्वस्यात्मेश्वरं', 'सर्वं व्याप्य नारायणः स्थितः' इति हि श्रूयते।

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः",

'सोऽक्षरः परमः स्वराड्' इति मुक्तात्मशरीरकतया स ब्रह्मेत्यादिवत् सामानाधिकरण्यनिर्देशः ।

"यो मामेवमसंमूढो जानाति पुरुषोत्तमम्"
"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत!"

इति बद्धमुक्तजीववैलक्षण्यस्य तात्त्विकत्वमभिप्रेयते । न चाविद्यासंसारतापसम्बन्धार्हस्य जीवस्य सर्वदैव तदनर्हब्रह्माभेदः सम्भवति । निर्मुक्तस्यापि स्थितिनाशयोरन्यस्यान्यतादात्म्यायोगात् । यथोक्तं —

"परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥"
(विष्णुपु० अं० २. अ० १४. श्लो० २७)

इति ।

न च स ब्रह्मणः सायुज्यं गच्छतीत्यभेदपरम् । युज्यते गुणिनेति युग् गुणः, समानगुणकः सयुक् , तस्य भावः सायुज्यमिति व्युत्पत्तिविरोधात् । 'एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतामाप्नोति' इति प्रयोगविरोधाच्च । नह्येकस्यान्यस्य सतो युगपदनेकाभेदः सम्भवति । नापि क्रमेण, उपासनापरिपाकेन स्वोपाधिपरिच्छेदप्रहाण्यानन्येकोपाधितया तदभेदापत्तौ तद्विरोधिकर्मणोऽपि हानावश्यम्भावेन पुनरहेतुकस्वोपाधिकृतविभागायोगादन्युपाधिप्रहाण्यैवान्याभेदापत्तावन्यभावप्रसङ्गात् । पृथिव्येकीभूतपृथग्भूतघटादिवदन्येकीभूतपृथग्भूतजीवस्यानित्यत्वप्रसङ्गाच्च । तत्र यदि समानगुणकत्वमेव सायुज्यार्थः स एवान्यत्रापि युक्तः । अर्थभेदे गौरवात् । 'लीना ब्रह्मणि तत्परा योनिमुक्ताः' ।

"आत्यन्तिको विमुक्तिर्या लयो ब्रह्मणि शाश्वते"

(विष्णुपु० अं० ६. अ० ८. श्लो० १)

इत्यादौ लयशब्दोऽपि नाभेदार्थः । प्रतिसञ्चरभेदेषु लयशब्दस्यातदर्थत्वात् ।

"प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयते परमात्मनि ॥"

(विष्णुपु० अं० ६. अ० ४. श्लो० ३८)

इत्यादौ स्वरूपाभेदविवक्षायां

"हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ।
यद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते ॥"

(विष्णुपु० अं० १. अ० ५. श्लो० ६०)

'तेषां यो यानि कर्माणि' इत्यादिविरोधात् । तत्रोपाकृतनामरूपावस्थाविनाशेन कारणद्रव्यसंश्लेषार्थत्वेऽत्रैवार्थान्तरकल्पने गौरवात् । 'ब्रह्म वेद ब्रह्मैव भवती'-त्यादि तु वेदितुर्ब्रह्मपर्यन्तस्वरूपाविर्भावाभिप्रायम् ।

"तथा विद्वान् नामरूपाद् विमुक्तः परात् परं पुरुषमुपैति दिव्यम्"

इति श्रुतेः प्राकृतनामरूपविमुक्तस्य प्राप्यब्रह्मसमानाकारतया प्रकाराभेदपरोऽयं व्यपदेशः । प्रकारैक्येऽपि सोऽयं व्रीहिः,

"यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥"

इत्यभेदव्यपदेशदर्शनात् । अत एव

"एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ।
सोऽप्यंशः सर्वभूतस्य मैत्रेय! परमात्मनः ॥"

(विष्णुपु० अं० ६. अ० ४. श्लो०३५)

इति विशुद्धमेव प्रत्यगात्मानं परमात्मभेदेन व्यपदिशति । तस्मान्नात्मनि-र्विशेषत्वं विशेषमृषात्वम् ऐकात्म्यं वा क्वचित् प्रतिपद्यामहे इति ॥

सिद्धान्तः उपबृंहणस्वरूपम्।

अत्रेदं वक्तव्यम्। किमित्येवं सर्वत्र शब्दस्वरसलभ्यमर्थमुल्लङ्घ्य क्लिष्टार्थकल्पना तान्त्रिकस्येति। न। आगमो हि कारणात्मावसायीत्युक्तम्। न चानधीतशाखान्तरार्थैः सहाधीतशाखार्थनिष्कर्षे उपबृंहणं, येनोपबृंहणविधिसामर्थ्येन सविशेषं ब्रह्म शास्त्रार्थ इति, 'अपिच स्मर्यते' (ब्र० १. ३. २३) 'स्मृतेश्च' (ब्र० १. २. ६) इत्यादावागमाधिगतानतिरिक्तविषयस्मरणोदाहरणात्। किन्तु पुरुषदोषापनयेनाधिगतार्थावधारणमेव, अखिलागमवेदिमुनिवचनसंवादेनावगतिदार्ढ्योपपत्तेः॥

विष्णुपुराणोपक्रमप्रश्नप्रतिवचनस्वारस्यविमर्शः।

यत्तु इह सविशेषपरत्व एव प्रश्नप्रतिवचनाद्यानुगुण्यमिति, तदिदं परीक्षका विदाङ्कुर्वन्तु। प्रष्टव्यो हि मुनिर्देवतापारमार्थ्यविदुच्यते। पृष्टार्थनिर्णयसामर्थ्योपपादनाय तत्र यद्यपि देवताशब्देन कर्मज्ञानाराध्यं सविशेषं ब्रह्मोच्येत। तथापि तस्याः पारमार्थ्यमतिक्रान्तविशेषं भानमात्रम्। यथावद् अबाधितं वेत्स्यते इति विशेषणेन निर्विशेषवेदनमेवाभिप्रेयते। अन्यथा देवतां वेत्स्यत इत्येवोच्येत। देवताशब्देनैवोभयलिङ्गतयाराध्यत्वेऽभिधेये शेषवैयर्थ्यात्। तं चानु मुनिं 'त्वत्तो हि वेदाध्ययनमधीतम्' इत्यारभ्य

*"मामन्ये नाकृतश्रमम्।
वक्ष्यन्ति सर्वशास्त्रेषु" (विष्णुपु० अं० १. अ० १. श्लो० ७)

इति स्वस्य सर्वशास्त्रज्ञतामुक्त्वा मैत्रेयः प्रश्नमवातीतरत् 'सोऽहमिच्छामी'त्यादिना। तस्य च प्रश्नमूलपरीक्षायां निर्विशेषम्याद्वितीयस्य निरञ्जनस्य कारणत्वादिविशेषायोगानुसन्धानमेवानुसर्तव्यम्, एवमनुद्घाटिताभिसन्धिके प्रश्ने 'विष्णोः सकाशादि'त्यादिना यथाशास्त्रमुत्तरिते, 'निर्गुणस्ये'त्यादिनाभिसंहितप्रश्नबीजोद्घाटनात्। अत एव ब्रह्मरुद्रादिषु विशेषानवधारणात् प्रश्न इति निरस्तम्, प्रश्नबीजस्यान्यथोद्घाटितत्वात्। अन्यथा त्रिभ्योऽन्यस्मादित्येव प्रत्युच्येत। त्रिमूर्त्युत्तीर्णस्यैवेह शास्त्रे कारणत्वेन विवक्षितत्वात्।

"शक्तयो यस्य चैकस्य ब्रह्मविष्णुशिवात्मिकाः"
"ब्रह्मविष्णुशिवा ब्रह्मन्! प्रधाना ब्रह्मशक्तयः"
(विष्णुपु० अं. १. अ० २२. श्लो० ५७)

---

* 'मयाधीतं श्रमः कृतः' इति मुद्रितविष्णुपुराणपाठः।

इत्याद्यभिधानात् । प्रश्नबीजाज्ञानं वा प्रतिवक्तुः कल्प्येत । 'निर्गुणस्ये'त्यादि च प्रश्नान्तरं प्रसज्येत । 'जुषन् रजोगुणमि'त्यादिना प्रागेव गुणान्वये गदिते 'निर्गुणस्ये'त्यादिप्रश्नश्च न सङ्गच्छेत । सद्वारकेऽपि गुणान्वये सर्गादिकर्तृत्वाविरोधात् । न खल्वद्यत्वेऽपि गुणत्रयवश्यत्वं, सापेक्षत्वं कर्माधीनफलभाक्त्वमन्यद्वा सदपि कर्तृत्वे प्रयोजकं, येन ब्रह्मणि तदयोगादकर्तृत्वमाशङ्क्येत । विदुषि विहारिणि (परो?) परोपकारि(णि) च व्यभिचारात् । न च क्वचित् सहचारमात्रेणाप्रयोजकाभावादप्रयोज्ययोगाशङ्का सङ्कलिताशेषशास्त्रस्यात्रस्यता मैत्रेयस्य यस्यकस्यचिदिव शक्यते कल्पयितुम् । तदयमर्थः—गुणवैषम्यविमर्दमूलः सर्गादिः । आत्मा च तमसः परस्तात् केवलो निर्गुणो निरवद्यो निरञ्जनः । सृज्यं चाचेतनम् । आत्मा पुनरप्रमेयः स्वयञ्ज्योतिस्स्वभावविसजातीयः । निर्गुणत्वमप्रमेयत्वं चानुपादानत्वे हेतुः, शुद्धत्वममलात्मत्वं च कर्तृत्वाभावे । अतो विशेषणवैयर्थ्यम् । कार्यकरणवानशुद्धः कामसङ्कल्पादिमलानुगतः कर्ता । ब्रह्म चाकायमव्रणमस्नाविरं शुद्धमपापविद्धमात्मकाममाप्तकाममकाममिति कथं सर्गादिकर्तृ उपादानं वोपगम्यत इति । एवं प्रश्ने 'शक्तयः सर्वभावानामि'त्याद्युत्तरम् । तत्र यदि ब्रह्मणः स्वगतशक्तिमत्त्वेन सविशेषत्वमवस्थाप्येत मृदादिवद् विकारित्वमापद्येत । ततश्चानित्यत्वादयो दोषाः । मृदादेरपि हि विकारित्वं स्वशक्त्यान्यथाभाव एव । न चाविकारित्वशक्तिरपि स्वाभाविकी परमात्मनः

"मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥"

इतीश्वरेणैवात्मनः शक्तिवैचित्र्युपवर्णनादिति वाच्यम् । वस्तुस्वभावविकल्पायोगात् । स्वभावेन कल्पनया च सर्वसम्भवेऽगतिकविरुद्धशक्तिवैचित्रीकल्पनावैयर्थ्याच्च । अन्यथा ब्रह्मणि स्वशक्त्यैव चिदचिद्भेदाभेदसम्भवे किं विशिष्टाभेदोपपादनक्लेशेन । आह च भगवान् पराशरोऽतिक्रान्तसर्वभावशक्तेरविक्रियस्यासङ्गस्यैवात्मनः सन्निधिमात्रेण भावशक्त्येकमूलसर्गादिहेतुत्वं

"यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ।
मनसो नोपकर्तृत्वात् तथासौ पुरुषोत्तमः ॥"
(विष्णुपु० अं० १. अ० २. श्लो० १७)

S. GOPALASWAMI SASTRI
VIRAVANALLUR

"निमित्तमात्रमेवासौ सृज्यतां सर्गकर्मणि ।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥
निमित्तमात्रं मुक्त्वैव नान्यत् किञ्चिदपेक्ष्यते ।
नीयते तपतां श्रेष्ठ ! स्वशक्त्या वस्तु वस्तुताम् ॥"

(विष्णुपु० अं०१. अ०४. श्लो०९१, ९२)

इति । सन्निधिरत्र विषयभावः । विषयभावेन क्षोभकतामात्रे दृष्टान्तः । सदालम्बनेन हि प्रकृत्यादिक्षोभः । अन्यथा निस्स्वभावत्वात् । न च प्रकृत्यादिविषयभावोऽपि ब्रह्मणः स्वभावः, अनपवर्गप्रसङ्गात् । किन्तु प्रकृतिकृतो विकल्प एव । निमित्तमात्रमेवासाविति च कथञ्चिदपि (दपि ?) क्रियाननुप्रवेशेन केवलमधिष्ठानतया सृज्यात्मलाभौपयिकतोच्यते । न च क्रियानिष्पत्ताववश्यं निमित्तव्यापारोऽपेक्ष्यते अद्यत्वेऽपि । बीजादिशक्त्यैव कूटस्थ एव कालादावङ्कुरकुसुमादिसर्गदर्शनादित्याशयेनोक्तं 'निमित्तमात्रं मुक्त्वैवे'त्यादि । इहापि च सर्वभावानां शक्तय इत्युक्त्वा तास्तु भावशक्तयो ब्रह्मण इत्युच्यते । यदि हि ब्रह्मण एव शक्तयो विवक्ष्येरन्, भावपदानर्थक्यमापद्येत । न च भावः सत्ता तत्प्रयुक्ता निरुपाधिकाः स्वाभाविक्यः शक्तय इत्यधिकोपक्षेपो युक्तः । 'शक्तयसर्वभावानामि'ति षष्ठीनिर्दे(श)विरोधात् । प्रकृतहाने च तद्वृत्तस्य सदृशवृत्तिकल्पनागौरवाच्च । तदयमर्थः—सर्वेषां भावानामव्यक्तादिविशेषान्तानां याः काश्चिदचिन्त्यज्ञानगोचराः शक्तयः । नहि भावशक्तयस्तर्कितुं शक्यन्ते । यथाण्व्या वटधानाया महावटसंस्थानशक्तिः, शुङ्गकणिकाया वा कायसंस्थानशक्तिः । न च विज्ञातुम् । एकैकस्यैव शक्यानन्त्येन शक्त्यानन्त्यात् । ता यतो ब्रह्मण एव । 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेः । अतस्तस्यैव सर्गादिगोचरा भावशक्तयो भवन्ति । अथवा यतोऽचिन्त्यज्ञानगोचराः, अतो ब्रह्मण एव ता भावशक्तयो भवन्ति । ब्रह्म ह्यचिन्त्यशक्ति प्रसिद्धम् । भावशक्तयो ब्रह्मण इति तस्यैव सर्वभावविवृत्तत्वादिति गम्यते । दृश्यते हि फणिशक्तिः प्रतिभयत्वादिका तद्रूपविवृत्तायाः सज एवेति । एवं चार्थादधिष्ठानभावेन नियन्तृतयौपाधिकसङ्कल्पादिमत्तया वा कर्तृत्वमप्युपपादितं भवति । न चात्र पावकस्य यथोष्णता द्रव्यत्वेऽपि गगनपवनादिविसजातीयतया, एवं ब्रह्मणोऽपि समस्तवस्तुविसजातीयतया सर्गाद्याः शक्तयो भवन्तीति विवक्षा युक्ता ।

भावशक्तय इति विशेषणविरोधात् । किन्तु भावशक्तयोऽचिन्त्या इत्युक्तमुदाहरणेन दर्शयति । पावकस्यैवोष्णता, न पाथसः । तस्य स एव स्पर्शो नान्यः । तत एव दाहादिर्नान्यतः । कुत एवमिति हेतुरूपकार्यैरतर्क्यस्वभावा च सा । एवंप्रकारा भावशक्तय इति ।

केचिदाहुः — शक्तयः सर्वभावानामचिन्त्यं स्वप्रभं ज्ञानं ब्रह्म तद्गोचरास्तदधिष्ठाना यतः, अतः सर्गाद्याः स्रष्टृत्वसृज्यत्वादिमय्यो भावशक्तयो ब्रह्मणो भवन्ति । दीपाद्युष्णतेव तदुपादानस्याग्नेरिति ।

यत्तु, सत्यं निर्विशेषस्य न वास्तवः सर्गः । किन्तु भ्रान्तिमात्रमिति प्रत्युच्येतेति । तत् तुच्छम् । स्वतन्त्रस्य नियोगाद्यनर्हत्वात् । एवमपि तदर्थसिद्ध्युपपत्तेः । अनन्तरमेव परमार्थतो ज्ञानस्वरूपमेव 'आर्थस्वरूपेण भ्रान्तिदर्शनतः स्थितमि'त्यभिधानाच्च । एवं प्रागाविद्यकत्वापरिज्ञानान्मैत्रेयस्य किं प्रपञ्चभ्रमस्याधिष्ठानमिति न प्रश्नप्रवृत्तिः । उत्तरे तु 'जगच्च स' इति सामा-(ना)धिकरण्योपक्षिप्तोऽर्थोऽर्थस्वरूपेण 'भ्रान्तिदर्शनतः स्थितमि'ति हि स्फुटितः ।

ननु च 'यन्मयं च जगदि'ति प्रश्नस्योत्तरं जगच्च स इति । तत्र यदि मयड् विकारार्थः स्याद्, उपादानं पृष्टं स्यात् । तत्तु पृष्टं 'यतश्चैतदि'त्येव । न च गोबलीवर्दनयः, अर्थान्तरसम्भवात् । नापि स्वार्थिकः, अर्थान्तरसम्भवात् । अपिचैवं प्रतीतजगद्रूपप्रश्नायोगेन तस्य सत्यासत्यत्वविषयः स (ङ्क?क)ल्प्येत । तत्र चाकारद्वयोपस्थापकसामानाधिकरण्येन जगच्च स इति प्रतिवचनं विरुध्येत । न च बाधायां सामानाधिकरण्यं लक्षणापातात्, पदार्थबाधे सामानाधिकरण्यव्याघाताच्च । किञ्चैवं जगत्पदस्यासङ्कुचद्वृत्तितया जीवस्यापि बाधः स्यात् । अन्यथान्यस्य बाधेऽन्यस्याभेदे च बोध्ये शब्दवृत्तिवैरूप्यापातात् । ननु 'भोक्ता भोग्यं प्रेरितारं च मत्वा', 'सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदि'ति सर्वब्रह्मसामानाधिकरण्यवैरूप्यं तवापि वाच्यम् । प्रेरितरि स्वरूपभेदादन्यत्र शरीरशरीरिभावादिति चेत् । नाहि शरीरशरीरिभाव ।व सामानाधिकरण्यार्थः, किन्तु पदार्थाभेद एव । ब्रह्मणि तत्तत्पदवृत्तिः

परं शरीरशरीरिभावेनान्यथा वोपपाद्येत्यन्यदेतत्। न च जायते गच्छति च जानातीति जगद् जीव एव, तस्य च स्वरूपाभेदे सामानाधिकरण्यावैरूप्यमिति वाच्यम्। सर्वसम्भवे शब्दवृत्तिसङ्कोचायोगात्। 'यन्मयं च जगत् सर्वमि'ति प्रश्ननुरूपत्वापत्तेश्च। एतेन 'ब्रह्मैवेदं विश्वं', 'स एवेदं सर्वमि'त्यादौ विशति शरीराणीति विश्वं सरति लोकालोकान्तरमिति सर्वमिति कथञ्चिज्जीवोक्तौ सामानाधिकरण्यावैरूप्यमिति निरस्तम्। सर्वनामनीह विश्वादिशब्दे सम्भवति योगकल्पनायोगात्। 'ब्रह्मैवेदममृतं पुरस्तादि'त्यादुक्तं जडसामानाधिकरण्यं पुनरवक्तव्यमिति योगकल्पनेति चेत्। न। तत्रापि सङ्कोचहेत्वभावात्, पृथगुक्तस्यापि समासेनानुक्तसमाहारमुपसंहारोपपत्तेः। अन्यथा परावृत्तेदमैकाधिकरण्यक्लीबनिर्देशासाङ्गत्यात्। न चौपाधिकजीवस्य ब्रह्मापेक्षया परात्मभावाद् 'अनेन जीवेने'त्यादिवदिदंवृत्तिः स्यात्, क्लीबनिर्देशश्चानि-(र्दि)ष्टविशेषतया सामान्यवृत्तत्वादि(ति) वाच्यम्। 'ब्रह्मैवेदं विश्वमि'त्यादिपरोक्षोपदेशे ब्रह्मापेक्षाबुद्ध्यनवकल्पनात्। योगेन जीवमात्रवृत्तितया सामान्यवृत्तित्वाभावाच्च। तस्माद् 'जगच्च स' इति सामानाधिकरण्यमवैरूप्याय शरीरशरीरिभावनिबन्धनमेव। एवञ्च जगतोऽन्तर्बहिश्च व्या(मचा?प्या)त्मना नियम्यमानस्य तत्प्रायुर्योपपत्तेः, यन्मयं यदात्मकं, स्थित्यर्थं किमात्मकं भवतीति प्रश्नोऽपि सङ्गच्छत इति।

मैवम्। यथा जगत्। (ब)भूवे'त्यादिभिर्हि जगत्स्वभावोऽनुयुज्यते। ततो 'यतश्चैतदि'त्यादिना कारणस्वभावः। एवं हि यत इति विप्रकृष्टमादौ नापकृष्टं भवति। तत्र यथा बभूव भूतकाले सदसद् वा। 'सदेव सोम्येदमग्र आसीद्', 'असदेवेदमग्र आसीदि'त्युभयश्रुतेः संशयः। सदपि किं(मर्थ?मित्थ)मन्यथा वा, 'ध्रुवा द्यौर्ध्रुवा पृथिवी', 'द्यावापृथिवी जनयन् देव एकः' इति श्रवणात्। भूयः पुनरन्ते यथा भविष्यतीति पूर्ववत्। एवमादावन्ते च जगत्स्वभावे पृष्टे मध्ये च स प्रष्टुं युक्तो यन्मय इति, परिशेषात्। यथा भवतीति वक्तव्ये यन्मयमित्युक्तम्। आदावन्ते च यदात्मनो यद्भावः स एव मध्येऽपि स्वभाव इति तत्प्रायुर्योपपत्तेः। किं भूरम्बु तेज इत्येवमादिविशेषस्वभावमेवोपल(ब्ध?ब्धि)बलाद्, अन्यस्वभावं वा 'एतदात्म्यमिदं सर्वमि'त्यादिश्रवणादिति। एवं त्रिभिः प्रश्नैराकस्मिकं जगदनाकस्मिकं वेति प्रश्नः

फलितः । अन्यथा जगदनाकस्मिकत्वकोट्यन्तरेऽनुपप्लवमाने तत्कारणस्वभावानुयोगस्याप्राप्तकालत्वात् । यत्तु यन्मयमिति स्थितिप्रश्न इति । तन्न । तस्यास्फुटतया नेयार्थतादोषात् । परिशेषाद् गम्यत इति चेत् । न । 'यतश्चैतदि'त्येव हेतुपञ्चम्या 'यतो वा इमानी'त्यादिश्रुतिच्छायानुपातिन्या नियन्तृपादानप्रश्नतन्त्रतोपनमेन तत्तन्त्रसत्तानुवृत्तिलक्षणस्थितिप्रश्नस्याप्यर्थसिद्ध्युपपत्तेरिति। यथेति कारणे कार्ये लये चावृत्त्या विशेषणम् । वृश्चिकजातीये गोमयादिवदव्यवस्थयान्यथा वा, स्वरूपविकारेणान्यथा वा किमुपादानं, तदतिरेकेणान्यथा वा किञ्चिन्निमित्तं, यथा चराचरं क्रमेणान्यथा वा जायते, एवं लयेऽपि भूतभविष्योपाधिना लयाधारस्य द्विरुपादानादेव घटादिलये कपालचूर्णादिवदव्यवस्थाशङ्का ध्वनितेति न यथेति विशेषणम् ।

अत्रोत्तरं 'विष्णोः सकाशादि'त्यादि सूत्रभूतम् । तत्र विष्णोरिति सावधारणं, 'सिद्धे शब्दार्थसम्बन्धे', 'अब्भक्षो वायुभक्ष' इत्यादिवत् । एवमुपादानाव्यवस्था परिहृता भवति । सकाशात् सन्निधानादिति च स्वरूपविकारशङ्का, उद्भूतमिति च सत एवाविर्भाव उक्त इत्यादावसत्त्वशङ्का इत्थंसत्त्वशङ्का च निरस्ता भवति । 'तत्रैवे'ति लयाधाराव्यवस्थाशङ्का, स्थितमित्यन्तेऽसत्त्वशङ्का च वारिता ।

"तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥"
(विष्णुपु० अं० १. अ० २२. श्लो० ५९)

इति हि वचनम् । 'स्थितिसंयमकर्तासावि'त्युत्पत्तेरप्युपलक्षणम् । अनेनोत्पत्त्यादिकर्तुरुपादानातिरेकशङ्का परास्कृता । असाविति हि सावधारणम् । भूतिलयक्रमाक्रमशङ्कापरिहारश्चात्राभिप्रेयते । अ(ग्रे) तद्विवरणरूपे परत्र सर्गप्रलयक्रमप्रतिपादनात् । एवं पारिशेष्याद् यन्मयमिति प्रश्नस्योत्तरं 'जगच्च स' इति । तन्मयमित्युक्ते विशेषात्मतापि जगतः स्वभावान्तरं मा प्रसाङ्क्षीदिति 'जगच्च स' इत्युक्तम् । न च सत्तामात्रसंविदात्मनो विष्णोर्विशेषसंवेद्यजगद्रूपाभेदालम्बनमिह सामानाधिकरण्यं, विरोधात् । न च विशिष्टाभेदः, जगत्पदस्य तद्विशिष्टे विष्णावप्रसिद्धेः । प्रकारान्यत्वे च तच्छब्दस्य प्रकारिपर्यन्तत्वनिरासात् । यद्यपि जगदात्मनः शरीरं स्यात्, तथापि न शरीरशब्दत्वादात्मपर्यन्तो

मनुष्यादिशब्दः । तादात्म्याभिमानमूलतया सर्वसिद्धत्वात्, शरीरात्मभावादिनिरासाच्च । एवञ्च ब्रह्मविवर्ततया तादात्म्याद्, जगतः सत्तानिषे(धे) निरुपाख्यतापत्त्या च जगत्पदस्यापि तद्वृत्तित्वात् । ब्रह्मणश्च 'अस्तीत्येवोपलब्धव्यः', 'सत्तामात्रात्मके ज्ञेय' इत्यादिशास्त्रेण सत्तात्मकत्वाद् 'जगच्च स' इति सामानाधिकरण्ये विशि(ष्टो? ष्टा)भेदासम्भवेन स्वरूपाभेदावसायिनि सत्तात्मको विष्णुरेव स्वभावो जगतो नाभावो न वा दृश्यमानविशेषात्मतैवेत्युक्तं भवति । नहि बाधायां सामानाधिकरण्यमिति बाधबोधकमित्यर्थः । आर्थिके शब्दवृत्तिकल्पनागौरवाद्, लक्षणादोषाच्च ।

कस्तर्हि विशेषो बाधसामानाधिकण्यस्य । 'तत्त्वमसी'त्यादावपि स्वरूपाभेदावगमे तदनवगममूलरूपबाधाविशेषात् । उच्यते । यत् प्रतिपन्नधर्मिरूपबाधपर्यवसायि तद् बाधसामानाधिकरण्यं, यथा यः सर्पः सोऽसौ रज्जुरिति । धर्ममात्रबाधपर्यवसायि त्वभेदसामानाधिकरण्यं, यथा यमशङ्खं मन्यसे तदिदं पीतद्रव्यं शङ्ख इति । अथवा प्रतीतरूपबाधविमर्शापेक्षयैव यदभेदबोधकं तद् बाधसामानाधिकरण्यम् । एकस्योभयसम्भावनया तदनपेक्षयैवाभेदबोधकमभेदसामानाधिकरण्यमित्यादि दिक् ।

एव चेह न सामानाधिकरण्यवैरूप्यम्, अविशेषेण स्वरूपाभेदविषयत्वात् ॥

अविकारायेत्यादिपद्यानामर्थविचारः ।

एवं कारणत्वोपपादनमुखेन सर्वविधविशेषबाधया सामानाधिकरण्ये(न? ना)द्वितीयं ब्रह्मतत्त्वमुपक्षिप्तम् । अस्यैव च प्रपञ्चो'ऽविकारायेत्यादि । तत्राविकारायेति कार्यादन्यत्वमुच्यते । शुद्धाय मायातीतायेति कारणादन्यत्वम् । अत्र हेतुगर्भविशेषणं नित्याय परमात्मन इति । सदैकरूपरूपायेति त्रिविधभेदात्ययः प्रतिपाद्यते । विष्णव इत्युक्ते

"तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनाद्"

इति निरुक्तिगम्यकारणात्मता मा भूत् स्वभाव इति 'सर्वजिष्णवे' इत्युक्तम् । स्वभावासंस्पृष्टहेतुविकाराय असङ्गायेत्यर्थः । अन्ये तु —

"प्रधानपुरुषव्यक्तकालानां परमं हि यत् ।
पश्यन्ति सूरयः शुद्धं तद् विष्णोः परमं पदम् ॥"
(विष्णुपु० अं० १. अ० २. श्लो० १६)

अविकारादिचतुष्टयेन प्रतिपाद्यते । अर्थाच्च देहाहङ्कारक्षणिकविज्ञानानीश्वर-तद्भिन्नाभिन्नात्मवादा विशेषणपञ्चकेन निरस्ताः । सर्वजिष्णव इति स्वज्ञा-नानाश्यप्रकृतिवाद इत्याहुः ।

यत्तु अविकारायेति तत्पुरुषबहुव्रीहिभ्यां कार्यकारणावस्थादचितः, शुद्धायेति बद्धजीवात्, शुद्धाय नित्यायेति मुक्तात्, परमात्मन इति नित्यमु-क्ताच्च व्यावृत्तिरिति । तन्न । परमात्मन इत्येव सिद्धौ शेषवैयर्थ्यात् । गुणा-नां च परार्थत्वाद् नित्याय शुद्धायेत्यनभिसम्बन्धात् । सदैकरूपरूपायेति न विलक्षणविग्रहवत्त्वमुच्यते । विग्रहवत्त्वे तस्य प्रियाप्रियसंस्पर्शप्रसङ्गादिति । तदेतन्निर्विशेषं ब्रह्मतत्त्वं कारणत्वेनोपलक्ष्यते

"नमो हिरण्यगर्भाय हरये शङ्कराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥"
(विष्णुपु० अं० १. अ० २. श्लो० २)

इति । अत्राकारादिवाच्यहिरण्यगर्भादिव्यष्टिरूपावस्थितमर्धमात्राभिधेयगुणैश्वर्य-समष्टिमयवासुदेवाख्यं कारणरूपम् ।

"सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
सिद्धिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत् ॥
तारः शक्त्यु(त्थ?त्थित)तया निर्दिष्टः सोऽहमर्थकः ।
पूर्वम्"

इत्याचार्यदर्शनात् ।

"अकाराय नमस्तुभ्यमुकाराय नमोऽस्तु ते ।
मकारायार्धमात्राय मात्रातीताय ते नमः ॥"

इति शैवपुराणे दर्शनात् । 'यस्मादुच्चार्यमाण एव गर्भजन्मजरामरणसंसारम-(हद्ध?हाभ)यात् तारयति तस्मादुच्यते तारमि'ति श्रवणाच्च । सोऽहमर्थकमा-

त्रातीतोम्पर्यायतारगम्यस्वरूपसामानाधिकरण्येनोपलक्षणतयाभिधाय तस्य कारणतानिर्वाहाय रूपभेदा उच्यन्ते।

'एकानेकस्वरूपाय' गुणसाम्यवैषम्य(द?व)शात् । 'स्थूलसूक्ष्मात्मने नमः' विशेषाविशेषविकारात्मना । 'अव्यक्तव्यक्तरूपाय' विद्याप्रतिबिम्बमयजीवात्मना । एवं सत्यर्थविशेषोपपत्तेः । 'विष्णवे मुक्तिहेतवे' इति वेदानभिज्ञस्य पौराणिकनाम्ना विशेष्यनिर्देशः । यथाह —

"यज्ञभिर्यज्ञपुरुषो वासुदेवश्च सात्त्वतैः ।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम् ॥"

इति । एवं

"परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज!।
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरम् ॥"
(विष्णुपु० अं० १. अ० २. श्लो० १९)

इति चतूरूपस्य ब्रह्मणः प्रधानव्यक्तपुंरूपाण्युक्त्वा कालरूपमवशिष्टमुच्यते ।

"सर्गस्थितिविनाशानां जगतो यो जगन्मयः "
(विष्णुपु० अं० १. अ० २. श्लो० ४)

भूतादिरूपेण जगन्निरूप्यतया तत्प्राचुर्योपपत्तेः ।

"मूलभूतो नमस्तस्मै विष्णवे परमात्मने"
(विष्णुपु० अं० १. अ० २. श्लो० ४)

कालस्य सर्गादिहेतुत्वं 'ब्रह्मा दक्षादयः कालः', 'विष्णुर्मन्वादयः कालः', 'रुद्रः कालोऽन्तकादिश्चे'त्यादिसिद्धम् । 'आधारभूतं विश्वस्य' प्रधानात्मना । 'अणीयांसमणीयसाम्' अव्यक्तादिविशेषान्तानुप्रवेशितयात्यन्तसूक्ष्मपुरुषरूपम्। 'सर्वभूतस्थं' सर्वभूतात्मनावस्थितमिति व्यक्तरूपम्। 'अच्युतं पुरुषोत्तमं' जगत्यनेकधा च्यवमानेऽपि स्वयं तदवस्थम् ।

"अनादिर्भगवान् कालो नान्तोऽस्य द्विज! विद्यते"
(विष्णुपु० अं० १. अ० २. श्लो० २६)

इति कालरूपमिति चतूरूपमुक्तमेव परमात्मानमनुकृष्य पुराणप्रतिपाद्यस्वरूपपरिशुद्धये तस्य याथात्म्यमुच्यते 'ज्ञानस्वरूपमि'त्यादिनेति युक्तम् । अनुक्त-

समष्टिव्यष्टिजीवरूपविषयत्वे प्रणम्येत्यनुवादायोगात्, स्वनिष्ठनमस्कारवाक्यार्थावसायिवाक्यप्रक्रमवैरूप्यप्रसङ्गाच्च । स्वरूपविषयत्व एव सम्भवति व्यष्टिजीवविशिष्टविषयत्वानवकल्पनाच्च । नहि 'नमो हिरण्यगर्भाये'त्यादेरपि तद्विशिष्टब्रह्मविषयता, येनास्यापि कथञ्चित् कल्प्येत । विना लक्षणामन्यशब्दस्य तद्विशिष्टवृत्त्यनुपपत्तेः । इह च विशिष्टवृत्तित्वे ज्ञानस्वरूपमिति स्वरूपशब्दास्वारस्यात् । 'अर्थस्वरूपेण भ्रान्तिदर्शनतः स्थितमि'त्यनन्वयाच्च निर्विशेषस्वरूपपरत्वावगमात् ॥

ज्ञानस्वरूपमित्यादिपद्यानामर्थः ।

ननु भ्रान्तिदर्शनं सद्वारकमात्मनः, अन्यथा अविद्याभ्रान्तिमत्त्वे तस्य निरवद्यत्वादिश्रुतिविरोधादिति चेत् । तथापि नार्थस्वरूपदर्शनमेव भ्रमः, परमार्थत्वोपगमात् । (केवलार्थस्वरूपदर्शनमेव भ्रमः परमार्थत्वोपगमात्?) केवलार्थस्वरूपदर्शनमिति चेद्, एष ह्यधिकावापो हतकस्य दोषः । किञ्च यदि केवलमित्यर्थदर्शनं विशेष्येत, तत्र ज्ञानात्मना सात्मकत्वानालम्बनं हि न भ्रमः । विपरीतदर्शनस्यैव भ्रमत्वात् । नापि तदनालम्ब्य देवमनुष्यादिरूपार्थदर्शनं, विषयसत्त्वात् । शुक्तित्वाज्ञानपूर्वकमिव रजतज्ञानं सात्मकत्वाज्ञानपूर्वकमर्थाकारज्ञानं भ्रमः स्यादिति चेत् । न । स्वरूपदर्शनबाध्याकारान्तरदर्शनस्यैव भ्रमत्वात् । अन्यथा पृथिव्याद्यात्मकत्वाविज्ञाने सति वृक्षाद्याकारदर्शनं भ्रमः प्रसज्येत । न च तान्त्रिकविवेकिनो देवाद्यर्थाकारस्य सात्मकत्वज्ञानबाध्यत्वमिष्टम् । अथ कैवल्यं विषयविशेषणमुच्येत । तन्न । यथाभवदर्थाकारज्ञानस्य सात्मकत्वाभावाविषयत्वात् । अपिच न तान्त्रिकस्य ज्ञानात्मनो देवाद्यर्थाकारस्य दर्शनं भ्रम इति श(क्व्यं?क्यं) वदितुम् । शरीरिणः शरीरप्रकारकतया प्रकारशब्दप्रत्यययोः प्रकारिपर्यन्तवृत्त्या देवोऽहमित्यादिसामानाधिकरण्यमुख्यत्वोपगमात् । न च ज्ञानैकाकारस्य देवादिभेददर्शनं भ्रमः । तादृश एव तत्प्रकारकत्वोपगमात् । नहि स्वरूपाज्ञानप्रयोज्यं भेददर्शनं, विज्ञातज्ञानैकाकारात्मतत्त्वस्यापि वामदेवादेः 'अहं मनुरभवं सूर्यश्चे'ति भेददर्शनानुवृत्तिश्रवणात् । देवाद्याकारेऽनात्मन्यात्मदर्शनं भ्रम इति चेत् । तथापि प्रस्तुतार्थाकारदर्शनभ्रमत्वे किमायातम् । वास्तवे प्रकारप्रकारिभावे शुक्ल-

पटयोरिव शरीरशरीरिणोरभेददर्शनं भ्रम इति चेत् । न । असदभेदालम्बनत्वायोगात् । न चात्मन्यर्थस्वरूपाभेदस्य प्रागप्रतीतस्यारोपसम्भवः । विविक्तार्थस्वरूपाभेदप्रत्यये च देवोऽहमित्यादिधीः प्रकारप्रकारितालम्बनैव, नाभेदविषया शक्याश्रयितुम् । अन्यथाख्यातिश्चाग्रे निरसिष्यते । तस्माद् निष्केवलज्ञानैकरसपरमार्थस्वभावस्याज्ञानादर्थाकारविवर्तदर्शनं भ्रम इति निर्विशेषात्मैव पुराणप्रतिपाद्यो विवक्षित इति युक्तमुत्पश्यामः । एवं सत्यश्मनो हृदयं नास्तीति निर्जीवाश्माकारदर्शनस्य कथमपि भ्रमत्वायोगेनार्थस्वरूपेणेति जीवविषये सङ्कुचितवृत्तिरकल्पिता भवति । आदिभरतचरिते चार्थमिथ्यात्वं प्रपञ्चितं —

"त्वं राजा शिबिका चेयं वयं वाहाः पुरस्सराः ।
अयं च भवतो लोको न सदेतन्नृपोच्यते ॥"
(विष्णुपु० अं० २. अ० १३. श्लो० ८८)

"शिबिका दारुसङ्घातो रचनास्थितिसंस्थितिः ।
अन्विष्यतां नृपश्रेष्ठ! तद्भेदे शिबिका त्वया ॥
एवं छत्रशलाकानां पृथग्भावो विमृश्यताम् ।
क्व यातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥"
(विष्णुपु० अं० २. अ० १३. श्लो० ९१,९२)

"यत् तु राजेति लोकेऽस्मिन् यच्च राजभटात्मकम् ।
तथान्यच्च नृपत्वं तन्न सत् सङ्कल्पनामयम् ॥"[1]
(विष्णुपु० अं० २. अ० १३. श्लो० ९९)

इत्यादिना । श्रुतिश्च 'यदग्ने रोहितं रूपमि'त्यादिकोदाहृता । न चैवं ब्रह्मणोऽविद्यादिहेयसम्बन्धापत्तिः, निरवद्यनिरञ्जनस्वभावे कल्पनामात्रत्वोपगमात् । अस्य च पुराणपरमतात्पर्यविषयस्य योगयुजा चिन्तयितुमशक्यत्वादुपास्यं कारणरूपं पुनरनुकृप्यते ।

---

१. 'वस्तु राजेति यल्लोके' इति मुद्रितविष्णुपुराणपाठः ।

"विष्णुं प्रसिष्णुं विश्वस्य स्थितिसर्गे तथा प्रभुम् ।
प्रणम्य जगतामीशमजमक्षरमव्ययम् ॥"

(विष्णुपु० अं० १. अ० २. श्लो० ७)

इति । न 'ह्येवम्प्रकार'मिति प्रथमांशोपसंहारे सविशेषपरत्वं, येनात्र निर्विशेषविषयता भज्येतेत्युक्तम् ।

अमुमेव पुराणार्थं प्रत्यस्तमितभेदं वचसामगोचरं सत्तामात्रं कथयामीति प्रतिज्ञाय प्रस्तौति 'परः पराणामि'त्यादिना । इन्द्रियार्थादीनां पराणां हि परमात्मा परमः परः ।

'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यारभ्य,

"अव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥"

इति परान्तरप्रतिषेधात् । स च 'आत्मसंस्थितः' ग्राह्यग्राहकादिभेदशून्यतया स्वमहिमप्रतिष्ठः । 'यत्र नान्यत् पश्यति नान्यच्छृणोति (नान्यद् विजानाति) स भूमा', 'स भगवः ! कस्मिन् प्रतिष्ठितः स्वे महिम्नी'त्यादिश्रुतेः । यदि ह्यन्यत् स्याद्, न शक्यं तस्य दर्शनादि प्रतिषेद्धुम् । अन्यथात्वेन दर्शनादि निषिध्येत, भूम्नैव सात्मकमन्यत् पश्यतीति । न । भूम्ना सात्मकस्यापि स्वरूपान्यत्वानपायात् । नहि तेन निरात्मकत्वमन्यत्वम्, अन्यशब्दस्य भिन्नमात्रवृत्तित्वात् । न च जडाजडस्वरूपाभेद इत्यतो यद् दृश्यते श्रूयते मन्यते विज्ञायते वा नामरूपात्मकं जगत् तत्प्रतिषेधेन भूमात्मा लक्ष्यते इति । अनेन प्रत्यस्तमितभेदत्वमुक्तम् । 'रूपवर्णादी'त्यादिना सर्वविधशब्दप्रवृत्तिनिमित्तशून्यतया वचसामगोचरत्वमुक्तम् । 'अपक्षयविनाशाभ्यामि'त्यादिना भावविकारषट्कप्रत्याख्यानेन सत्तामात्रत्वमुच्यते । 'सदास्ती'ति विशेषणेन जनित्वासत्त्वव्यावृत्तिः । अस्तीति वक्तुं शक्यते । केवलमित्यदूरविप्रकर्षेण श(ब्दः)ब्दा)बोध्यताभिप्रायम् । तस्यैतस्य कारणरूपं योगयुग्ध्येयं वासुदेवनामनिर्वचनव्याजेनोच्यते 'सर्वत्रे'त्यादिना । अत्रैव पुराणपरमतात्पर्यविभ्रमो मा भूदिति 'तद् ब्रह्मे'त्यादिना कारणरूपोपलक्ष्यस्वरूपानुवादेन तस्यैव सर्गाद्युपयोगि चातूरूप्यमभिधीयते 'तदेव सर्वमि'त्यादिनेत्येवं पुराणोपक्रमस्य निर्विशेषपरत्वं सिद्धम् ॥

परमार्थस्त्वमेवैक इत्यादिपद्यार्थः ।

'परमार्थस्त्वमेवैक' इत्यादौ च 'नान्योऽस्ती'त्यद्वितीयत्वमुच्यते । 'एकमेवाद्वितीयमि'ति श्रुत्यर्थप्रत्यभिज्ञानात् । एवं चान्य एकः परमार्थो नास्तीति प्राधान्यांशेन पारमार्थ्यनिषेधोऽन्यस्य न स्वरूपनिषेध इति दुरुक्तम्, एकशब्दानुवृत्तिगौरवात्, परमार्थशब्दस्य धर्मिवृत्तिभङ्गप्रसङ्गात्, तवैवैकत्वं परमार्थो नान्यस्येति धर्मवृत्तिलाभाय त्वमेक इति परमार्थ इति कल्पनापाताच्च । आत्मान्यस्य सर्वस्य स्वरूपनिषेध एव । 'नान्योऽस्ती'ति पुल्लिङ्गं तु सम्पातायातम् । अथ इत्येता(व)द् वानुपंक्ष्यते । यद्येवं किं तर्हीदं जगत् । 'तवैष महिमा' महत्त्वं विजृम्भितं व्यक्तीभावः, येन व्यक्तीभावेनतच्चराचरं व्याप्तं सर्वगतं वर्तते, तव व्यक्तिरेवैतच्चराचरमित्यर्थः । एवं यदेतच्छब्दावेकार्थौ स्यातामित्यतो ब्रह्मणा व्याप्यत्वाभिधानाद् जगतो ब्रह्मशेषत्वनिरासाच्च कृत्स्नशरीरं ब्रह्मैकं स्वप्रधानं परमार्थ इति कल्पना निरस्ता । यत्त्वेवं तवैष भ्रम इत्युच्येतेति । तन्न । वचनव्यक्तिभेदेऽपि विवक्षितार्थसिद्धेरविशेषात् । स किं परिणामः, तथा च न स्वरूपं निषिध्येत । नेत्युच्यते यदेतद् दृश्यते मूर्तं चराचरं तदेतज्ज्ञानात्मनस्तव भ्रान्तिज्ञानेन त्वदालम्बनविपरीतविज्ञानेन जगद्रूपं पश्यन्त्ययोगिनः शास्त्राचार्योपदेशोपायत्वज्ज्ञानविधुरा इति । एवं सत्यधि श्रुतान्वयः स्यात् । जगद्रूपदर्शने को दोषः । ज्ञानस्वरूपं ब्रह्मैव अखिलं जगदिति । सामानाधिकरण्यं व्याख्यातम् । तदिदमबुद्धयोऽर्थस्वरूपं पश्यन्तो मोहसंप्लवे भ्राम्यन्ति संसारावर्ते नातिवर्तन्त इति । अत एवापौनरुक्त्यम् । एवञ्च न प्रकृतविषयताहानिः । अखिलं जगदिति च विना हेतुं न सङ्कुचितवृत्ति स्यात् । अन्यत्र तु 'मोहितं नाभिजानाती'ति चेतनधर्मोपादानं सङ्कोचहेतुः । अर्थशब्दश्च देवमनुष्यादिविषये न सङ्कुचितः स्यात् । 'ये तु ज्ञानविदः' शास्त्राचार्योपदेशलब्धत्वज्ज्ञानाः ते किं जगदाकारमपि पश्यन्त एव ज्ञानात्मना सात्मकं पश्यन्ति । न । त्वद्रूपं जगदाकारबाधेन तव यद् ज्ञानैकरस्यं तदेव पश्यन्तीति । अन्यथा ज्ञानात्मकं त्वद्रूपमित्यनयोरनतिप्रयोजनत्वात् । यत्तु जगतः पते! परमेश्वर! इत्याद्यनाज्ञस्यमिति । तत् तुच्छम् । प्रस्तुतदृशा तत्त्वदृशा च सर्वोपपत्तेः । ब्रह्म हि स्वतो निर्विशेषमेव प्रकृतिभूयं गतं तदुपहितमर्यादं सर्व(ज्ञा ? ज्ञत्वा)दिगुणमीश्वर इति गीयते । तस्य च समस्तकल्याणगुणात्मकस्य स्वभावेन कल्पनया च स्तुतिरुपपन्ना तव त्वमि-

त्यादिसम्मुखीकरणं च । तत्त्वदृशामपि व्यवहारे लोकसामान्यादीश्वरस्तुत्याद्यविरोधात् । अन्यथा परस्यापि ज्ञानैकाकारात्मदर्शिनां तवत्वमित्यादिव्यपदेशासङ्गत्यात् । न चेह सविशेषोपक्रमोऽस्तीत्युक्तम् ॥

ज्ञानस्वरूप इत्यादिपद्यैकादशकार्थः ।

यद्यपि 'ज्ञानस्वरूपो भगवानि'त्यत प्राग् भुवनकोशः प्रपञ्चितः, सर्गप्रसङ्गेन भुवनसंस्थानस्य पृष्टत्वात् । किन्तु तत्प्रपञ्चानुसन्धाने जिज्ञासितज्ञेयब्रह्मप्रस्मारिकातिप्रसक्तिर्मा भूदिति भुवनमयतां ब्रह्मणो याथात्म्यं च भुवनबाधावधिभूतं वक्ष्यामीति 'संक्षिप्य श्रूयतां पुनरि'ति प्रतिज्ञायते। ततो भ्रान्तस्य भ्रान्तिपरिष्कारवैयर्थ्यमित्यपास्तम् । भुवनकोशस्वरूपजिज्ञासाशमनेन तस्य ब्रह्मपरिशेषयाथात्म्यबोधनोपयोगित्वात् । तत्र 'यदम्बु वैष्णवः कायः' इति मन्दयोगिनो वैराजं रूप(म ? मु)पास्यतयोपक्षिप्य 'ज्योतींषि विष्णुरि'ति समष्टिव्यष्टिभ्यां विश्वस्य तादृप्ये निरूपिते शरीरात्मभावेन सामानाधिकरण्यनिरासाज्जडाजडरूपाभेदासम्भवाच्च तदयोगो मा शङ्कीति 'मायामात्रमिदं द्वैतम्', 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुत्या तद्विवर्ततामाह 'ज्ञानस्वरूप' इति । यतो ज्ञानैकरसो वस्तुभूतो भगवानात्मा, न त्वशेषमूर्तिर्वस्तुभूतः । अथवा ज्ञानैकरसः सन्नेवाशेषमूर्तिः, न तु तदवस्थाहानेन वस्त्वात्मना परिणतः । ततः शैलादिभेदा विपरी(नानि ? त)ज्ञानात्मनो विजृम्भणानि, विवर्ता इत्यर्थः । एवमुपात्ताक्षरानुगुण्याच्च वाक्यान्तरालोचनया देवादिवैविध्यज्ञानहेतुकर्ममूला इति क्लिष्टार्थकल्पना युक्ता । न च ब्रह्मणः कर्मसम्भवः । जीवस्तु न प्रकृतः । न हि 'यदस्ति यन्नास्ती'ति चेतनाचेतनविषयम्, अप्रसिद्धेः । प्रसिद्धं तु भावाभावविषयम् । न च ज्ञानस्वरूप इत्यादावाहत्य प्रकृतब्रह्मविषयता सम्भवन्ती हातव्या । प्रकृतिविवेकेन जीवैकात्म्यं ह्यादिभरताख्यानप्रतिपाद्यम् । न च तस्यायं संक्षेपः । 'संक्षिप्य श्रूयतां पुनरि'त्युक्तसंक्षेपो ह्याञ्जसो गम्यते । न च जीवस्याशेषमूर्तित्वमाञ्जसमुपपद्यते । तथाच ज्ञानस्वरूपत्वं देवादिवस्तुभावनिषेधश्च विशेषणस्य क्षेत्रज्ञस्य, अशेषमूर्तित्वं तु विशेष्यस्य ब्रह्मण इति वाक्यार्थवैरूप्यप्रसङ्ग इति । कुतः पुनरमी भेदा न वस्तुभूताः, बाधादित्याह । 'यदा तु शुद्धमि'त्यादि । अत्र सर्वकर्मक्षये ज्ञानं निजरू-

पीति विशेषणाज्जीवकर्ममृत्याः शैलादिभेदा इति पूर्वश्लोकार्थो न विज्ञातव्यः। प्राथमिकानुपजातविरोधित्वारसिकार्थानुरोधेनानन्तरस्योपक्रमन्यायनेयत्वात्। एवं च प्रतिबन्धकर्मक्षयेऽपास्तसंशयत्वादिदोषं शुद्धमविशेषालम्बनमात्मस्वरूपावद्योति शास्त्रीयं ब्रह्मात्मापरोक्षज्ञानं यदा, तदा वस्तुषु 'यत्र त्वस्य सर्वमात्मैवाभूदि'त्यात्मवस्तुभूतेषु मनःकल्पनामया वस्तुन आत्मनो भेदाः शैलादिरूपा न भवन्ति, बाधितत्वादिति। अथवा 'तस्य तावदेव चिरं', 'भूयश्चान्ते विश्वमायानिवृत्तिरि'ति सहाभ्यंधेन सर्वकर्मक्षये तत्त्वज्ञानेनापास्ताविद्यादिदोषं शुद्धमविशेषं स्वभावावभासं ज्ञानं यदा, तदा वस्तुभूतेषु वस्तुभेदकल्पना न भवन्तीति निरन्वयबाध उक्तो भवति। एवं च सङ्कल्पतरोः फल्यानि एकीकृत्यात्मकल्पनामूलकर्मफलभूता इति क्लिष्टार्थकल्पना न क्लिष्टा। 'सङ्कल्पः कर्म मानसमि'ति प्रसिद्धेः। आविद्यकस्यापि भेदस्य विकल्पावभासो हि मनःकल्पनैवेति। अथवा अविद्यैव सम्यगात्मभेदेन वा कल्पनात् सङ्कल्पः, तस्य कार्यभूता भेदा इति। नैवमपि कर्मणि लक्षणा न भवति।

युक्त्यापि जगतो बाध्यत्वमुच्यते 'वस्त्वस्ति किमि'त्यादिश्लोकद्वयेन। कुत्रचिद् ब्रह्मणोऽन्यत्रेति निर्धारणे। सततैकरूपं हि वस्तु। तत् किं, कुत्रचिदस्ति। नास्त्येव। हन्तैवं ब्रह्मणोऽपि जगद्रूपापत्त्या सततैकरूपत्वाभावादवस्तुत्वं प्राप्तम्। न। यद्धि मृद्रज्ज्वादिकमन्यथात्वं घटशरावाहिधारादिभावं याति, तन्न तथा घटसर्पादिप्रकारम्। कुतो हि तस्य तत्त्वं घटादिभावः, न कुतश्चित्। 'मृत्तिकेत्येव सत्यमि'ति हि श्रुतिः। अन्यथा घटादिभावे तात्त्विके मृद्रूपापायापत्त्या मृद् घट इत्यप्रत्ययापत्तेः, सर्पादिबाधाभावप्रसङ्गाच्च। एवं ब्रह्मणोऽपि न जगद्भावः, 'ऐतदात्म्यमिदं सर्वं तत् सत्यमि'त्यादिश्रुतेरिति भावः। अनुवर्तमाने व्यावर्तमानाकारस्यावस्तुत्वमुदाहरति। मही घटत्वं याति। घटतो घटभावात् प्रच्युत्य कपालिका भवति। यथायोगं क्रियान्वयः,

"यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा"

इत्यादिवत्। कपालिका भूत्वा चूर्णरजो भवति। ततो दुर्दर्शोऽणुः। एवं स्वकीयपराज्ञानहेतुकर्मप्रतिबद्धात्मयाथात्म्यनिश्चयैरालक्ष्यते। अत्रैवं सति किं

१. 'स्तुतत्त्वम्' क. पाठः.

वस्तु, न किञ्चित् । व्यावृत्त्या चावस्तुत्वमनुमास्यते । अथवा सततैकरूप्याभावेऽपि कुतोऽवस्तुत्वम्, अन्यथान्यथा भवतः स्वप्नविकल्पादेरवस्तुत्वदर्शनादित्याह 'यच्चान्यथात्वमि'ति । अन्यथाभावमुदाहरति 'महीति' । घटत इति तत इति च प्रथमार्थे तसिः । अत्र पक्षे कादाचित्कत्वादवस्तुत्वमनुमेयं मन्यते ।

जगदुपलब्धिप्रकारेणापि वस्तुभेदानां परिणामित्वं नास्तिशब्दाभिधेयतानिमित्तमुपपाद्यते श्लोकद्वयेनेति परकीयव्याख्यानं तु प्रत्याख्येयम् । घटादयो हि न कपालादिपरिणामिनः । उत्तरोत्तरावस्थाप्राप्त्या पूर्वपूर्वावस्थां जहातीति स्वोक्तिविरोधात् । नापि मृदेव, मृद्रूपापायप्रसङ्गात् । नह्यप्रच्युतस्वभावस्यैवान्यथाभावः परिणामः । रजतादेरशुक्त्यादिपरिणामत्वात् । यद्युच्येत — पिण्डावस्थाया मृदो घटावस्था परिणामः, घटाद्यवस्थायाश्च कपालाद्यवस्थेति, तर्हि मृद एव परिणामित्वाद् नास्तिशब्दाभिधेयतापद्येत । एवं ब्रह्मणोऽपि । तथा च 'मृत्तिकेत्येव सत्यं', 'तत् सत्यमि'त्यादिविरोध इति । निदर्शितमर्थं निगमयति 'तस्मादि'त्यादिना । क्वचित् कदाचिद् न किञ्चिदस्तीति 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं', 'तस्मिल्लोकाः श्रिताः सर्वे' इत्याद्यवगताश्रयेऽपि त्रैकालिकनिषेधाद् बाधो गम्यते । न ह्यत्र नास्तिशब्दाभिधेयत्वं प्रकृतं येन निगम्येत । किन्तु भावाभावात्मकस्य सर्वस्य ब्रह्मात्मतैवेति । किमेवमलीकमेव जगत्, तथा च न प्रतिभासेत । न । विज्ञानमेकमेव निजमाजानसिद्धं कर्म विज्ञेयमविद्याख्यम् । तस्य भेदैर्विशेषावस्थानैरनेकविकल्पानि चित्तानि ज्ञानानि । तैर्विभ्रमैरनिरूपितगगनपवनादिरूपेण विकल्पितम् । अतो नात्यन्तमसदेव जगदिति । अथवा विज्ञानमृते नास्ति किञ्चिद् वस्तुजातम् । किन्तु विज्ञानमेव सर्वमिति प्रस्तुतसर्वात्मतोपसंहारः । तर्हि कथमिष्टमनिष्टं च । विज्ञानमेकमपि निजैरनादिप्रसूतभोगोपपादककर्मभेदैरविद्यावष्टम्भैरनेकधा भिन्नचित्तैरिष्टानिष्टादिभेदेनाभ्युपेतम् ।

"मनसः परिणामोऽयं सुखदुःखादिलक्षणः"

इति ह्याह । अत्र परमते विज्ञानमेकमिति च क्लिष्टम् । परमात्मा पुनरेकत्वात

सदैकरूपत्वाच्चाबाध्यं तत्त्वमित्याह 'ज्ञानं विशुद्धमि'त्यादिना। विशुद्धिरनञ्जनत्वम्। अविद्याकामकर्माणि मलाः। तत्कार्यं शोको भोगहेतुकहर्षविषादादिः गर्द्धोऽभिनन्दो लोभः। आदिपदाद् द्वेषादिग्रहः। 'स वासुदेव' इति कारणात्मनोपलक्ष्यते। अन्ये तु — निर्विषयत्वमसंशयादित्वमहङ्काराद्यशेषदोषातीतत्वं च विषयज्ञानव्यावृत्तये विशेषणमित्याहुः। 'एकं सदैकं न यतोऽन्यदस्ती'ति सजातीयस्वगतविजातीयभेदाः प्रतिषिध्यन्ते। ज्ञानसत्यत्वमन्यमिथ्यात्वं च स्वभाववाद इति निगम्यते 'सद्भाव एषो भवतः' इति। मुख्योपाभाव आर्षः। सद्भाव एवमिति वा पाठः। यथा ज्ञानं सत्यं सदैकरूपतया अबाधेन, यथा चान्यदसत्यं व्यभिचारितया बाधेन, तथा सद्भाव उक्तः। एतच्च ज्ञानात्मतत्त्वं यत् सत् संव्यवहारं भूतं प्राप्तम्। तत्रापि जगद्विषये वक्तव्यं भुवनाश्रितं भूरादिप्रमाणसंस्थानादिकमुक्तम्। भुवनाश्रितमाचिन्मिश्रं भोगस्थानगतमिति तु व्यवधानादपहेयम्। व्यावहारिकमेव जगदाश्रित्य तत्र तत्र प्रपञ्चितसाध्यसाधनविभागं सङ्गृह्याह —

"यज्ञः पशुर्वह्निरशेष ऋत्विक् *सोमः सुराः स्वर्गमयश्च कामः।
इत्यादि कर्माश्रितमार्गदृष्टं भूरादिलोकाश्च फलानि तेषाम्॥"

इत्यादीत्यादिशब्देनान्यस्यापि विहितस्य निषिद्धस्य च सङ्ग्रहः। भूरादीत्यादिशब्देनान्यस्यापीष्टस्यानिष्टस्य च सङ्ग्रहः। एवं जगदात्मस्वरूपनिरूपणफलमुच्यते—

"इत्येतद् भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि [1]तत्र कर्मवश्यः।
ज्ञात्वैतद् ध्रुवमचलं सदैकरूपं तत् कुर्याद् व्रजति हि येन वासुदेवम्॥"

इति। एवमर्थस्वरसानि वचनानि न क्लेशेनास्तिनास्तिशब्दवृत्तिनिमित्तपराणि नेयानि। तथा च 'यन्नास्ति', 'न तु वस्तुभूतः', 'किमत्र वस्तु', 'विज्ञानमृते नास्ति किञ्चिद्', 'न यतोऽन्यदस्ति', 'असत्यमन्यदि'त्यादेर्नास्तिशब्दाभिधेयत्वपरतया व्याख्यानमौत्प्रेक्षिकसमयाचाराजीवदासानामेव शोभते न प्रमाणमनुसरतां, सामर्थ्येन बाध्यताबोधित्वात्। प्रतिपन्नोपाधिविषयनिषेधस्य सत्यवस्तुपर्यु-

---

१. 'दि। वि' ख. पाठः.

---

* 'संवत्सराः', § 'हि कर्मवश्य एकः' इति मुद्रितविष्णुपुराणपाठः.।

दासस्य च बाध्यतामनाक्षिप्यापर्यवसानात् । कादाचित्कत्वे नास्त्यसत्यशब्दासामर्थ्यात् । सामानाधिकरण्यं च बाधार्थमवेदितम् । यत्तु इतरस्य स्वरूपबाधे अशेषमूर्तित्वविधेर्नित्यत्वाक्षयत्ववचनस्य च विरोध इति । तन्न । अशेषमूर्तिरिति हि 'ज्योतींषि विष्णुरि'त्यादिसामानाधिकरण्योपपादनाय विवर्तत्वविधिशेष इत्युक्तम् । नित्यस्याक्षयस्य च नास्तिशब्दार्हतापि हि विरुध्यते। कारणात्मनो स्वात्मना चोभयाविरोधश्चेद्, ममाप्यनादिवृत्त्या सन्तन्यमानतया ज्ञानात्मपरिशेषतया चोभयाविरोध इति तुल्यम् । असद्वचावृत्तप्रतिभासानुबन्धितया च वस्तुत्वनिगदः । न च 'अनाशी परमार्थश्चे'ति ज्ञापकादपारमार्थ्येऽसत्त्वे निबन्धनमनित्यत्वमिति युक्तम् । 'परमार्थो न साधनमि'त्युक्त्या साधनत्वमेवासत्यतानिबन्धनमित्यापत्तेः । एवं प्रकरणस्य निर्विशेषपरत्वेऽपि भगवत्परमेशवासुदेवशब्दास्तदुपलक्षणकारणात्मविषया उपपत्स्यन्त इति ॥

आत्माभेदः ।

एवमात्मनानात्वमाक्षिप्य तदभेदो विधीयते 'यद्यन्योऽस्ती'त्यादिना । कथं हि प्रकाराद्वैतमेव विधीयेत यद्यात्मभेदः प्रमाण्येत, भवाप्ययययोरात्मबहुत्वाज्ञानं तावदौपाधिकभेदविषयम्, 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती'ति लिङ्गात् । तवाप्यात्रह्मादेरचिदनुपक्षसम्प्रतिपत्तेः । 'तदापीतेः संसारव्यपदेशात्' (ब्र० ४. २. ८) इति न्यायात् ॥

नित्यो नित्यानामितिश्रुत्यर्थः ।

'नित्यो नित्यानामि'ति च न जीवविषयं, 'चेतनश्चेतनानामि'त्येव तत्सिद्धेः । अपि च 'तं देवा ज्योतिषां ज्योतिः'

"पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्"

इत्यादिवदत्र विशेषो वाच्यः । न हि निर्धारणे षष्ठी नित्यो नित्यानामिति, 'एको बहूनामि'ति समभिव्याहृतवैरूप्यापत्तेः । किन्त्वपेक्षायाम् । तथा चाचित्संसृष्टानामेव भिन्नानां जीवानामापवर्गिकज्ञानात्यन्तदौर्लभ्यादौत्सर्गिकनित्यत्ववा

---

१. 'ना सा चो', २. 'थं प्र' ख. पाठः.

दोषपत्तिः । तत्प्राये हि तद्वादा भवन्ति यथा 'अनन्तं नभ' इति, 'आकाशवत् सर्वगतश्च नित्यः' इति चोपमीयते । ब्रह्मणश्चानवधिकं नित्यत्वं, 'सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमि'त्यैकार्थ्योपपत्तेश्च । प्राञ्चस्तु अनित्यानामिति छिन्दन्ति । निष्फले च जीवभेदे ब्रह्मपरवाक्यतात्पर्ययोगाच्च ।

सितनीलादिवैचित्र्यमिव नाकस्यैकस्यैवात्मनो नानासुखादिवैचित्र्यं यौपाधिकमुपपद्यते । उपाधिव्यवस्थया च प्रमातृभेदविभ्रमनिबन्धना तदनुसन्धानादिव्यवस्था च । एकस्यैव जीवस्य जन्मभेदे तत्तद्देहतादात्म्यविभ्रमविच्छेदे जन्मान्तरीयाननुसन्धानदर्शनात् । तथा च सूत्रम् 'असन्ततेश्चाव्यतिकरः' (ब्र० २. ३. ४९) इति । भोगस्य परोपाधिकत्वादौपाधिकस्य चात्मनः कर्तृत्वे भोक्तृत्वे च व्यवस्थैवेत्यर्थः । प्रमातृभेदविभ्रमात् तु पादाद्यवच्छेदवृत्तिसुखाद्यनुसन्धानमिति विशेषः ॥

बद्धमुक्तादिव्यवस्था ।

यत्तु बद्धमुक्तव्यवस्थानुपपत्तिरात्मैकत्व इति । तन्न । अविद्ययाचिदात्माभिनिवेशी बद्धः, विद्यया निष्केवलो मुक्त इति व्यवस्थोपपत्तेः । अन्यो बद्धो मुक्तोऽन्य इति व्यवस्था न स्यादिति चेत् । कस्य पुनरपेक्षयैषा न स्यादिति । मुक्तो हि स्वमहिमप्रतिष्ठश्चितिमात्रो न बद्धं मुक्तं वा बुध्यते । अन्यस्य पुनरविद्ययैव सा च व्यवस्था स्यादन्या च, विभ्रममयत्वात् । किं पुन(रे?)रतः, मा मोचि कश्चित् । किमतो भोः! । 'तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथर्षीणां तथा मनुष्याणाम्'

"बहवो ज्ञानतपसा पूता मद्भावमागताः"
"ततो मुक्तिमवाप परमां द्विज!"

इत्यादिविरोधः । न । सर्वस्यैव नित्यमुक्तस्वभावत्वात् । मुक्त एव स्वभावादविद्यैव मुच्येयेति साधनानुष्ठाने वर्तते । लब्धविद्यस्तु मुच्यत इत्येतावद् ब्रूते 'तद् य' इत्यादि । तावतैव प्रयोजितः प्रवर्त्स्यतीति । न पुनः स एव तदभवद् नान्य इति प्रतिवक्तव्यमिति, फलाभावात् । अन्यथा बद्धमुक्तान्यत्वे वास्तवे ब्रह्मणोऽपि स्यादन्यत्वमिति तद्भाववचनं 'स एव तदभवदि'ति विरुध्येत । न हि स्वभावादेव प्रागतद्भूतो नष्टः स्थितो वा तद् भवति । तेन

सात्मकत्वं तु सदातनं न बोधापेक्षम् । तदभवत् तदात्मकोऽभिव्यक्तोऽभवदिति चात्यन्तविप्रकर्षः । अस्माकं पुनरबोधादतद्भूतो बोधापेक्षया तदभवदिति युक्ता वाचोयुक्तिः । प्रवर्त्यबुद्ध्यनुरोधेन देवदर्प्यादिबद्धमुक्तभेदार्थवादस्याज्ञातविषयत्वेऽपि रुद्ररोदनादिवादवदतात्पर्योपपत्तेः । एतेन स्मृतिरपि व्याख्याता । अथ कस्यचिद् विद्यया अविद्याबाधे नेदानीं बद्धः स्यादिति चेत् । न । स्वरूपकैवल्यातिरिक्ताविद्याबाधाभावात् । तस्यैवानाद्यविद्याकल्पनया जीवभावेन बद्धत्वोपगमात् । न चैवं विद्यावैयर्थ्यं, निद्रयैव नवग्रहहस्तिभावाभिनिवेशेन शोचतः सम्राजः प्रबोधवदविद्ययैव जीवभावाभिनिवेशेन शोचत आत्मनो विद्यायाः स्वरूपप्रतिष्ठार्थत्वात् । किमेवं सत्यनादिसिद्धा जीवा बहवस्तदुपाधयोऽविद्याश्च । यथा तत्र भवान् मन्यते भवतो यदि किञ्चित् तदध्यवसायेन स्यात् । वयं तु तदेकत्वानेकत्वे न प्रसह्य वक्तुं प्रभवामः, सर्वस्य कल्पनामात्रत्वोपगमात् । अत एवामुक्तस्याविद्योपपादितजीवेशविभागनिर्व्यूढप्रपञ्चप्रतिभासोऽपि ॥

ब्राह्मेणेत्यादित्रिसूत्री ।

अत एव मुक्तश्चितितन्मात्रब्रह्मैव कल्पनया सर्वज्ञादिमयमिति वास्तवस्वरूपप्रतिष्ठामवस्थाप्यैव 'एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः' (ब्र० ४. ४. ७) इति ब्राह्मरूपोपन्यासाद्यविरोधसूत्रमुपपन्नम् । अन्यथा ब्राह्मरूपस्यापि स्वाभाविकत्वे विरोधाभावेन 'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः', 'चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः' (ब्र० ४. ४. ५, ६) इति पक्षविकल्पानुपपत्तेः । न हि प्रकाशत्वव्यावृत्तिर्जैमिनिपक्षः । 'आह च तन्मात्रम्' (ब्र० ३. २. १६) इति स्वप्रकाशस्यापि श्रुतिवशादस्वातन्त्र्यनिर्गुणत्वव्याप्तिभङ्गेन ब्रह्मणोऽपहतपाप्मत्वादिगुणकत्वस्य तदवस्थितत्वात् । औडुलोमेस्तु 'तदात्मकत्वादि'ति वदतो गुणविशिष्टानात्मकत्वमिष्टम् । तथापि कथञ्चिदपहतपाप्मत्वादेरुपपाद्यत्वाद् न विरोधः । तथा च विरोधभ्रम इति वा कल्प्येत । एवमपी'ति चितितन्मात्रतावस्थापनेन विरोधसमाधानं वा नावकल्पेत । मुक्तापहतपाप्मत्वादिगुणान्यत्वे सति ब्राह्मेणेत्यनाङ्गस्याच्चेति ।

केचित् तु शुकादयोऽपि न मुक्ता इति संसारोपलब्धिं समर्थयन्ते । अन्ये तु अविद्याभेदं प्रपञ्चभेदं चोक्त्वा बद्धमुक्तव्यवस्थामाहुः । अपरे तु साधारणमीशप्रपञ्चमसाधारणांश्च जीवभेदप्रपञ्चभेदानाश्रित्य तत्तत्प्रपञ्चविलयेऽपि साधारणप्रपञ्चोपलब्धिरिति निर्वहन्ति ॥

ऐकात्म्यविदोऽप्युपदेष्टृत्वम् ।

यत् तूपदेशानुपपत्तिः, तत्त्वज्ञस्य सर्वबाधोपगमादिति । तन्न । तत्त्वज्ञस्यापि यावदारब्धं व्यवहारे लोकसामान्योपगमात् । आरब्धकर्मप्रतिबन्धादेवोपदेशसमये सन्तन्यमानस्यापि स्वरूपतत्त्वावभासस्य भेदप्रतिभासमात्राविरोधित्वात्, तावतैवोपदेशोपपत्तेश्च । न चाविद्याबाधेऽपि तदुपादानारब्धकर्मानुपपत्तिरित्युक्तम् । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदि'ति च न भेददर्शननिषेधश्चोद्यते । केन कमित्याक्षेपस्य कारकभेदविषयत्वात् । यद्यपि कारकभेदनिषेधः सार्वदिकोऽपि विद्याविषय तत्काल इव निर्दिश्यते । स्वरूपावभासपरिशेषात् । तत्र भेददर्शनक्रियानिषेधोऽर्थसिद्धः । यथाहुः —

"ऐकात्म्यमात्रकूटस्थप्रबोधावसितेः कुतः ।
मातृमानक्रियामेयव्यवहारस्य सम्भवः ॥"

इति । तथापि 'तस्य तावदेव चिरमि'ति विशेषणादारब्धभोगस्य च भेददर्शनसाध्यत्वादात्मापरोक्षवतोऽपि भेददर्शनानुभवाच्च नात्यन्तिकतदभावो गमनीयः । भेदस्वरूपबाधेन स्वात्मसत्तावभासपरिशेषेऽपि, भोगमात्रोपयोगिभेदाभासदर्शनस्य कालपरिवासामृष्टलेख्यविशेषसन्निवेशभित्तिस्वरूपावभासे सत्येव दृष्टचरलेख्यलाञ्छनाभासदर्शनस्येवोल्लोलबहुलकल्लोलमालिनि गुरुतरभारनिभृतपोतवदुन्मज्जननिमज्जनमिवानुभवतोऽभ्युपगमे बाधकाभावात् । यद्यपि 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि'(ब्र० सू० ४. ४. १६) इत्यत्र सम्पत्तिर्न मरणम्, अप्रसिद्धेः । स्वाप्ययेत्येव सिद्धेश्च । किन्त्वभेदेन सम्यग्गतिर्ब्रह्मात्मतापरिशेषकैवल्यं, परिशेषात् । 'अथ सम्पत्स्ये' इत्यादिप्रसिद्धेश्च । 'वाङ् मनसि सम्पद्यत' इत्यादावप्यभेदापत्तिरेव । परन्तु पुनरुत्क्रमणश्रवणात् सा गौणी । न चेह गौणत्वे हेतुरस्ति । 'सर्व ह सर्वः पश्यती'त्यस्य च ब्रह्मवि-

---

१. 'वे' क. पाठः.

ज्ञानेन सर्वविज्ञानदिशा व्याख्येयत्वात् । तदपेक्षं च विशेषविज्ञानाभाववचनमित्याविष्कृतम् । 'यत्र त्वस्य सर्वमात्मैवाभूदि'तीति व्यवस्थितम्, तथापि

"कदाचिद् व्यवहारे तु द्वैतं यद्यपि पश्यति ।
चिदात्मव्यतिरेकेण न पश्यति चिदन्वयात् ॥
किन्तु पश्यति मिथ्येति दिङ्मोहेन्दुविभागवत् ।"

इत्यभियुक्तोक्तेस्तदारब्धवासनापेक्षया निरिन्धनज्योतिरिव प्रशान्तमात्मकैवल्यमभिप्रेत्येति निगद्यते, अन्यथा जीवन्मुक्तिविरोधात् ॥

जीवन्मुक्तिः ।

यत्तु संसरतो हि जीवत्वं तदवस्थस्य च मुक्तिरिति विरुद्धमिति । तदसत् । 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे', 'ब्रह्म वेद ब्रह्मैव भवती'ति ज्ञानसमकालमुक्त्यवगमाद्, यावदारब्धभोगं च वासनामात्रेण प्राणधारणादिसकलव्यवहारोपगमात् ।

एवञ्च आत्मतत्त्वमनुसन्दधत एव संव्यवहारवदुपदेश उपपद्यते । अन्यथा तान्त्रिकदेशिकस्यापि ज्ञानैकाकारमात्मानमनुसन्दधतो मनुष्यादिभेदविभ्रमावभासायोगेनोपदेशानुपपत्तेः । अन्ये तु ज्ञानसमकालमुक्तस्य भेदप्रतिभाससंव्यवहाराभावेऽपि परपरिकल्पितमुपदेष्टृत्वं तत्त्वज्ञानहेतुरित्याहुः । अपरे तु शास्त्राभ्यासपाटवेन परोक्षनिश्चयादुपदेष्टृत्वं धर्मादाविव, तत्रापरोक्षस्यानपेक्ष्यत्वादिति वदन्ति ।

एतेन भगवतोऽर्जुनं प्रत्युपदेशो व्याख्यातः । सर्वज्ञतत्त्वज्ञानं हि नाज्ञानबाधकमित्युक्तम् । न चैवमपि सर्वस्याविद्यकत्वज्ञाने मरीचिनीरस्येव व्यवहारानर्हत्वविज्ञानादुपदेशायोग इति वाच्यम् । भ्रमादवसीदतो जीवस्य दिङ्मूढस्येव तदाविद्यकत्ववेदनायोपदेशाविरोधात् । यत्तु नानुन्मत्तः स्वाभेदावगतायादर्शादाविवात्मप्रतिबिम्बाय जीवाय किमप्युपदिशेदिति । तन्न । उपदेशस्योपदेश्यभेदबुद्ध्यनुरोधित्वादादर्शादावात्मप्रतिबिम्बाय तु नोपदिश्यते । तस्योपदेशग्रहणाशक्तिविज्ञानात् । न तथा जीवस्य चेतनस्येत्युपदेशाविरोधात् । अन्यथा तवापि पाणिचरणायेव स्वप्रतीकावगतायोपदेशाविरोधात् । न च जीवभेदनिषेधो देवाद्याकारभेदविषयः । तथापि स्वरूपभेदे मानाभावादौपाधिक-

---

१. 'ऽधावसाना' ख. पाठः.

भेदनिषेधतस्य स्वरूपाभेदपर्यवसानात् । न च प्राकरणिकमहं त्वमित्यादि विविक्तात्मविषयमेव, व्यावर्तकाभावे व्यावर्त्यनिर्देशानुपपत्तेः । स्वयम्प्रकाशत्वनित्यत्वाणुत्वप्रत्यक्त्वपराक्त्वादीनि सर्वात्मसाधारणानि न व्यावर्तकानि । व्यावर्तकदेवाद्याकारस्तु नात्मन्यस्तीति स्वयमेवोक्तम् । एवञ्च आत्मन्येकशब्द आकारैक्ये जातावेकवचनम् । आकारभेदविषयश्चान्यत्वाक्षेप इत्यादि न कुकाव्यमिव क्लिष्टार्थं कल्पनीयम् । यत्तु 'यद्यन्योऽस्ति परः कोऽपि', 'एषोऽहमयं चान्यः' इत्यत्रैकेनैव पदेन स्वरूपप्रतिपत्तौ पदान्तरस्याकारपरतावश्यम्भाव[1] इति । सत्यम् । एवं रूपतः प्रकारतश्च भेदनिषेधसम्प्रतिपत्तेः । नहि 'परः कोऽपी'त्यनुवादः । बोध्यस्य शुद्धात्मभेदाप्रसिद्धेः । तत्प्रसिद्धभेदस्य चाकारभेदनिषेधायोगात् । अत एवाहमयं चेति न भेदेनात्मानमनूद्य तत्प्रकारभेदमात्रस्य दुर्वचत्वमुच्यते । यद्यपि को भवानिति प्रश्नो राज्ञो भिन्नदशो देवादिभेदविषयः, तथापि तत्त्वदृशा भगवतेनात्मैकत्वमुपपाद्य रूपतः प्रकारतश्च व्यावर्त्यवचनमनर्थकमित्युच्यते को भवान् सोऽहमित्येतद् वचो विफलमिति । एवमेकवचनैकशब्दस्यान्यस्यात् । नहि स्वरूपभेदे सत्येव बाह्याभ्यन्तरभेदकाभावादेकमयमित्यैक्यप्राचुर्यमुच्यते । भेदकाभावे स्वरूपभेदासिद्धेः । एकशब्दस्य भावे क्लिष्टत्वात् । 'आत्मपरदेहेष्वि'ति च बोध्यदृशेत्युक्तम् । 'सतोऽप्येकमयमि'ति चोपपादितार्थम् । एवं सिद्धे स्वरूपाभेदे 'द्वैतिनोऽतथ्यदर्शिनः' इति न देवादिभेदविषयम् । सामान्यवृत्तेः । नहि 'पण्डिताः समदर्शिनः' इति सद्ब्राह्मणश्वादिषु सामान्यदर्शनं विधीयते । प्रत्यवायात् । नहि ब्राह्मणादिशब्दाः केवलात्मविषयाः, येनाकारैक्यदर्शनं समदर्शनमिष्येत । सप्तम्यधिकरणे न विषय इति चेद्, अस्तु तावत् । समशब्दो विशेष्यमाकाङ्क्षेत् । तस्मादुत्कर्षापकर्षदोषहीनं समं ब्रह्म । तद्दर्शिन एव समदर्शिन उच्यन्ते । तदेव च तत्त्वद(र्शि ः र्श)नमिति । यत्तु 'द्वैतिनोऽतथ्यदर्शिन' इति सर्वद्वैतविषयत्वे पिण्डात्माद्वैतमपि स्यादिति । तन्न । सर्वद्वैतबाधोपयोगितया पिण्डात्मविवेचनेन तदभेदस्यानापाद्यत्वात् । तव देवाद्याकारदर्शनस्यातथ्यदर्शनत्वानुपपत्तेरुक्तत्वाच्च । यद्वा ऐकात्म्यस्य प्रस्तुतत्वादात्मद्वैतदर्शनमेवातथ्यदर्शनमुच्यते । एवञ्च बहुषु बहुवचनमेकस्मिन्नेकवचनं प्रकृत्यभिधेयान्वितस्वार्थस्वरसमवति-

---

१. 'स्य' ख. पाठः.

ष्टते । अत एवात्मनानात्वमौपाधिकं भ्रान्तिसिद्धमिति चोच्यते 'वेणुरन्ध्रविभेदेन', 'एकस्य रूपभेदश्च', 'सितनीलादिभेदेन' इति च । यत्त्वत्रैकाकाराणामात्मनामुपाधिनावान्तरभेदसद्भावमात्रं दृष्टान्तेनोच्यते, न स्वरूपाभेदोऽपि । दृष्टान्ते च वायुत्वैकाकाराणां वेणुरन्ध्रोपाधिना षड्जादिसंज्ञितो भेद इति विशेषणादित्यादि । तन्न । स्वरूपाभेदविवक्षयापि दृष्टान्तोपन्यासे बाधकाभावात् । उपपादितश्च 'आत्मपरदेहेष्विति' निर्देशः । न च दृष्टान्ते स्वरसभिन्नानामेव वायूनामुपाधिनावान्तरभेद एव गम्यते येन दार्ष्टान्तेऽपि स एवोपसंह्रियेत, अभेदेन व्यापिन इति विरोधात् । वायोरित्येकवचनस्य लाघवेन व्यवहिताकारैकत्वविषयत्वाकल्पनात् । षड्जादिसंज्ञित इति च रन्ध्रोपाधिभेदस्वरूपमेव विशेष्यते न त्वयमनौपाधिकोऽवान्तरभेद इति । अभेदव्यापिन इति स्वरूपाभेदोक्तेः । अत एव नगोदृष्टान्तेऽपि तदुक्तगतिर्निरस्ता । एकमेवेति दृष्टान्तदार्ष्टान्तयोरुपादानेन स्वरूपैक्यतात्पर्यनिश्चयावगमात् ।

"आकाशमेकं हि यथा घटादिषु पृथक् पृथक् ।
तथात्मैकोऽप्यनेकस्था जलाधारेष्विवांशुमान् ॥"

इति स्मृतेश्च । संयोगश्च स्ववृत्त्युपाधिभिन्नाश्रयवृत्तिरिति न संयोगिनोरण्वाकाशयोरणुत्वमहत्त्वान्यतरापत्तिः । न चैकस्यापि पर्यायेणानेकरूपत्वविभ्रमः स्यादिति वाच्यम् । कालभेदेनैत्यध्याहारसौकर्यात् । औपाधिकेऽपि जीवभेदे सत्ये जीवजगदीशपृथग्भावे नियाम्यतदौपाधिकयोगसातत्यप्रसङ्गेन चानिर्मोक्षः स्यात् । नेत्युच्यते 'एकः समस्तं यदिहास्ति किञ्चिदि'त्यादिना 'अव्यक्तादिविशेषान्तमच्युत' इत्युक्ते सा सृष्ट्यर्थविभ्रम इति 'नास्ति परं ततोऽन्यदि'ति बाधेन निष्केवलज्ञानैकरसतामिधीयते । न च परमिति वस्तुभेदमनूद्य नास्त्यन्यदिति स्वातन्त्र्यनिषेधः स्यात्, एवं परमन्यपदद्वयवैयर्थ्यादिति वाच्यम् । अन्यपदस्य स्वातन्त्र्यलक्षणादोषात् । ततश्च्युतः परं ब्रह्मैवैकं वक्तव्यम् । कथम् । नास्ति ततोऽन्यदित्येवं नास्ति परं नास्त्येवेत्येव वा तदैक्यसिध्यर्थं च । 'सोऽहं स च त्वमि'ति जीवस्य तदभेदः प्रतिपाद्यते । 'ऐतदात्म्यमिदं सर्वं, तत् त्वमसि श्वेतकेतो!' इति श्रुतिशैलीसंज्ञानात् । अन्यथा सामानाधिकरण्यानाङ्गत्यात् । स च सर्वमित्युपात्तान्यजीवाभिप्रायम् । पदवृत्त्या च विशिष्टोपस्थितौ स्वरूपाभेदे वाक्यस्य सर्वत्र लक्षणेति नासौ दोषः । एतद् आत्मस्वरूपं यत्र परमार्थे तव

१. 'स्तु' क. पाठः. २. 'मांशा', ३. 'च तद' ख. पाठः.

मनो विह्वलतां गतमित्युक्तोपसंहारः । 'त्यज भेदमोहमि'ति फलोक्तिः । 'तत्याज भेदामि'ति सजातीयादिसर्वभेदविषयं, सामान्योक्तिलाघवात् प्रकरण-तात्पर्याच्च ॥

गीताया अभेदपरत्वम् ।

एतेन

"न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतःपरम् ॥"

इति पार्थायाज्ञानशोकनिवृत्तये पारमार्थिकनित्यात्मविषयाहन्त्वमादिनिर्देशादा-त्मभेदो भगवदभिमत इति निरस्तम् । न खल्वत्राहन्त्वमिति भेदो विधीयते । अनुवादस्तु यथाव्यवहारविषयो नौपाधिकभेदमतिवर्तते । उपदेश्यदृष्ट्या चाहं-त्वमित्याद्यनूद्यात्मनित्यत्वविधिपरत्वात् । अन्यथा

"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्"
"अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः"
"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत !"
"क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत !"

इत्यादिभगवदात्मैकत्वदर्शनविरोधात् ॥

प्रत्यस्तमितभेदमितिश्लोकार्थः ।

एवं प्रत्यस्तमितभेदमित्यादौ विमर्श कुसुमाघ्राणरीतिरकल्पनीया । 'स सर्वभूतप्रकृतिमि'त्यादिसविशेषवचनानां भगवद्वासुदेवादिपदवाच्यत्वस्य च कारणरूपविषयत्वात् । यद्यप्याध्यात्मिकादिदुःखभेषजतया यत्प्राप्तिरुक्ता

"तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः"
(विष्णुपु० अं० ६. अ० ५. श्लो० ५८)
"भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता"
(विष्णुपु० अं० ६. अ० ५. श्लो० ९९)

इति, तदेव

"यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतम् ॥
विभुं सर्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यं व्याप्तं यतः सर्वं तद् वै पश्यन्ति सूरयः ॥
तद् ब्रह्म परमं धाम तद् ध्येयं मोक्षकारणम् ।
श्रुतिवाक्योदितं सूक्ष्मं तद् विष्णोः परमं पदम् ॥"
(विष्णुपु० अं० ६. अ० ५. श्लो० ६६—६८)

इति स्वरूपेणोपलक्षणेन चानुकृष्य

"तदेव भगवद्वाच्यस्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ॥"
(विष्णुपु० अं० ६. अ० ५. श्लो० ६९)

इति भगवद्वाच्यत्वमुक्तम् । तथापि

"अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज! ।
पूजायां भगवच्छब्दः क्रियते ह्युपचारतः ॥"
(विष्णुपु० अं० ६. अ० ५. श्लो० ७१)

इत्युक्तेः अप्रस्तुतत्वेन मुक्तस्य ब्रह्मण इति परामर्शानुपपत्तेः, तस्यैव परब्रह्मणो मायोपाधिकस्य सकलगुणमयतया वासुदेवाख्यकारणरूपद्वारा विशुद्धं भगवत्पदेन लक्ष्यते इति गम्यते । अत एव शुद्धे परे ब्रह्मणि सर्वकारणकारणे भगवच्छब्द इत्युक्तम् । यथा च तत्र भगवच्छब्दो नोपचारेण, अन्यत्रोपचारतस्तथोक्तं ब्रह्मपदव्युत्पत्तिप्रसङ्गे । शास्त्रेषु च सगुणमपि ब्रह्म प्रपञ्च्यते, उपासनया निर्गुणविज्ञानोपकारात् । 'समस्ताः शक्तयश्चैता' इत्यादिश्च न सविशेषोपसंहार इति समनन्तरमेव स्फुटिष्यते । एवञ्च 'प्रत्यस्तमितभेदमि'ति सजातीयादिसकलभेदविरोधिस्वरूपमुपलक्ष्यते । जडगुणादिभेदस्य कारणविषयत्वात् । यत्रेदं श्रूयते 'एकमेवाद्वितीयं', 'प्रपञ्चोपशमः शिवोऽद्वैतः' इत्यादि । न चाविशेषनिषेधो विशेषे सङ्कोचनीयः, श्रुत्यादिविरोधो हि नास्तीत्युक्तम् ।

यत्तु 'प्रत्यस्तमितभेदमि'ति त्रिविधपरिच्छेदनिषेध इति, तत्र । भेदशब्दस्यापेक्षाबुद्धिपरिच्छेद्यत्वलक्षणे परिच्छेदेऽप्रसिद्धेः । 'परः पराणामि'त्यादि

च न कालाद्यनवच्छेदविषयमिति व्याख्यातम् । तादृशस्य तुच्छत्वं प्राप्तं निरसितुं 'सत्तामात्रमि'ति । सदित्युक्ते हि सत्ताधर्मित्वं प्रसज्येत । तथापि प्रकाशानन्दाभ्यामनैकरस्यं मा प्रसाङ्क्षीदिति तदैकरस्यमुच्यते सत्तामात्रमिति । अस्यापि प्रत्यस्तमितेत्येव सिद्धौ तत्प्रसञ्जिताभावधर्मित्वनिरासो वा । तदेतदाम्नायते 'अस्तीत्येवोपलब्धव्य' इति । न चात्र मात्रचा सत्तासार्वदिकत्वमुच्यते, 'शक्यते वक्तुं' 'यः सदास्ती'ति दर्शनाद् इति वाच्यम् । तथापि प्रसक्तयावद्विपरीतरूपव्यावृत्तिपरत्वे बाधकाभावात् । एवं सति जातिगुणादिप्रवृत्तिनिमित्तशून्यतया 'वचसामगोचरमि'त्युच्यते । तथाचोक्तं —

"रूपवर्णादिनिर्देशविशेषणविवर्जितः"
(विष्णुपु० अं० १. अ० २. श्लो० १०)

इति । न चात्र कतिपयरूपादिराहित्यं विवक्षितम् । शब्दवृत्तिसङ्कोचायोगात् । सर्वपदवाच्यं तु सविशेषं ब्रह्मेति परस्य वचसामगोचरमिति विरुद्धम् । आहत्य देवादिशब्दागोचरत्वविवक्षायामस्वारस्यात् । न चैवं ब्रह्मणि मूकतैव स्यात् । न स्यात्, कथञ्चिल्लक्षणीयत्वात् । तथाच

"तवोक्तीनां याथात्म्यं नैव गोचरे"
"परमार्थस्त्वसल्लाप्यो गोचरे वचसां न सः"

इति व्याख्यातम् । श्रूयते च 'अवचनेनैव प्रोवाच', 'यतो वाचो निवर्तन्ते' इत्यादि । 'तं त्वौपनिषदं पुरुषं', 'वेदान्तेषु च गीयते' इत्यादि च तत्प्रतिपाद्यत्वादुपपन्नम् । अत एव च नाप्रमाणकत्वं, न वा वेदान्तोपदेशानर्थक्यम् । न च प्रमाणवेद्यत्वं विषयतालक्षणम्, आत्मनः प्रमाणविज्ञानस्याप्यवभासकत्वात् । किन्तु प्रमाणविज्ञाने सर्वनिषेधविकल्पिते स्वत एवावभास इत्युच्यते । आत्मसंवेद्यमिति स्वयंप्रभमित्यर्थः । एतेन 'प्रत्यस्तमितभेदमित्यादि' मुक्तजीवविषयमित्यपि प्रत्युक्तम् । अनन्यत्वात् । अन्यत्वे वान्याय्यशब्दवृत्तिसङ्कोचप्रसङ्गात् ॥

ब्रह्मणः परापरमूर्तामूर्तरूपचतुष्कम् ।

अपिचात्र हि —

"आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वरूपतः ।
भूप! मूर्तममूर्तं च परं चापरमेव च ॥"
(विष्णुपु० अं० १. अ० ७. श्लो० ४७)

इति चतूरूपं ब्रह्म प्रस्तुत्य, तत्र ध्येयरूपनिर्धारणायापरं मूर्तं ब्रह्म सनन्दनादिरूपं भावनात्रितयान्वितमुक्त्वा, परं चामूर्तं प्रत्यस्तमितभेदादिलक्षणं

"तच्च विष्णोः परं रूपमरूपमजमक्षरम्"

(विष्णुपु० अं० ६. अ० ७. श्लो० ९४)

इति निरूप्य, 'न तद् योगयुजा शक्यं' चिन्तयितुमिति स्थूलं हरे रूपं चिन्त्यमित्युक्त्वा, अन्ये चेतस उपाश्रया अशुद्धा देवाद्याः कर्मयोनयः इति विवक्षया 'हिरण्यगर्भो भगवान्' इत्यारभ्य

"मूर्तमेतद्धरे रूपं भावनात्रितयात्मकम्"

(विष्णुपु० अं० ६. अ० ७. श्लो० ९९)

अध्येयमभिधाय,

"द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते! "

"अमूर्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः"

(विष्णुपु० अं० ६. अ० ७. श्लो० ६८)

इत्यपरममूर्तं कारणरूपमुपन्यस्य, अस्यापि सर्वसमष्टिमयस्य योगयुजा ध्यातुमशक्यतया

"सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोऽपरम् ।
मूर्तं यद् योगिभिः पूर्वं योगारम्भेषु चिन्त्यते ॥"

(विष्णुपु० अं० १. अ० २२. श्लो० १०)

"स परः सर्वशक्तीनां ब्रह्मणः समनन्तरः ।
मूर्तं ब्रह्म महाभाग! सर्वब्रह्ममयो हरिः ॥"

(विष्णुपु० अं० १. अ० २२. श्लो० १२

इत्यस्मभूषणाध्यायोक्तरीत्या

"समस्ताः शक्तयश्चैता नृप! यत्र प्रतिष्ठिताः ।
तद् विश्वरूपवैरूप्यं रूपमस्य हरेर्महत् ॥
समस्तशक्तिरूपाणि तत् करोति जनेश्वर! ।
देवतिर्यङ्मनुष्या(ख्या ? दि)चेष्टावन्ति स्वलीलया ॥ "

(विष्णुपु० अं० ६. अ० ७. श्लो० ६९. ७०)

इति सह हयग्रीवेन्द्राद्यवतारेण परं मूर्तं रूपमुक्त्वा,

"तद् रूपं विश्वरूपस्य तस्य योगयुजा नृप! ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम् " ॥

(विष्णुपु० अं० ६. अ० ७. श्लो० ७२)

"तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्वीत संस्थितिं साथ विज्ञेया शुद्धधारणा" ॥

(विष्णुपु० अं० ६. अ० ७. श्लो० ७४)

इति च ।

"आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः " ॥

(विष्णुपु० अं० १. अ० २२. श्लो० ६७)

इत्यारभ्य

"इत्थं पुमान् प्रधानं च बुद्ध्यहङ्कारमेव च ।
भूतानि च हृषीकेशे मनः सर्वेन्द्रियाणि च ॥
विद्याविद्ये च मैत्रेय! सर्वमेतत समाश्रितम् ।
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितः ॥
बिभर्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ।"

(विष्णुपु० अं० १. अ० २२. श्लो० ७४, ७५)

इत्यस्त्रभूषणाध्यायगदिते

"प्रसन्नवदनं चारुपद्मपत्रायतेक्षणम् "

(विष्णुपु० अं० ६. अ० ७. श्लो० ७९)

इत्यादिनिर्वर्णितदिव्यमङ्गलविग्रहे भगवति धारणामुक्त्वा, तद्धारणासिद्धावस्त्रभूषणावयवसन्निवेशभेदकल्पितमूर्तरूपशैथिल्येन तदेकावयवं देवमेकीभूतावयवसन्निवेशभेदं समूढतेजःपुञ्जमिवापरममूर्तं कारणरूपं सच्छब्दितं 'चेतसा हि पुनः पुनः । कुर्याद्'

॥

इत्युक्त्वा

"ततोऽवयविनि प्रणिधानपरो भवेद्"

(विष्णुपु० अं० ६. अ० ७. श्लो० ८८)

इति प्रत्यस्तमितभेदादिलक्षणे परामूर्ते ब्रह्मणि संमिश्रणात् समष्टिमयं कारण रूपमवयवः सोऽस्मिन्नस्ति

"मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः"

इति श्रुतेरित्यवयविशब्दोपलक्ष्ये प्रणिधानमुक्त्वा, तत्समाधिजनितापरोक्षज्ञाने नाशेषभावभावनाप्रक्षये 'तद्भावभावमापन्नः' इत्यादिना स्वरूपप्रतिष्ठालक्षणेन कैवल्येनोपसंहरति । तत्र प्रत्यस्तमितेत्यादेर्मुक्तविषयत्वे प्रस्तुतपरामूर्तस्याप्रतिपत्तिः, अप्रस्तुतविषयता च प्रसज्येत । न च 'मूर्तं चामूर्तं चे'ति यावत् प्रस्तुतं परं चापरं चेति विशेष्यते । क्रमभेदाद् धारणाधारपरिच्छेदफले तत्र विशेषणस्यानतिप्रयोजनत्वात् । द्वितीयमेमूर्तमिति विशेषणविरोधाच्च । 'तच्च विष्णोः परं रूपमरूपमि'ति यत् प्रत्यस्तमितभेदादिलक्षणममूर्तं परं रूपं, तदपेक्षया हि द्वितीयमुच्यते । मूर्तरूपादपि तस्य साजात्यसन्निकर्षात् । मूर्तरूपस्य जगात रूपितावयवसन्निवेशभेदसमस्तशक्तिमयात्मना च परापरविभागे, तत्सहशिष्टस्यामूर्तस्यापि तद्विभागौचित्याच्च । 'आश्रयश्चेतसो ब्रह्म द्विधे'ति चोभयथापि द्वैविध्यादुपपन्नम् । एवं सति 'समस्ताः शक्तयः' इत्यादिसविशेषोपसंहारोऽपि समञ्जस इति निरस्तम्, तस्यान्यथोपपादितविषयत्वात् ॥

तद्भावम् आत्मभावम् इतिश्लोकौ ।

तद्भावेत्यादिनैकात्म्योपसंहाराच्च । न च प्रक्षीणाशेषभावनस्य मुक्तस्य प्राप्ये ब्रह्मणि प्रापणीयतयाभिधानाज्जीवपरभेद इति वाच्यम् । अविद्याविलयस्य ब्रह्मभावमात्रत्वोपगमात् । प्राप्यप्राप्तृभावनिर्देशस्य चावस्थाभेदापेक्षत्वात् । परस्यापि शुद्धात्मविशिष्टब्रह्मणः प्राप्यत्वोपगमेन तथैव वाच्यत्वात् । न च तथाशब्दः साम्यपरः, तदनुपपत्तेरुक्तत्वात् । 'भवत्यभेदी'ति च समानाकारत्वे

---

१ 'न', २. 'यमू' ख. पाठः.

गौणत्वकल्पनागौरवात् । न चैवं द्वितीयभावपदवैयर्थ्यम् । तत्पदस्य ध्येयसविशेषरूपपरतया तस्य भावो वास्तवं निर्विशेषसत्तैकरसस्वरूपं तद्भूयञ्जत इत्यर्थविशेषोपपत्तेः ॥

एकस्य प्राप्यप्राप्तृभावे परसम्मतिः ।

एतेन 'आत्मभावं नयत्येनमि'ति व्याख्यातम् । ध्येयं हि सगुणं ब्रह्म परेश्वरशब्दितं ध्यायिनमाकर्षको लोहमिव दारुसम्बन्धात् प्रकृतितादात्म्याद् निष्कृष्य त्रिभावभावनातीतस्वात्मकैवल्यं नयति । उपासनापरिपाके स्वात्मतत्त्वसाक्षात्कारोपपत्तेः । न चाकर्षकादिवद् निष्कृष्टलोहस्य निर्मुक्तस्यापि ब्रह्मणो भेदः सम्भावनीयः । दृष्टान्तस्वारस्यमात्रेण शास्त्रार्थतादात्म्यभङ्गायोगात् ।

एवं च 'भेदश्च तस्याज्ञानकृतो भवेत्', 'विभेदजनकेऽज्ञाने' इति च भिन्नानामेव ज्ञानैकाकाराणां कर्मनिमित्तो देवाद्याकारभेद इत्येवम्परं न व्याख्येयम् । भेदसामान्यशब्दस्य विशेषवृत्तिकल्पनागौरवात् । न च

"एकस्य रूपभेदो(ऽयं)वाक्यकर्मावृतिप्रजः"

इत्युक्तमिति वाच्यम् । नह्यत्रैकस्येत्येकाकारत्वमुच्यते, शब्दवृत्तिव्यवधानात् । नापि पर्यायेणानेकशरीरानुयाय्येको जीवः, 'समस्तभूतेषु पुमानेको व्यवस्थितः' इत्यभिधानात्, किन्त्वद्वितीयादेव । तस्य यद्यपि रूपभेदः कर्मणैव, तथापि कर्मसम्बन्धार्हरूपभेद एवानाद्यनिर्वचनीयस्वरूपाज्ञानाधीन इति तत्राक्षेपलभ्यमज्ञानमिह स्वशब्देनोच्यते । न चाकर्मण्यज्ञानशब्दाव्युत्पत्तिः ।

"श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ! ।
अनात्मन्यात्मबुद्धिर्या"

(विष्णुपु० अं० ६. अ० ७. श्लो १०, ११)

इत्यादिना कर्मान्याविद्यारूपाभिधानात् । यद्यप्यत्र भ्रान्तिरविद्येत्युक्तं न मैक्षान्तिकमनाद्यज्ञानं, तथापि मोहतमोवृतः अहं ममेति मतिं कुरुते इत्यनन्तरोक्तभ्रान्तिहेतुतयावारकमोहतमश्शब्दितमज्ञानमुपेयते ।

"माया तवेयमज्ञातपरमार्थातिमोहिनी ।
अनात्मन्यात्मविज्ञानं ययो मूढोऽधिरोहति ॥
अस्वे स्वमिति भावोऽत्र यत् पुंसामुपजायते ।
संसारमातुर्मायायास्तवैतन्नाथ ! चेष्टितम् ॥"

---

१. 'था' ख. पाठः.

इत्यादिदर्शनाच्च । तन्निबन्धनो ब्रह्मान्यभावो जीवस्य नानात्वमचिदभेदश्चेत्युच्यते 'भेदश्च तस्याज्ञानकृतः', 'विभेदजनकेऽज्ञाने' इति चेति ॥

विभेदजनके इत्यादेरैकात्म्ये अस्वारस्यभङ्गः ।

यत्तु ऐकात्म्ये 'विभेदजनके इत्याद्यस्वारस्यमिति । तन्न । अनादिरध्यासोऽपि जीवपरभेदः साम्प्रतिक इति कृत्वा व्यवह्रियत इति हि दर्शितं 'सदेवे'त्यवधारणादिना । आगमानुगामिन्या च स्मृत्या तथैव निर्दिश्यते 'विभेदजनक' इति भेदस्याज्ञानाधीनत्वोपपत्तेः । अज्ञानशब्दश्चापूर्वावधौ न जानामीत्यनुभवसिद्धे प्रसिद्धः, न कर्मणि । क्वचित् कर्मण्यविद्याशब्दस्य तन्मयत्वेनोपचारात् । लोकवेदव्यवहारानुगमेनापरोक्षावरणभेद एव व्युत्पत्तेः । असन्तमिति च न सद्भेदव्यावर्तनाय, स्वरूपान्वाख्यानमात्रत्वात् । अन्यथा सन्तं तु भेदं कुर्यादित्यर्थपरिशेषापत्तेः । अथ बाधान्नैवं परिशेषः, असन्तमिति व्यर्थं, भेदं कः करिष्यतीत्येव कार्यभेदसिद्धावनतिप्रसङ्गात् । हेत्वभावेऽपि स्वत एव भेदः स्यादिति शङ्कानिवृत्तिफलत्वं पुनरस्माकमपि । अभेदो हि स्वभावः ।

"अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः"

इत्याशयशब्दिते हृद्यन्तर्ज्योतिः पुरुषरूपेण परमात्मनः स्थितिस्मरणात् । आशयशब्देनाशयस्थो जीवो लक्ष्यते, तस्मिन्नात्मतया स्थितः परमात्मोच्यते चेत्, सोऽयं सर्वत्र दुर्मेधसः क्लिष्टकल्पनादोषः । 'क्षेत्रज्ञं चापि मां विद्धी'ति च जीवपरस्वरूपाभेदपरमेवेत्यावेदितम् । यत्तु क्षेत्रज्ञः परमात्मैव, जीवः पुनरन्यो भविष्यति यस्तद्बोधेन मोक्षणीय इति । तन्न, क्षेत्रज्ञशब्दस्य जीवे प्रसिद्धेः । अन्यथा वचनानर्थक्याच्च ॥

द्वे रूपे इत्यादेर्जीवब्रह्मभेदपरत्वायोगः ।

यत्तु द्वे रूपे ब्रह्मण इत्यादौ क्षराक्षरशब्दितबद्धमुक्तजीवव्यतिरेको ब्रह्मण उच्यत इति । तन्न । 'आश्रयश्चेतसो ब्रह्मेत्यादौ चतूरूपं हि ब्रह्म

---

१. 'वस्व' क. पाठः.

विवक्ष्यते निर्विशेषात्मतत्त्वं सदात्मकं, कारणरूपं भगवद्वासुदेवाख्यं, समस्तशक्तिमयदिव्यमङ्गलविग्रहविशेषितं, हिरण्यगर्भादिजगदात्मकं चेति । इहापि 'निर्व्यापारमि'त्यादिना निर्विशेषरूपमुदितम् । 'सर्वशक्तिमयो विष्णुरि'त्यादिना च तृतीयं रूपम् । एवं सति परिशेषाज्जगद्रूपं कारणरूपं च वक्तव्यमिति तदेव 'द्वे रूपे' इत्यादौ प्रतिपत्तुं युक्तम् । उभयत्र परतत्त्वज्ञानोपायवचनप्रवृत्तिसामान्यात् । न च सर्वभूतस्थितिविरोधः, नहि कार्यमत्यन्तमेव कारणाभिन्नं, कार्यकारणताविरोधात् । कारणविवेके कार्यस्य तुच्छतापत्त्या हि तदनन्यत्वमिष्यते । तथा चाक्षरस्य कारणस्य सर्वभूतस्थितिरुपपन्ना क्षरशब्देन च जगदुपाधिजीव एव विवक्ष्यते ।

"एकदेशस्थितस्येन्दोर्ज्योत्स्ना विस्तारिणी यथा"
(विष्णुपु० अं० १. अ० २२. श्लो०५५)

"'परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगद्"

इति क्षेत्रज्ञशक्तिं निर्दिश्य ब्रह्मादिगुल्मान्तेषु तारतम्याभिधानात् । समानप्रकरणे च

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा"
(विष्णुपु० अं० ६. अ० ७. श्लो० ६१)

इति प्रकृत्य

"तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल! तारतम्येन लक्ष्यते ॥"
(विष्णुपु० अं० ६. अ० ७. श्लो० ६२)

इत्याद्यभिहितम् । शक्तिरिति च कार्यभवनानुकूलतोपाधिनाभिधीयते, न त्वपृथक्सिद्धविशेषणतापि तदर्थः । गौरवात् । स्वभावाभिन्नस्यापि तदुपाधिनैव भिद्यमानस्य तथात्वोपपत्तेश्च । क्षेत्रज्ञस्य च सर्वभूतस्थितिरुपपन्ना, सर्वत्र तादात्म्याभिमानिविशिष्टब्रह्मण एव जीवत्वात् । अन्यथा परस्यैव गौणी सर्वभूतस्थितिरापद्येत । क्रमेणेति ज्ञानद्वारेति चोपक्षेपात् । 'अक्षरं तत् परं ब्रह्मे'ति विशेषणानाद्यस्यं च । मुक्तस्यापि निरुपचरितपरत्वाभावात् कल्पनाभेदाच्च व्यतिरेकनिर्देशो निर्वक्ष्यते । एवं च क्षराक्षरशब्दार्थान्तरमनाशङ्क्यमदूष्यं च ॥

१. ध्व', २. 'भिनिविष्ट' ख. पाठः.

* इदमर्धं मुद्रितविष्णुपुराणे न दृश्यते ।

द्वाविमौ पुरुषौ इत्यादेरर्थः ।

एवं 'द्वाविमौ पुरुषावि'त्यादावपि क्षराक्षरशब्दावुक्तविषयौ वेदितव्यौ । कूटो राशिः समुदायः समष्टिः, तदात्मना कारणरूपेण तिष्ठतीति कूटस्थः । स च स्वविकारेषु क्षरत्स्वपि न क्षरति स्वयं तानश्नुते वेति परोऽक्षरः । तच्चोभयं क्षराक्षरशब्दितं कार्यकारणमात्मना तादात्म्येन सन्दब्धमिति पुरुषशब्देनोच्यते । तथाच श्रुतिः 'तदनुप्रविश्य सच्च त्यच्चाभवदि'ति । इहापि 'यो लोकत्रयमाविश्य बिभर्ती'त्युक्तम् । आभ्यां च कार्यकारणरूपाभ्यामस्पृष्टं नित्यशुद्धबुद्धमुक्तस्वभावमन्यत् तदुभयविलक्षणं परममूर्तरूपं ब्रह्मणो दर्शयति

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"

इति । न तु बद्धमुक्ताभ्यामुत्तमः पुरुषोऽन्य उच्यते, उदितन्यायोपस्कृतसकलशास्त्रव्याकुलताप्रसङ्गात् । अखण्डात्मतत्त्वं हि 'तत्त्वमस्या'दिशास्त्रेण समर्प्यत इत्यावेदितम् । यद्यपि तदेव ब्रह्म कार्यकारणरूपविवृत्तं, तथापि विशिष्टरूपापेक्षया केवलस्यान्यत्वं घटाकाशादिव केवलाकाशस्य परिच्छिन्नप्रतियोगिव्यपदेशनिमित्तं व्यपदिश्यते ।

"इदानीमसि मारीचः पूर्वमन्यो निशाचरः"

इत्यादिवदन्यत्वानन्यत्वयोर्विकल्पमात्रत्वात् । तमेनं परमात्मानं जन्मादिशास्त्राश्रयणेनोपलक्षयति

"यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः"

इति । निरुक्तपरतत्त्वात्मना[1] च सदैव परमेश्वरस्य व्यक्तीभावाद् भगवान् वासुदेवः पुरुषोत्तमशब्देन निगद्यते इत्युच्यते 'यस्मात् क्षरमतीतोऽहमि'त्यादिना । एवं

"स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्"

इति सामानाधिकरण्येन सविभूतिकारणरूपोपलक्ष्यं स्वप्रभं परमात्मानमवगमयति, न तु तत्तच्छरीरविशिष्टमिति श्लिष्टम् । 'यो मामेवमि'ति जगत्कारणत्वादि तदवगतिद्वारमवमृश्यते । नहि तस्य वेदितव्यः प्रकारभेदो निर्दिष्टः,

---

१. 'रत्वात्म' ख. पाठः.

यं तमेवमिति प्रतीयाम । 'असम्मूढो जानाती'ति च कार्यकारणरूपातीत-स्वरूपविज्ञानमुच्यते । 'दिव्यो ह्यमूर्तः पुरुषः', 'अक्षरात् परतः परः' इत्यु-भयातीतस्य शुद्धस्य परमात्मनः श्रवणात् ॥

पुराणस्य कारणातीतपरत्वम् ।

पुराणेऽपि कारणातीतं शुद्धं ब्रह्मानुस्मर्यते

"प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत् परतश्च यत् पदम् ।
तस्माच्च सूक्ष्मादिविशेषणानामगोचरे यत् परमार्थभूतम् ॥
किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय ।
शुक्लादिदीर्घादिघनादिहीनमगोचरे यच्च विशेषणानाम् ॥
शुद्धातिशुद्धं परमर्षिदृश्यरूपाय तस्मै भगवन्! नताः स्मः ।

इत्यादौ । 'रूपं महत् तेऽच्युत! यत्र विश्वं यतश्च विश्वमि'त्यादि, 'तेष्वन्त-रात्माख्यमतीव सूक्ष्ममि'ति, 'तस्मै नमः कारणकारणाये'ति च पृथक् कारण-रूपस्याभिहितत्वात् ॥

जगत्कारणत्वस्य निर्विशेषब्रह्मलक्षणत्वम् ।

अन्यथा कस्येदं जन्मादिकारणत्वं लक्षणमुच्येतेत्युक्तम् । ननु पृथिव्या एव पृथिवीत्वं लक्ष्म नापृथिव्याः । एवं कारणत्वमपि कारणस्यैव स्यात् । तत्र यदि पृथिवीत्वं संस्थानभेदः स्वरूपमेव, युक्तं तस्य स्वरूपं लक्षणमिति ज्ञानादिकमिव ब्रह्मणः, प्रतिपद्यमानस्वरूपस्यैव सर्वतो व्यावृत्तासङ्कीर्णबुद्धिप्र-योजकतया लक्षणत्वोपगमात् । अथ स्वरूपादतिरिच्येत, तद्विशेषविधुरमेव स्वरूपं लक्ष्येत । किन्तु तत्र विशेषनिषेधाभावात् पृथिव्येव सेति वस्तुगत्या पृथिव्यास्तल्लक्षणमुच्यते । अत एव न्यायिनोऽपि लक्षणाकारादाकारान्तरेण लक्ष्यतामिच्छन्ति । न चेह कारणत्वमात्मनः स्वरूपं, तमसः परस्तान्निर्विकल्पस्य निरञ्जनस्य तदयोगात् । नापि धर्मः, अनन्तराबाह्यात्मनि धर्मधर्मिभावा-योगात् । तत्प्रयोजकसम्बन्धस्येह दुर्निरूपत्वाच्च । सर्वत्रैव धर्मधर्मिभावस्य सम्बन्धनिरूप्यत्वात् । अन्यथा गवाश्वादेरपि स किं न स्यात् । अथ तादात्म्यं सम्बन्धः, न । तस्यैवैकस्य धर्मधर्मिभावायोगात् । भेदोऽपीति चेद्, न । अभेदविरोधात् । अथ तस्यैव रूपभेदो धर्मः, कस्यायं रूपभेदो गोत्वं साक्षा-दिसन्निवेशभेदश्च ।

---

१. 'नि धर्मि' ख. पाठः.

"जातेः संस्थानभेदाच्च निष्कृष्टा गौर्न गम्यते ।
त्वचादितो विनिष्कृष्टा कदलीव कथञ्चन" ॥

एवं कारणत्वादि यदि ब्रह्मणो रूपभेदः स्याद् न धर्मधर्मिभावः । अपि च

"नागन्तू रूपभेदस्तत्स्वरूपानुपमर्दतः ।
तत्स्वरूपोपमर्दे च कस्य धर्मः स कथ्यताम्" ॥

तस्माद्वागन्तोरनागन्तोर्वा रूपभेदस्य धर्मभावायोगाद् जगज्जन्मादिहेतुता न ब्रह्मधर्मः । नन्वेवं तत् तस्य लक्षणं न स्याद् गोरिवाश्वत्वम् । न । अहिशाल्वादेरस्क्चन्द्रादिधर्मस्य तल्लक्षणत्वोपगमाद् असावहिः स्क्, शाखायं चन्द्र इति । तत्र सामानाधिकरण्यं परमुपपादयितुमैकार्थ्यकल्पनाक्लेशः । लक्षणं तु शाल्वादिकमेव । अपिचोपेयत एवाविद्यको धर्मधर्मिभावसम्बन्धः । किन्तु नेत्र सर्वज्ञानादिमयेन शास्त्रैकसमधिगमनीयमशेषविशेषविरोधिस्वरूपमेव लक्षणीयम्, लक्ष्यस्वरूपबाधाय लक्षणायोगात् । नहि विसर्पणोत्फणनाद्युपपाद्यफणिन्वादिलक्षणं स्वरूपबाधाय । काल्पनिकं तत्र बाधते इति चेत् । कारणत्वमपि शास्त्रतात्पर्यविषयलक्ष्यस्वरूपाबाधाय काल्पनिकमस्तु । शेषिभूताधानधर्मांशुत्वानुरोधायापि तदङ्गसाङ्ग उच्चैस्त्वमौत्पत्तिकमपि बाधित्वोपांशुत्वमुपे यते । प्रकृते च शेषिभूतलक्ष्यस्वरूपानुरोधाय तच्छेषकारणत्वरूपलक्षणस्यासिद्धानपेक्षितवस्तुभावस्य यथाकथञ्चिदुपपद्यमानस्य काल्पनिकत्वोपगमो हि न्याय्यतरः । न च गन्धवत्त्वाद्याकारान्तरविशिष्टा पृथिवीव पृथिवीत्वेन सर्वज्ञत्वाद्याकारान्तरविशिष्टं सविशेषमेव ब्रह्म कारणत्वेन लक्ष्यताम्, एवं तस्य न काल्पनिकत्वं कल्प्येतेति वाच्यम् । सर्वज्ञत्वादिघटितशरीरस्यैव तस्य तल्लक्षणत्वाद्, अन्यथा प्रधानादिव्यावृत्त्यसिद्धेः । तदिदमुक्तं *जन्मादिभाष्ये

जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेर्भवति तद् ब्रह्मेति वाक्यशेषः ।

---

* 'जन्माद्यस्य यतः' (ब्रसू०. १. १. २) इत्यत्र ।

इति । एवं कारणोत्तीर्णं यो मां विजानाति, स सर्वविदिति युज्येत । अन्यथा कारणरूपविज्ञानेऽपि निरङ्कुशसर्ववित्त्वायोगात् । यथा चैतत् तथाधस्तादभ्यधाम ॥

ऊर्ध्वमूलमित्याद्यध्यायतात्पर्यम् ।

अपिच इहाध्याये 'ऊर्ध्वमूलमधश्शाखमि'त्यादिना सकारणं संसारं प्रकृत्य,

"ततः पदं तत् परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः"

इति संसारवर्तन्यनावर्तनाय वेदितव्यतयोक्तं 'न तद्भासयते' इत्यादिना विशेष्यते । न चात्र वेदितव्यं पदं परमात्मातिरिक्तः शुद्धः प्रत्यगात्मैव,

"तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी"

इति प्रपदनीयस्यान्यस्य पुरुषस्याभिधानादिति वाच्यम् । तमिति प्रकृतवेदितव्यपदावमर्शनात् । अथ न प्रकृतावमर्शः, यतः प्रवृत्तिः प्रसृता तमित्यभिसम्बन्धादित्युच्येत, तथापि विषयभेद उत्तमपुरुषानिर्वाहात् । विषयैक्ये च कथं तत् पदं परिमार्गितव्यं, 'तमेव चाद्यं पुरुषं प्रपद्ये' इत्येवमिति निरुह्येत । अन्यथा तकारलोपो वा कल्प्येत । प्रपद्येति पाठभेदो वा । 'तद्धाम परमं ममे'ति तु निर्देशोऽपि कथञ्चिन्नेयः । अपिच परमात्मातिरिक्तप्रत्यगात्मवेदनादेव संसारातिवर्तने तदङ्गं ब्रह्मोपासनममानित्वादिवदापन्नमिति तव विपरीताभ्युपगमो विरुध्येत । 'तमेव विदित्वातिमृत्युमेती'त्यादिश्चाङ्गिफलेनाङ्गस्तुतिमात्रमिति वा कल्प्येत । तथाचार्थविप्रकर्षः । तदेवमनादिसंसारप्रवृत्तिकारणरूपोपलक्षणीयं हेतुविकाररूपोत्तीर्णं वेदितव्यं पदमुपन्यस्य तस्यैव कारणरूपोपाश्रयेण

"ममैवांशो जीवलोके जीवभूतः सनातनः"

इति जीवेशविभागापत्तिमभिधाय, तदेव 'यदादित्यगतं तेजः' इत्यादिना सर्वात्मकमुक्त्वा पुनः 'स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इति मुक्तस्यात्मभूतं क्षराक्षरातीतमुपनिगमयति 'उत्तमः पुरुषस्त्वन्यः' इति । न चैवं सति 'क्षरश्चाक्षर एव चे'ति बद्धमुक्तावव्यमृश्येयातां, परमात्मन एव परिमार्गितव्यपदत्वे सति मुक्तस्यासन्निहितत्वात् । अथ वेदितव्यादेतस्मादक्षराद् उत्क्रान्त्यादिमतो जीवाच्च क्षरादुत्तमः पुरुषोऽन्य उच्येत, वेदितव्यतयोपक्षिप्तं

१. 'प्रतिपं' ख. पाठः.

'यो मामेवमसम्मूढो जानाती'ति न निगम्येत। तस्माद्धेतुविकाराभ्यामेव क्षराक्षरशब्दाभ्यामुत्तमः पुरुषोऽन्यः परमात्मोच्यत इति युक्तम्। न तु प्रत्यगात्मनोऽन्यः, तद्विदः सर्ववित्त्वाद्यसामञ्जस्यात्। तदिदं हेतुविकारातीतकेवलप्रत्यगभिन्नब्रह्मात्मवेदनं तदावेदकशास्त्रद्वारा स्तूयते इति गुह्यतमं शास्त्रमेतद् बुद्ध्वा स्यात् कृतकृत्य इति। न तु विशुद्धप्रत्यगात्मवैलक्षण्यवेदनं, तस्येहाप्रकृतत्वात्।

यत्तु अविद्यादिसम्बन्धार्हस्य तदनर्हब्रह्माभेदोऽसम्भवीति। तन्न। जीवोऽपि ह्यपहतपाप्मादिस्वभावस्तत्वापि सम्प्रतिपन्नः 'य आत्मापहतपाप्मा', 'असङ्गो ह्ययं पुरुषः',

"नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः"
"शरीरस्थोऽपि कौन्तेय! न करोति न लिप्यते"
"निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः।
दुःखाज्ञानमला धर्माः प्रकृतेस्ते तु नात्मनः॥"
(विष्णुपु० अं० ६. अ० ८. श्लो० २२)

इत्यादिश्रुतिस्मृतिभ्यः। तथापि

"मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्"

इतीश्वराधीनप्रकृतिसंयोगे सति

"कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु"
"तथात्मा प्रकृतौ सङ्गादहम्मानादिदूषितः।
भजते प्राकृतान् धर्मान्"
(विष्णुपु० अं० १. अ० ७. श्लो० २४)

इत्यादिना तस्यैव शतशः संसार उपवर्ण्यत इति चेत्। स तर्हि स्वभावनिर्धूतदोषस्यापि परमात्मन एव स्तात्। स्वतोऽसङ्गस्वभावत्वं च समानम्। नहि गुणसङ्गिस्वभावत्वे जीवस्यासङ्गत्वादिवचः सङ्गच्छेत। अथाविद्ययैवास्य गुणसङ्गः। न च सर्वज्ञस्याविद्या सम्भवतीत्यन्यत्वमिति चेत्। सा यदि तस्य स्वभावः, ज्ञानादिवन्न निवर्तेत। न खल्वौष्ण्यं प्रकाशो वाग्नौ सति निवर्तते। अथागन्तुको धर्मः, स विक्रियेत।

"उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्"

इति, 'अज आत्मा महान् ध्रुवः', 'अविकार्योऽयमुच्यते', 'कूटस्थमचलं ध्रुव-

मि'त्यादिविरोधः । स्वभावसर्वज्ञ(सर्व)शक्तेरनिमित्तागन्तवविद्यासम्बन्धे मुक्त-बन्धप्रसङ्गश्च । अहं ममेत्यविद्यया ज्ञानावरणं कर्म, तेन चाविद्येत्यनादिरयं प्रवाह इति चेद्, न । एवमपि विकारापत्तेरपरिहार्यत्वात् । नहि 'आत्मभावं नयत्येनमि'त्यत्र 'विकार्यमात्मनः शक्त्ये'त्याहत्यात्मनो विकार्यत्वमुच्यते, अनित्यत्वप्रसङ्गात् । किन्तु जीवरूपभेदेन, तद्रूपहानेन स्वरूपकैवल्यस्य नेयत्वात् । अविद्ययैवाविद्यादिसम्बन्धोऽपीति चेद्, हन्तैवमनादिविभ्रममव्यविद्या परमात्मन्येव सर्वसंसारविभ्रममादधातु । न किञ्चिद् दुष्यति । सर्वज्ञस्य सतोऽविद्या न सम्भवतीति चेद्, मा सम्भूत् । परमात्मैव हि सर्वज्ञः संसारी चेति व्यवस्थितधर्म एवावतिष्ठते । मृषैवेत्युपगम्यते मायया ह्यन्यदिवेति । यथा चैतत् तथोक्तमधस्तात् । एवञ्च अन्यस्य स्थितिनाशयोरन्यात्मता न स्यादिति निरस्तम् । नहि येन रूपेणान्यता जीवस्य तेनैव रूपेण ब्रह्मभावमाचक्ष्महे, किन्तु विगलिताविद्यासंसारमलस्य तात्त्विकेन रूपेण प्रहीणवर्णिकाभेदस्य नटस्येव मायिकस्य प्रकृतिभावम् । अत एवापगतहेयसम्बन्धस्वरूपेणापि नेश्वरैकात्म्यं, कारागृहनिर्मुक्तस्यापि नरपतिनैकात्म्यादर्शनादिति मूढदासेरजनरञ्जनमपास्तम् । तस्यैवात्मनोऽनाद्यविद्यामयजीवेशभेदबाधेन स्वरूपकैवल्ये तदभेदवाचोयुक्तेरिष्टत्वात् । तथाच 'परमात्मात्मनोर्योगः परमार्थ-इत्येतन्मिथ्येत्यन्यस्याभावानुपपत्त्यभिधानमुखेन स्वरूपैकात्म्यपरमेव व्याख्येयं, यथावगतभेदनिर्दिष्टजीवपरविशिष्टरूपाभेदापारमार्थ्यपरं वा । अन्यथा वस्तुभेदे सति जीवपरयोरेवापारमार्थ्यापत्तेः । 'परमार्थो न भेदवानि'ति युक्तम् । 'यद्यन्योऽस्ति परः कोऽपि', 'समस्तभूतेषु पुमानेक' इत्युपक्रम्याभेदेन 'त्यज भेदमोहमि'त्युपसंहाराच्च ॥

सायुज्यशब्दार्थः ।

सायुज्यं चाभेद एव, न समानगुणकत्वम् । युज्यत इति व्युत्पद्यमानस्यापि युक्पदस्य गुणासन्निधेः सन्निहितब्रह्मविज्ञविषयत्वौचित्यात् । अथापि समानो युक् सयुक् । सयुजो भावः सायुज्यं नैकात्म्यं भेदगर्भत्वादिति चेत् ।

एवं तर्ह्यर्थविशेषविवक्षा कल्पयितव्या। न च समप्राधान्यविवक्षा शक्या। मुक्तस्यापि तव ब्रह्मशेषत्वोपगमात्, 'सयुजा सखाये'ति संसारेऽपि सायुज्यनिर्देशे सतीह तद्व्यावृत्त्यार्थविशेषासिद्धेश्च। अतोऽवयववृत्त्यापि सायुज्यमविभागयोगस्तादात्म्यमेव विवक्ष्येत। भेदगर्भव्यपदेशश्च तदेतयोरभेद इत्यादाविव प्राचीनभेदप्रतिभासनिबन्धनः। वस्तुतस्तु सायुज्यमिति तादात्म्यवृत्तमेव युक्तम्। 'ब्रह्मणः सायुज्यमि'ति साक्षात्सम्बन्धोपपत्तेः। अवयववृत्तौ च समानगुणकत्वमन्यद् वा न साक्षात् सम्बन्धुमर्हति, अन्यगतत्वात्। न च पदार्थैकदेशगुणसामान्यप्रतियोगितया ब्रह्मान्वियात्। पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिविरोधात्। अपिच 'देवतानां सायुज्यमि'त्यादौ सार्ष्टिशब्देनैव समानगुणकत्वमप्याक्षिप्तम्। अन्यथा गुणन्यूनतया सार्ष्टिशब्दितसमानभोगैकत्वानुपपत्तेः। गुणवैकल्ये भोगवैकल्यप्रसिद्धेः। 'युवा स्यात् साधुयुवे'त्यादौ गुणपौष्कल्ये भोगपौष्कल्यान्नानाच्च। एवं सति सायुज्यं तादात्म्यमुच्येत, अन्यथा द्वैरुक्त्यात्॥

सायुज्यपदस्याभेदार्थत्वे दोषोद्धारः।

यत्पुनरुच्यते अग्नितादात्म्यमापन्नस्य युगपत् क्रमेण वा देवतान्तरतादात्म्यायोगाद् अर्थविरोध इति। तन्न। नह्यग्निरादित्यो वायुरित्यादयोऽनित्यस्थितयो देवता ब्रह्मवदिष्यन्ते, येन ब्रह्मण इव तादात्म्यं तासामापद्य न विपद्येत। विद्याकर्मसाधनाधीनविपाकतया समाननामरूपाणामेव देवर्ष्यादीनामाधिकारिकाणामन्यान्यत्वोपगमात्। तदेवं सत्यनुष्ठितसाधनो यद् देवताभूयं गच्छति, तदुच्यते— 'देवतानां सायुज्यमि'ति, 'देवो भूत्वा देवानप्येती'ति च। 'वसूनामेवैको भूत्वे'त्यादिलिङ्गात्। इयांस्तु विशेषः — देवतातादात्म्यं विकारो ब्रह्मतादात्म्यं स्वरूपमिति। एवञ्च अन्यधिकारोचितजात्यादिविपाकावसाने तावत्प्रसुप्तविपरीतकर्माशयोद्बोधादग्निसायुज्यादवस्कन्द्य वायुसायुज्यमाप्नोति। अन्यश्चानुष्ठितविद्याकर्माग्निसायुज्यमित्येवमनादिरनन्तः परिवर्तः। तथाच भिन्नोपाधिव्यवस्थितकर्मभेदवतस्तद्विपरीताग्निसायुज्यानुपपत्तिः, अनवस्थितश्च हेत्वभावादमुतः प्रच्युत्यान्यसायुज्यानुपपत्तिरित्यादिना-

---

१. 'गत्वा' क. पाठः.

न्त्रिकविकल्पास्तादात्म्यभेदानधिगतिगाढनिरूढदासभावाभिनिवेशोद्भेदा नादरणीयाः । यत्तु समानलोकतासाहचर्यात्तैक्यं सायुज्यम् । ऐक्ये च समानलोकत्वासम्भव इति । तन्न । देवतानां सायुज्यमिति साक्षात्सम्बन्धस्य वाक्यीयस्य सन्निधिमात्रेणाहेयत्वात् । देवतानां सार्ष्टितामित्यादौ तु गत्यन्तराभावात् समानशब्दस्य सापेक्षत्वेऽपि गमकतया गम्यमानप्रतियोगिनैवान्वयबोधे देवतानामिति विशेषसमर्पणमात्रपरमुपगम्यते । न सायुज्यमापन्नस्यैव सौमानलौक्यमुच्यते । अग्निवाय्वादिभावस्य यावत्तदुपकरणोपाधिकतया पृथगुक्तिवैफल्यात् । किन्तु साधनाधिकृतावस्थस्य 'अन्योऽसावन्योऽहमस्मी'ति भेदप्रतिभासापेक्षया तथा फलमवबोध्यते । यद्वा साधनतारतम्यात् सालोक्यसार्ष्ट्यादिफलतारतम्यमुच्यत इति गम्यताम् ।

एवञ्च य एते तान्त्रिकस्य विप्रविबुधसलीपनयोल्लापितकतिपयदासेरकापशदानुवर्तनप्रवर्तितमदभरस्खलितप्रलापाः "ऐक्ये सालोक्यानुपपत्तिः । सालोक्यानन्तर्ये च सायुज्यस्य पाठक्रमबाधः । सायुज्यशब्दस्यैक्यवृत्तित्वनिश्चये सत्यर्थवशात् पाठक्रमबाधः । न च पाठक्रममबाधित्वा तस्यैक्यवृत्तित्वनिश्चय इत्यन्योन्याश्रयः । 'स एतेषामेव सलोकतां सायुज्यमश्नुत' इति च क्वचिदेव श्रुतक्रमस्य अग्नेरेव सायुज्यं सलोकतामाप्नोति, वायोरेवेन्द्रस्यैव, बृहस्पतेरेव प्रजापतेरेव ब्रह्मण एव सायुज्यं सलोकतामि'त्यादिभूयोबलीयस्त्वेन बाधः । वेदान्तिभिरर्थवादप्रामाण्योपगमेन कर्मविधिशेषार्थवादेनापि देवतासायुज्यसिद्धौ कर्मावसाने मोक्षादर्वाक् पृथग्भावावश्यम्भावेन नैकात्म्यं साध्यमि"त्यादयः, ते निरस्ता वेदितव्याः ।

लयशब्दोऽपि प्रतीतरूपादर्शनप्रयोजकभावकर्मा, धातूनामनेकार्थतया 'लीङ् श्लेषणे' इत्यादेः प्रदर्शनार्थत्वात् । 'लियः सम्माननशालीनीकरणयोश्च' (१. ३. ७०) इत्यर्थभेदेनात्मनेपदविधानात् । स च भावः क्वचिददर्शनमात्रावसानः निलीयते चोर इति । क्वचिदभावावसानः विलीयन्ते मेघा इति । क्वचिदन्यनिमित्तापन्नरूपभेदहान्या स्वरूपप्रतिष्ठावसानः विलीयन्ते तरङ्गाः विलीयन्ते करकाः विलीयते घृतमिति प्रयोगदर्शनात् । एवञ्च अविद्यादितद्रूपभेदस्यात्मनो विद्यया तद्रूपप्रहाण्या स्वरूपप्रतिष्ठैव 'लीना ब्रह्मणि', 'लये

१. 'ण', २. 'दौ ग' ख. पाठः. ३. 'स' क. पाठः. ४. 'ङा । त', ५. 'न्ते र' ख. पाठः.

ब्रह्मणी'त्यादौ लयशब्देनोच्यत इति युक्तम् । तवापि 'निर्व्यापारामित्यादौ विशुद्धं प्रत्यगात्मानमुपयतः

"तत्रान्यज्ञानरोधेन योगिनो यान्ति ये लयम्"

इति लयशब्दस्योक्तगतिनेयत्वात् । तत्र नृदेवसुखदुःखादिविशिष्टरूपभेदहानेन स्वरूपप्रतिष्ठातिरिक्तलयशब्दार्थासम्भवात् । प्रतिसञ्चरभेदेष्वपि कार्णे कार्यलयस्यैवंरूपत्वात् । नहि विसदृशावस्थाहानेन कार्यस्य कारणत्वधर्मिणा द्रव्येण संश्लेषो लयः सम्भवति, अवस्थाभेदस्यैव कार्यतया तद्धाने संश्लिष्यतोऽभावात्,

"प्रणष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका"

(विष्णुपु० अं० ६. अ० ४. श्लो० १५)

"ततश्चापो हृतरसा ज्योतिष्ट्वं प्राप्नुवन्ति वा"

(विष्णुपु० अं० ६. अ० ४. श्लो० १८)

इत्यादिस्मरणाच्च । यद्यपि प्रतिसर्गे परमात्मनि प्रकृतिलयो नात्यन्तिकी स्वरूपप्रतिष्ठा, 'तम आसीत् तमसा गूढमग्रे प्रकेतम्', 'आसीदिदं तमोभूतं', 'प्राधानिकं ब्रह्म पुमांस्तदासीत्' इत्यादिविरोधात् । किन्तु विवेचनीयस्वरूपहानेन स्वरूपप्रतिष्ठैव । 'तमेकीभवती'ति हि परेणापि श्राव्यते । एवमत्रार्थापौष्कल्येऽपि लयशब्दार्थैकरूप्योपपत्तेः । अत एव सुप्तिप्रलयादौ पुरुषस्य स्वरूपापत्त्यवसानोऽपि लयः कियताप्यनुपाख्यभेदगन्धेनानुविद्ध इति मुक्तिरात्यन्तिको लयः इति विशेष्यते । एतेन 'ब्रह्मैव सन् ब्रह्माप्येती'ति व्याख्यातम् । एवञ्च प्रलये 'हिंसा हिंस्रे' इत्यादिसवासनकर्मान्वितजीवबहुत्वदर्शनात् । अत्र लयशब्दार्थभेदे शक्तिभेदकल्पनालक्षणान्तरापत्तेः । सर्वप्रयोगानुगुण्येन मोक्षेऽपि विसदृशावस्थाहानेन कारणत्वधर्मिणा संश्लेषो लय इत्यादिमुग्धदासजनगर्धना तान्त्रिकस्य व्युदस्ता । 'ब्रह्म वेद ब्रह्मैव भवती'ति च मुक्तौ स्वरूपापत्तिमात्यन्तिकीं श्रावयति ॥

---

१. 'व', २. 'ष्ट', ३. 'ते। न' ख. पाठः.

ब्रह्म वेद ब्रह्मैव भवतीतिश्रुत्यर्थः।

यत्तु ब्रह्मपर्यन्तस्वरूपाविर्भावपरमिदं वाक्यं, मुक्तस्य ब्रह्मसाम्येन प्रकाराभेदपरं वेति। तत्र। भवतिर्हि नाविर्भावकर्मा। आविरिति चाध्याहारे गौरवाद्, 'ब्रह्मैव भवती'ति स्वरूपावधारणविरोधाच्च। ब्रह्मसमानाकारत्वे ब्रह्मशब्दस्यामुख्यत्वात्। न च सोऽयं व्रीहिरित्यादावपि मुख्यवृत्त्या तज्जातीयोऽयमिति गम्यते। जातिविशेषविशिष्टव्यक्तिवृत्तित्वेऽपि तच्छब्दस्य जात्यंशैक्यावृत्तित्वात्। न चावगतभेदे तात्पर्यं लाक्षणिकं दृष्टमित्यन्यत्रापि तद् युक्तम्। अथ गोशब्द इव गवान्तरे जीवे ब्रह्मशब्दो मुख्यः, किं पुनरुच्यते 'ब्रह्म वेद ब्रह्मैव भवती'ति। निसर्गत एव स्वपरिच्छिन्नज्ञानानन्दगुणको जीवः। तत्परिच्छेदस्यौपाधिकत्वोपगमात्। आविर्भूतापरिच्छिन्नज्ञानानन्दादिगुणको भवतीति व्याख्याने च गौरवात्। तत् किं तव प्रागब्रह्म जीवो ब्रह्म भवति। मा भूदागन्तुरवस्थाभेदो मोक्षः। तत्र यदि तस्यैव सतः स्वरूपाविर्भावो ब्रह्म भवतीति गम्येत, गुणाविर्भाव एव किमिति न गम्येत। नैव गम्येत। ब्रह्मण एव भवनान्वयात्। गुणस्य सतो भवनान्वये हि तदाविर्भावो गम्येत। न च ब्रह्मपदवृत्तिनिमित्तगुणस्यास्वतन्त्रोपस्थितस्य भवनान्वयः। अन्यान्वितोपस्थितस्य आकाङ्क्षाभावात्। अपिच मुक्तस्यापरिच्छिन्नज्ञानानन्दगुणत्वेऽपि न जगत्कारणत्वानुगुणब्रह्मत्वमिति प्रवृत्तिनिमित्तापौष्कल्येन हिरण्यगर्भ इव तत्र ब्रह्मशब्दमुख्यत्वानुपपत्तिः। प्रवृत्तिनिमित्तैकदेशेनापि मुख्यत्वे राजमात्रे सम्राडादिशब्दमुख्यत्वापत्तेः। उपस्थितवेद्यब्रह्मविषयत्वसम्भवे ब्रह्म भवतीत्यर्थान्तरकल्पनायोगाच्च। न च ब्रह्मैव भवतीत्येवशब्द इवार्थः 'घ्नन्ति त्वेवैनं', 'विनाशमेवापीतो भवती'त्यादिवत्। तथाच मुक्तस्य ब्रह्मसाम्यमेव बोध्यते, यद् 'विष्णुक्रमान् क्रमते, विष्णुरेव भूत्वे'त्यादिवद् गुणवादो वेति वाच्यम्। तादात्म्यावधारणपरत्वे बाधकाभावात्। अथ प्रकृतिविविक्तादपि केवलात् प्रत्यगात्मनः परमात्मा पृथगुपदिश्यते,

"परः परस्मात् पुरुषात् परमात्मस्वरूपधृक्।
शुद्धः सूक्ष्मोऽखिलव्यापी प्रधानात् परतः पुमान्॥
यस्य रूपं नमस्तस्मै पुरुषाय गुणात्मने।
बुद्ध्यादीनां प्रधानस्य पुरुषस्य च यः परः॥

शुद्धः संलक्ष्यते भ्रान्त्या गुणवानिव योऽगुणः ।
तमात्मरूपिणं देवं नताः स्म पुरुषोत्तमम् ॥"

इति विशुद्धं प्रत्यगात्मानमुक्त्वा,

"अविकारमजं शुद्धं निर्गुणं यन्निरञ्जनम् ।
नताः स्म तत् परं ब्रह्म विष्णोर्यत् परमं पदम् ॥"
"या शक्तिरपरा तव । गुणाश्रया नमस्तस्यै"

(विष्णुपु० अं० १. अ० १९. श्लो० ७६)

इति जडशक्तिमुक्त्वा,

"यातीतगोचरे वाचां मनसां चाविशेषणा ।
ज्ञानिज्ञानपरिच्छेद्या तां वन्दे चेश्वरां पराम् ॥"

(विष्णुपु० अं० १. अ० १९. श्लो० ७७)

इति चिच्छक्तिमात्माख्यामाख्याय,

"ओं नमो वासुदेवाय तस्मै भगवते सदा ।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः ॥"

(विष्णुपु० अं० १. अ० १९. श्लो० ७८)

"नामरूपं न यस्यास्ति योऽस्तित्वेनोपलभ्यते"

(विष्णुपु० अं० १. अ० १९. श्लो० ७९)

'एकः शुद्धोऽक्षरः पुमान्', 'सोऽप्यंशः परमात्मनः' इत्यादौ । अतो मुक्तादपि परमात्मातिरिच्येत । एवं सति मुक्तौ साम्यसाधर्म्यवचनानुग्रहाय ब्रह्मैवेतीवार्थं स्यादिति । उच्यते । साङ्ख्यच्छायानुपातात् तावदमुमंशमुपेक्षिष्यामहे । नेदमर्धजरतीयमुपगन्तुं न्याय्यम् । इदं तर्हि प्रकृतिविशिष्टमर्यादं तावदेकं रूपं जीवस्य यत्राविद्या सुखदुःखादिपरिणामः , यद्रूपेण च जीवः कर्ता शास्त्रार्थवत्त्वादिभिरुच्यते । तदुपहितमर्यादं चापरं यतस्तदव्यभिचरितावभासः । यत्र च श्रूयते 'अथ यो वेदेदं जिघ्राणीति स आत्मे'त्यादि । 'यदात्मा च द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्य' इति सांङ्ख्यैः सङ्ख्यायते । प्रत्ययानुपश्यता च तस्य भेदोपाधिरित्यस्मादेव कारणात्मा हिरुपदिश्यते ।

मायोपहितमर्यादस्यापि परमात्मनः सर्वज्ञत्वादिभेदोपाधेरिष्टत्वादस्माभिस्तद्भेदानपसेधात् । अत एव प्रलयक्रमे 'प्रकृतिर्या मयाख्याता', 'यश्च शुद्धोऽशः परमात्मनः',

"पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि"

(विष्णुपु० अं० ६. अ० ४. श्लो० ३८)

इति लयदर्शनमुपपन्नम् । निष्केवलस्य मुक्तस्य तवापि सर्गप्रलयासम्प्रतिपत्तेः ।

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥"

इति स्मृतेश्च । अदर्शितविषयदृशिसत्तामात्रात्मा तु परमात्मा न भेदाभेदव्यपदेशमर्हति, यत्रेदमुच्यते 'अस्तीत्येवोपलब्धव्यः', 'योऽस्तित्वेनोपलभ्यते', 'सत्तामात्रमि'त्यादि ॥

साम्यशब्दस्यैक्यविषयता ।

यत्तु मुक्तावात्मभेदे साम्यवचनानुग्रह इति । तदपेशलं, निग्रह एव हि, तस्य पारम्यविशेषणात् । नहि भोगमात्रसाम्येन परमसाम्यं भवति, अनन्याधीनत्वसर्वशेषित्वादिबहुवैषम्यात् । नहि परिमाणादिविशेषमनाश्रित्य काचकाञ्चनसाम्यं परममुपैतुं शक्यम् । तत्र भोगेन परमं साम्यमुपैतीति विवक्षायामधिकावापः । अथ 'यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति', 'तेनैतस्यै देवतायै सायुज्यं सलोकतां नयन्ती'त्यादौ भोगसाम्यदर्शने सामान्यसाम्यवचनस्य छागपशुन्यायेन विषयविशेषप्रत्यय इति चेद्, न । 'ब्रह्म वेद ब्रह्मैव भवती'त्यनुगृहीतसन्निहितपारम्यविशेषणपरिच्छिन्नविषयतया व्यवहितभोगसाम्यानुपस्थितेः । उक्ता च मुक्तस्य भोगसाम्यानुपपत्तिः ॥

मुक्तस्य भोगायोगः ।

अपिच मुक्तस्य करणकलेबरयोगाभावे भोगायोगः, रूपान्तरानिरूपणात् । अविद्यामात्रे तद्योगे च संसारादविशेषः । 'आत्मो वै सशरीरः प्रियाप्रियाभ्यामि'ति सङ्कल्पोपादानस्य कर्मोपादानस्य वा भोगार्थस्य देहादियोगस्य

---

१. 'हुगुणवै', २. 'तदत्र' ख. पाठः.

यत्तन्निमित्तहडिनिगलपादप्रवेशनस्येव[1] दुःखहेतुभावापरिहारात्[2] । न चापेत-कर्मावरणमलं नित्यविज्ञानं चक्षुर्मनश्शब्दार्थः, येन 'दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' इति श्रुतेः शरीरानिरपेक्ष एव भोगो मुक्तस्याभिधीयेत । अपूर्वशक्तिकल्पनाप्रसङ्गात् । परेण च 'उपपन्नस्तल्लक्षणार्थोपलब्धेः—' (ब्र० ३. ३. ३०) इति सूत्रे पर्ययणकामचारादिश्रुतिषु कर्मक्षयेऽपि देहसम्बन्धाख्योऽर्थो ह्युपलभ्यत इत्युक्तत्वाद्, मुक्तस्य कामसङ्कल्पाद्युपगमेन तदुपादानस्यान्तःकरणस्यैव मनश्शब्दार्थत्वोपपत्तेश्च । ईश्वरस्याप्यन्तःकरणसमष्टिमयमायात्मकस्य कामसङ्कल्पाद्युपादानस्य मनसोऽभ्युपगमाद्, 'मन आनन्दमि'ति श्रुतेः । तत्तु न भोगहेतुः, परमात्मनो दुःखसम्भेदनियतभोगाभावात् । किं पुनरुच्यते मन आनन्दमिति । भोगहेतुत्वाभाव एव । मन एवानन्दयतीत्यानन्दं यस्येत्यसाधारणव्यपदेशात् । अन्यथा जीवोऽपि मन-आनन्द इति किं विशेष्यते मनआनन्दमिति । यद्वा सृज्यावस्थाभेदोपाधिकज्ञानभेद एव कामसङ्कल्पादिरीश्वरस्य । मुक्तस्य तु स भोगार्थो मनोमूल एवेति न तद्देहाद्यनधिष्ठानं पित्रादिभोगाय क्षमते । 'तन्वभावे सन्ध्यवदुपपत्तेः, (ब्र०४. ४. १३) इत्यस्य च सावष्टम्भे लिङ्गे सत्येव स्वसङ्कल्पायत्तदेहाभावपरत्वात् । अपिच प्रागेव दृष्टानुश्रविकविषयात्यन्तवितृष्णस्य न भोगः पुरुषार्थो युक्तः । अपिच मुक्तस्य पित्रादिसर्गसापेक्षत्वे ब्रह्मानुभवैकभोगत्वहानिः, ब्रह्मणि भोग्यतावैकल्यं पित्रादिकामस्य कर्माधीनता च स्यात् । ननु स्वरूपानन्दः पित्रादिलोकश्च भगवद्विभूतितयानुभूयमानो ब्रह्मानुभवान्तर्गत एव पुरुषार्थः, ब्रह्मणः प्रियतमत्वातिशयनिबन्धनतया च पित्रादिविभूत्यनुकूलत्वस्य ब्रह्मणि भोग्यतावैकल्याप्रसङ्गः, मुक्तपित्रादिकामस्य भगवतो (वा ? व)सुदेवादिपित्रादिकामस्येवाकर्मायत्तता चेति चेद् , न । भोगाय काम्यमानस्य पितृलोकादेरधुनेवासाधारणविकारात्मनैव स्वगादितुल्यभोगत्वौचित्यात् । भगवद्विभूतिभावस्य श्वसूकरादिसाधारण्येन भोग्यतया कामनाविषयवैलक्षण्यावश्यम्भावात् । अन्यथा भगवल्लीलोपकरणैरेव भोगसिद्धौ मुक्तस्य पृथक्कामनावैयर्थ्यात् । तथाच स्वलीलारसभोगाय स्वसृज्यस्यापि पित्रादेः परमपुरुषविभूत्यन्तर्भावादुभयथा भोगो मुक्तस्याधिक इति भोगसाम्योपपत्तिः । एवं मुक्तानामपि

---

१. 'सि', २. 'योजनस्यैव' ख. पाठः.

भोगतारतम्ये मुक्तितारतम्यं प्राप्तम् । तच्चायुक्तम् । यद्यपि सर्वस्यापि सविभूतिब्रह्मानुभवो न विशिष्यते, तथापि प्रियतमपित्रादिविभूत्यल्पत्वबहुत्वकृतप्रीत्यतिशयदर्शनेन वैशेष्यस्यापरिहार्यत्वात् । न च भगवतो लीलारसभोगाय पित्रादिसङ्कल्पः, किन्तु प्राणिकर्मापेक्षयावसीदतो धर्मस्य स्थापनाय,

"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"

इति स्मरणात् । §'लोकानां हितकाम्यया । राज्ञो दशरथस्य त्वं', 'विष्णो! पुत्रत्वमागच्छ' इतीतिहासदर्शनाच्च ।

"सर्वथैव जगत्यर्थे स सर्वात्मा जगन्मयः ।
स्वल्पांशेनावतीर्योर्व्यां धर्मस्य कुरुते स्थितिम् ॥"

इति पुराणाच्च । भोगाय च पित्राादिसङ्कल्पो मुक्तस्य स्वकर्माधीनः स्यात् । न च निरतिशयानन्दतृप्तस्य पितृलोकादिकामाः कथञ्चिदवकल्पन्ते, नापि भोगाय तत्र तत्र कामचारः ॥

मुक्तस्य ब्रह्मसाम्ये विरोधः ।

अपिच, कथमपि मुक्तस्य ब्रह्मसाम्योपगमे 'न तस्य प्रतिमास्ति', 'न तत्समश्चाभ्यधिकश्च दृश्यते', 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इत्यादिविरोधः । न चाकस्मादन्यविषयं साम्यमन्यविषयश्च तन्निषेध इति व्यवतिष्ठते । परमसाम्यश्रुतिश्च ब्रह्मभावश्रुत्यनुरोधेन व्याख्याता । एवञ्च निरङ्कुशैश्वर्यस्य परमात्मन उपास्यत्वाद् 'यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवती'ति श्रुतेरुपासितगुणप्राप्त्यवश्यम्भावात् । अन्यथान्येनान्यो गुणोऽन्यश्चान्येनाप्यत इति मुक्तावव्यवस्थाप्रसङ्गात् । परमसाम्यमसङ्कोचेन भोगा जगद्व्यापारश्च निरङ्कुशमैश्वर्यमस्तु 'न तस्य प्रतिमे'त्यादिरमुक्तविषये सङ्कोच्यताम् । उताहो परमसाम्यं भोगापहतपाप्मत्वादिविषये साम्यनिषेधश्च जग-

---

१. 'च । स्व' क. पाठः.

---

§ वाल्मीकिरा० बाल० स० १५. श्लो० १८; २०.

व्यापारविषये सङ्कोच्यताम्, वरन्तूभयनिषेधात् साम्यनिषेध एवामुक्तविषये सङ्कोच्यतामिति न प्राप्नोति, परमसाम्यस्य तद्भूयावसायित्वोपगमात्। न चैवं 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च' (ब्र० ४. ४. १७) इति न्यायविरोधः। यद्धि प्रकरणं ब्रह्मणः सन्निधिर्वा तदुभयं हि मुक्तस्यापि, तादात्म्यादिति वाच्यम्। परमतेऽपि मुक्तस्य परमसाम्ये ब्रह्मणोऽन्यस्य वा प्रकरणादिति नियन्तुमशक्यत्वाद्, मुक्तस्य स्वशब्देनाप्रकृतत्वेऽसन्निहितत्वेऽपि 'समानमितरच्छ्येनेन' इति श्येनवै(शि?शे)षिकाङ्गस्य *इषाविव परमसाम्यवचनेनैव जगद्व्यापारस्यातिदेशानिवारणात्। एवं हि ब्रह्मलक्षणातिप्रसङ्गो लाघवानुगृहीतकारणैकत्वश्रुतिविरोधश्च नास्माभिः समाधेयः॥

सम्पद्याविर्भाव इत्यादिसूत्रावचारः।

वस्तुतस्तु 'सम्पद्याविर्भावः स्वेन शब्दात्' (ब्र० ४. ४. १) 'स एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति स्वरूपाविर्भावमेव विद्याफलमाचष्टे सूत्रकारः। न चेह शरीरात् समुत्थानं परंज्योतिरुपसम्पत्तिः, स्वरूपाभिनिष्पत्तिश्चान्यान्यार्थाः क्रियाः पूर्वापरकालाश्च विवक्ष्यन्ते, विशेषाभावेन शब्दविकल्पमात्रत्वात्। नहि शरीरात् समुत्थानं पञ्जरादिव पक्षिणोऽमुद्गमनमात्मनो निरुपाधिकस्य सम्भवति, सोपाधेश्च सम्प्रसादत्वस्वरूपाभिनिष्पत्त्योरयोगात्। अथ सम्प्रसत्स्यन् सम्प्रसादः सोपाधिरेव समुद्गम्य देशविशेषे परं ज्योतिरुपसम्पद्योपाधिप्रहाण्या स्वेन रूपेणाभिनिष्पद्यते, 'तस्य तावदेव चिरमि'ति कालविशेषस्येव देशविशेषस्याप्यपेक्षोपपत्तेरिति चेद्, नैं। 'न तस्य प्राणा उत्क्रामन्ति', 'अत्र ब्रह्म समश्नुते' इत्यादिगतिनिषेधात्। स चायमुपपादयिष्यते। अथ शरीरात् समुत्थानमनात्मन्यात्माभिमानाविद्यानिवृत्तिरुच्येत, न सा स्वरूपाविर्भावादतिरिच्यते, विद्यया निरुपाख्यरूपभाविन्या अविद्याया निवृत्त्यनतिशेषात्। न च प(रं?र)ज्योतिरुपसम्पत्तिरपि समीपगतिमात्रम्। 'समभेदे च सम्यक्त्वे' इति विवक्षितसमर्थोपपत्त्या तादात्म्यापत्त्यवसायित्वात्। एवं हि परमं सामीप्यं, प्रत्यगात्माव्यतिरेकात्। अतः स्वेन रूपेणाभिनिष्पत्तिरेव प्रागवस्थामपेक्ष्याविद्योत्तीर्णतया

१. 'न्याः पू', २. 'न तस्य' ख. पाठः.

* ज्योतिष्टोमविकारो यागविशेष इषुनामकः।

परंज्योतिरात्मब्रह्मभावापत्त्या च व्याख्यायते । यथा आवाय प्रवाय तन्तून् वयतीति वानमेव व्याख्यायते, क्रियान्तराभावात्, तद्वत् । दृष्टान्ते च 'तद्यथैतान्याकाशात् समुत्थाये'त्यादौ शरदादौ विशदविविक्तरूपस्य वाय्वादेराकाशात् समुत्थानं स्वोपादानतत्स्वरूपपरंज्योतिरुपसम्पत्तिः स्वेन रूपेण पुरोवातादिभावेनाभिनिष्पत्तिश्च न तद्रूपव्यक्तिभावव्यतिरेकेण शक्याधिगन्तुम् ॥

ब्राह्मेण जैमिनिरित्यादिसूत्रार्थः ।

तच्च स्वरूपं 'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः', 'चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः', 'एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः' (ब्र० ४. ४. ५, ६, ७) इति त्रिसूत्र्या निरधारि । अत्र यद्यपि नोभयरूपविरोधेन पक्षौ जैमिन्यादेः, किन्तु प्रकाशात्मना नित्याभिनिष्पन्नोऽपहतपाप्मत्वादिगुणाष्टकविशिष्टात्मना मुक्तावभिनिष्पद्यते, 'कृत्स्नः प्रज्ञानघन एवे'त्यवधारणान्यथासिद्धेरिति पक्षौ जैमिनेः । औडुलोमेस्तु विपर्यस्तरूपहानेन तात्त्विकचितितन्मात्रब्रह्मात्मनाभिनिष्पद्यते, स्वेन रूपेणेति स्वकीयप्रवृत्तिव्यवधानायोगात्, परोपाधिनिरूप्यस्यापहतपाप्मत्वादेरभाविकत्वौडुपदेश्यात्मस्तुत्यादिभिरुपन्यासान्यथासिद्धेश्चेति । तथाप्यौडुलोमिपक्षानुज्ञया तत्र मातमुपन्यासादिविरोधं मुक्तस्य ब्रह्मैकात्म्यादमुक्तदशापहतपाप्मत्वादिगुणवैशिष्ट्योपपत्त्या परिहरति बादरायण इत्युपपन्नम् । अत एवोपन्यासग्रहणमर्थवत् । अन्यथा एवमपि पूर्वभावादविरोधमित्येवोच्येत । नहि चितितन्मात्रतामुपगम्य ब्रह्मरूपभाविकत्वोपगमः शक्यः, परस्परविरोधात् । यत्तु विज्ञानघन एवेत्यापातप्रतीतचितितन्मात्रत्वाभ्युपगम एवमपीति । तन्न । सूत्रकृदभ्युपगमादेव तदापातत्वनिरासात् । यदप्यवधारणीयपदार्थशेषभूतैवकारस्वारस्याय न शेषपदजातभङ्गः कार्य इत्यतो विज्ञानरूपत्वमपहतपाप्मत्वादिकं च तुल्यप्रमाणकत्वादेवकारभङ्गेनापि स्वीकर्तव्यमिति तदापातत्वबीजोत्प्रेक्षणमौत्प्रेक्षिकचरणस्य, तदप्यरमणीयम्, अवधारणीयस्वरूपानुपातिनोऽवधारणस्यान्तरङ्गतया परोपाधिनिरूप्यबहिरङ्गगुणबाधकत्वौचित्यात् । अन्यथैवकारानर्थक्यात् ।

---

१. 'की', २. 'त्वानिप', ३. 'धः', ४. 'यस्त्व' ख. पाठः.

अपहतपाप्मत्वादिगुणविशिष्टस्यांशतो जडत्वस्यापि वारयितुमशक्यत्वात्। विज्ञानघन इत्येव स्वरूपमात्रजडत्वव्यावृत्तेः। यथा 'सैन्धवघनो' 'रसघन एवे'ति च। लोकतो रूपद्रव्यत्वादेरविविक्तप्रत्ययतया तद्व्यावृत्तिमनपेक्ष्य फलपुण्ड्रादाविव त्वगस्थ्यजीपादिव्यावृत्त्यैव निर्विशेषदृष्टान्तोपन्यासविरोधात्। अथापि चितितन्मात्रेणाभिनिष्पन्नादन्यत् परं ब्रह्म स्यात्।

"सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते"

इत्युक्त्वा तत्प्रतिष्ठात्वेन

"ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च"

इति परस्य पृथ(ग)भिधानाद् ब्रह्मैव भवतीति च तादर्थ्योपपत्तेरिति चेद्, न। मां च वासुदेवमीश्वरं योऽव्यभिचारेण भक्तियोगेन सेवते स कथं गुणानतीत्याविशेषब्रह्मभूयाय कल्पत इत्यपेक्षिते ब्रह्मणो हि निर्विशेषस्यैव प्रतिष्ठाहमौपाधिको रूपभेदः, अतो मामुपासीनस्य तदेवमात्मभूतं ब्रह्मापेतोपाधिकल्पनमाविर्भवतीत्यभिप्रायोपपत्तौ 'ब्रह्म वेद ब्रह्मैव भवती'त्यैकार्थ्यस्वारस्यभङ्गेनार्थभेदकल्पनानवकल्पनात्। तदेवमाविर्भूतचितितन्मात्रब्रह्मात्मन एव मुक्तस्य ब्राह्मरूपमपि कथञ्चिदुपयतो बादरायणस्याविद्यादृष्ट्यापादितजगद्व्यापारो न प्रत्याचिख्यासितः। दहरादिसगुणोपासनामात्रेण तु मुक्तदेशीयस्य तत्क्रतुन्यायप्रसञ्जितोऽसौ निराचिकीर्षित इति गम्यते। तत्क्रतोरहङ्ग्रहालम्बनस्यैव ब्रह्मप्राप्तिर्न प्रतीकालम्बनस्येत्येव तत्क्रतुन्यायोपपाद्यं न निरवग्रहैश्वर्यम्। 'न तत्समश्चे'त्यादिनिषेधाद्, नानेश्वरविरोधाच्चेति। सौत्रं च मुक्तस्य प्रकरणासन्निहितत्वमुक्तन्यायमाक्षिपति, उपजीव्यत्वात्॥

निर्गुणविद्यायामैश्वर्योक्त्यन्यथासिद्धिः।

तस्यास्य मुक्तकल्पस्य सङ्कल्पादेवाभिरुचितदेहेन्द्रियादियोगः पितृलोकादिभोगश्च स्यात्। कर्मसमुच्चितोपासनावर्जितेश्वरसङ्कल्पादेव तस्य सत्यसङ्कल्पत्वाद्याविर्भावेन तदविघातात्। परममुक्तस्य तु सशरीरत्वे भोगैश्वर्ये च बाधिते 'स एकधा भवति त्रिधा भवति', 'स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा', 'कामान्नी कामरूप्यनुसञ्चरन्' इत्यादिकायव्यूहपर्ययणजक्षणादि निर्गुणविद्याविषयेऽपि प्रशंसार्थमुपादीयते। यद्धि ब्रह्म कारणात्मनैकधा भवति सृष्ट्या चानेकधा, तन्मुक्त एव तद्भूतत्वात्॥

अविभागेन दृष्टत्वादितिसूत्रार्थः ।

तथाच सूत्रम् 'अविभागेन दृष्टत्वात्' (ब्र० ४. ४. ४) इति स्वरूपेणाभिनिष्पन्नो ब्रह्माविभागेन भवति, 'अहं ब्रह्मास्मी'ति तादात्म्यदर्शनादिति । परस्य तु स्वात्मनो विभक्तस्य ब्रह्मणोऽविभागेनानुभवो भ्रमः स्यात्। प्रकारतया स्वात्मनो दृष्टत्वादिति च विभागस्य दृष्टत्वाद् विरुद्धो हेतुः, अविभागे तस्यैव प्रकारप्रकारितायोगाद् अध्याहारदोषाच्च, तत्त्वमसीत्याद्यसामञ्जस्याच्चेति ।

एवं यन्नृदेवादिब्रह्मलोकावसानेषु कर्मणा; कामसङ्कल्पेन वोपनीतानुच्चावचान् विषयानुपभुञ्जानः पर्येति, तदयमेव सर्वात्मकत्वात् । आत्मा ह्येषां स भवतीति । एतेन कामान्नित्वादि व्याख्यातम् । नह्युपजनमिदं शरीरमस्मरतो निवृत्ताविद्यस्याकरणकलेवरस्याहत्य पर्ययणजक्षणरमणादि सम्भवति, तस्य सर्वशो देहाद्यहम्ममाभिमानमूलत्वात् । तस्मात् साम्यवादेन मुक्तभेदसिद्धौ हताशानामाशामात्रमेव । साधर्म्यस्मरणं च व्याख्यातम् ॥

पुराणाद्यर्थनिष्कर्षः ।

तदेवं

सामानाधिकरण्येन जगतः परमात्मना ।
ज्ञानार्थपरमार्थत्वभ्रान्तिदृष्टत्वभाषया ॥
अविशेषनिषेधेन विशेषाणामशेषतः ।
कारणात्ययकण्ठोक्त्या सर्वत्र परमात्मनः ॥
मृषाविशेषासंस्पृष्टं प्रत्यगेकरसात्मकम् ।
स्मृत्यादिषु परं ब्रह्म प्रतिपाद्यं प्रतीयताम् ॥

सविशेषवचनानि पुनरौपाधिकरूपभेदालम्बनतया न विरुध्यन्ते । तस्यैव विकल्पितानेकविशेषं(विषय)त्वात् । नन्वेवं विषयभेदे विशेषाणां प्रतिपन्नोपाधावनिषेधादमिथ्यात्वं प्राप्तम् । न । सह मायोपाधिना कारणत्वादिविशेषाणां सत्तामात्रात्मनि प्रतिपन्नानां तत्रैव निषेधात् । अन्यथा रज्जुसर्पादिरपि मृषा

---

१. 'षात्' ख. पाठः.

न स्यात् । तद्विधिनिषेधयोरप्यविविक्तविविक्तरज्जुगोचरतया विषयभेदात् । सैव रज्जुरध्यासेन सविशेषा सम्पद्यत इति विधिनिषेधैकविषयत्वोपगमस्तु ब्रह्मण्यपि समानः । कथं प्रमाणभूतं शास्त्रं मृषार्थविषयमिति चेद्, न कथञ्चिद् अमृषाभूतब्रह्मैकात्म्यविषयत्वात् । तत्प्रतिपत्त्यर्थतया च कारणरूपोपादानमित्युक्तम् । तदाश्रयेण च कर्मोपासनाविषयस्तदनुरूपसाधनफलभावावबोधिनो न विगीयन्त इति च । यक्षानुरूपो बलिरिति ह्याभाणकः । यत्तु ब्रह्मणस्तनुरंशो विभूतिः शक्तिरिति चोपपूर्वतया प्रतिपाद्या भेदा न मृषेति युक्तमिति । तन्न । तन्मात्रविज्ञानस्याफलत्वेनाप्रतिपाद्यत्वाद्, भेदातिरेकविज्ञानेन प्रतिपाद्याद्वितीयात्मतत्त्वग्रहो मा प्रतिबन्धीति प्रतिषेधायैव तथानतिरेकप्रतिपादनाविरोधाच्च । जगतोऽक्षयत्वादिवचनं चाधिष्ठानात्मालम्बन(त)या नेयम् । परस्यापि कारणात्मनैव नित्यत्वादेरुपपाद्यत्वात् । 'न तदस्ति विना यत् स्यात्' इति च ब्रह्मण एव चराचररूपविवृत्त्या तदतिरिक्तनिषेधपरं व्याख्यातं भेदापवादनिरूपणे । तादात्म्येऽपि शक्तित्वव्यपदेशगतिरुक्ता । विष्टम्भनं च तादात्म्यादेव, अतदात्मनो निस्सत्ताकतयावसादात् ॥

सूत्राणां सविशेषपरत्वनिरासः ।


यत्तु वैयासिकं शास्त्रं सविशेषपरमेवोपलक्ष्यत इत्यादि । तन्न । जन्मादिसूत्रस्य कारणरूपोपलक्ष्यं ब्रह्मेत्युपपादकतया 'यतो वे'त्यादेर्निर्विशेषतात्पर्यनियामकत्वाद्, ईक्षतिनयस्य च तदुपलक्षणकारणरूपाश्रयत्वात्, अन्तर्यामिनयादेरपि तदाश्रयेणैवोपासनोपदेशोपयोगितया प्रधानपुरुषादिवैलक्षण्योपपादनपरत्वात् । 'अदृश्यत्वादिगुणक' इत्यादि चादृश्यादिशब्दविकल्पापेक्षया केवलमनुवादः । सर्वज्ञत्वादिधर्मोक्तेरक्षरेऽप्रधानत्वस्य भूम्नि च सुखत्वामृतत्वाद्युपलक्षणधर्मोपपत्तेः, उपलक्ष्याप्राणादिभावस्य च सिसाधयिषितत्वात्। नहि धर्मादित्युक्तम् । किन्तु 'धर्मोक्तेरि'ति धर्मोपपत्तेरि'ति च । तेन गम्यते शब्दविकल्पप्रत्येया धर्मा उपलक्षणमेवात्मनः, न वस्तुवृत्त्या धर्मधर्मिभाव इति

---

१. 'च' क. पाठः.

भावः सूत्रकृत इति । सगुणविषयेऽपि विवक्षितगुणोपपत्तेः । 'विशेषणभेदव्यपदेशाभ्यां च—'(ब्र० १.२.२२) इत्यादौ शास्त्रतात्पर्यविषयापेक्षयैवाधिकनिर्देश इति गमयितव्यम् । आनन्दादिगुणोपसंहारन्यायफलञ्चावेदितम् । 'नेतरोऽनुपपत्तेः' 'भेदव्यपदेशाच्च' (ब्र० १. १. १६, १७) इत्यादि च जीवरूपाभिप्रायम् । विशिष्टस्य चिदेकरससत्तात्मनो भेदकल्पनया स्वरूपनिष्कर्षार्थत्वादिति सर्वमवदातम् ॥

जालं विलङ्घ्य पदपश्यमतानुकीर्णं
पाषण्डवाक्कचवञ्चनपारगस्य ।
दास्ये चिराय निरये पततः स्वराजः
स्वाराज्यदो जयति संयमिरामभद्रः ॥



कुतर्कनिरासः ।

यत्पुनरेवमौपनिषदवस्तुनि परिशुद्धे कुतर्कितं तान्त्रिकवराकेण सर्वे भावाः सत्तातिरेकिभिः स्वासाधारणविशेषैः सविशेषा एवानुभूयन्ते । न च निर्विशेषं किञ्चित् केनापि सिध्यतीति । तत्रेदं वक्तव्यम् । यैर्विशेषैर्विशेष्यन्ते भावाः, ये च विशेष्यन्ते ते द्वये किमयं गौरित्यादौ विविक्तबुद्धिनिर्ग्राह्या न वेति । अन्त्ये अबाधितविविक्तबुद्धिनिर्ग्राह्यं वस्तुतावन्मात्रमेवेति क सविशेषता । आद्ये च यदि स्वासाधारणविशेषैरेव ते विविच्येरन्, तेऽपि विशेषा विशेषान्तरैरित्यनवस्था । अथ सत्तामात्रेण, हन्त तर्हि स्वतो विविच्यमाना भावाः सर्व एव निर्विशेषाः । अथापि धर्मधर्मिभूता एव भावा निर्भासन्ते, तदेवैषां सविशेषत्वमिति चेत्, तथापि निर्विशेषवस्तुसत्त्वं तावदमत्यारूढेयं धर्मधर्मिभावस्य परस्परोपाधिकत्वात् । न खलु धर्मितैकस्वभावा धर्मैकस्वभावाश्चान्येऽन्ये भावा व्यवतिष्ठन्ते, मृद्धर्मो घटादिर्धर्मी च घटत्वादेरित्यवस्थानात् । एवं धर्मधर्मिभावस्यापि वस्तुस्वरूपविविक्तावभासतया निर्विशेषवस्तुनिर्भासो दुरपह्नवः । अन्यथा धर्मादिभावावभासोऽपि कस्य स्यात् । अथायं तर्को न प्रमाणम् । प्रमाणं च सर्वं भावानामितरेतरविशेषितरूपमात्रा-

वभासीति न निर्विशेषसिद्धिरिति चेत् । न । तर्कस्य प्रमाणानुग्राहकत्वाद्, गवादिप्रत्यक्षस्य जातिव्यक्त्यादिस्वरूपावभासित्वानुभवेन विशेषितरूपमात्रावभासित्वासिद्धेश्च । अन्यथा तस्य तद्विपरीतविषयतर्कानुग्राह्यत्वासम्भवात् । सर्वं ज्ञानं सविशेषवस्तुविषयं, सविषयत्वादिच्छादिवदित्यनुमानस्यापि विशेषविशेषिवस्तुस्वभावविवेचकत्वेन निर्विशेषसिद्धिः । अथ विविच्यत्यपि विशेषविशेषिणावनुमितिरन्योन्यविशेषितावेव निर्भासयतीति चेद्, न । अस्या एव स्वस्यामपि सविशेषवस्तुविषयकतालम्बनत्वेन स्वयमेव स्वविषयविशेषादिविवेचकतया निर्विशेषविषयत्वावश्यम्भावात् । अन्यथा यैर्विशेषैर्ज्ञानविषयवस्तूनि विविच्यन्तेऽनुमित्या, तेषामपि स्वविषयतया विशेषान्तरैर्विवेचनेऽनवस्थानन्त्यात् । न चैवं प्रत्ययमात्रस्य निर्विशेषवस्तुविषयत्वे विशिष्टज्ञानानुपपत्तिः, परोपाधिव्यपेक्षसम्बन्धिरूपावभासित्वस्याप्युपगमात् । सामग्रीसमावेशेन विज्ञानानामितरेतरसम्बन्धिरूपनिष्कृष्टनिर्विशेषस्वरूपमात्रावभासपर्यवसानानुपपत्तेः । अत एव वस्तुनो न द्वैरूप्यापत्तिः । स्वतो निर्विशेषस्वभावस्य परोपाधिना सविशेषत्वोपपत्तेः, वियतः स्वतोऽनन्तस्य पाशाद्युपाधिना परिच्छेदानुभवात् । किन्तु परोपाधिनिबन्धनमपि सम्बन्धितारूपं सविशेषत्वं निर्विशेषवस्तुस्वरूपतुल्यबलं बाधकाभावात् । परत्र त्वौपाधिकं रूपं बाध्यमिति विशेषः । एवंच रजतत्वादिविशेषबाधे तन्निर्भाससामग्रीवैकल्येन शुक्तिज्ञानस्य शुक्तिमात्रावभासपर्यवसानवदशेषविशेषबाधे वस्तुविज्ञानं निर्विशेषस्वरूपमात्रावभासावसायि निर्विकल्पकं भवति यथागमिकं ब्रह्मात्मापरोक्षविज्ञानम् ।

नचैवं वस्तूनामविशेषस्वभावत्वे परस्परनिष्कर्षो न स्यात् । न खलु स्वस्य स्वतो निष्कर्षः । कस्य हेतोः । स्वतः स्वस्याविशेषत्वाद्, एवमन्यस्येऽपीति वाच्यम् । सर्वस्यैव स्वत एवासङ्कीर्णस्वभावत्वात् । अन्यथा विशेषा एव कथं व्यवतिष्ठेरन् । वनसिह्मन्यायेन भावानामितरेतरस्य स्वभावसम्बन्धादेव व्यवस्थेति चेद्, न । तस्य व्यभिचारेणानियामकत्वात् । एकस्यैव गन्धरसादिनानाविशेषसम्बन्धाद्, अनुगतविशेषस्यैकस्यानेकसम्बन्धाच्च, तत्तदसाधारणस्वलक्षणव्यवस्थायाः स्वभावैकनिबन्धनत्वस्यावश्यवाच्यत्वात् । तथा च न्यायिनोऽप्याहुः — किञ्चिद्वस्तु स्वत एव विलक्षणमिति । विशेषान्तराश्रयणे चानवस्थैव । एवंच

विशेषा यदि सत्तातो विविच्येरन् प्रमाणतः ।
तां सत्तां तद्वसन्तस्ते न विशिष्युः कथञ्चन ॥
अथ ते न विविच्येरन् सत्तैकैव प्रमीयते ।
कैः कस्य सविशेषत्वमेवं सति निरूप्यताम् ॥
तस्मात् सत्तैकमेयत्वे सर्वमानेषु निष्ठिते ।
सम्बन्धिरूपनिर्भासस्तत्र बुद्धेरुपप्लवः ॥

नहि द्विरवभासो वस्तूनामुपगम्यते प्रथमं निर्विशेषावभास इति, येन सर्वप्रमाणविज्ञाने निष्कृष्टसत्तामात्रावभासे विशेषबाधः प्रसज्येत । किन्तु द्विरूपावभासः । तत्र सम्बन्धिरूपभानसामग्रीसमावेशेन बुद्धेरविशेषवस्तुमात्रावभासपर्यवसानमित्युक्तम् । एवं विषयानुभवयोरपि विषयालोकयोरिव विविक्तस्वरूपावभासगर्भ एवान्योन्यरूपितत्वावभासः । अन्यथानालम्बनतदवभासानुपपत्तेः । अनुभवस्य सकर्मकत्वादिस्वभावता च निरासिष्यते । तदेवं सर्व एव भावा निर्विशेषा अनुभूयन्त इत्यतो न किञ्चिन्निर्विशेषमनुभूयत इति मतिवैकल्यमेवायुष्मताम् । न चैवमपि निर्विशेषा विशेषा इत्यादिपर्यायता, विशेषसविशेषत्वं वेति वाच्यम् । पदार्थभेदेऽपि लक्षणीयवाक्यार्थनिर्विशेषत्वव्यवस्थानात् । अत एवानुभवोऽन्यो वा निष्कृष्यमाणः सत्तातिरेकिभिरसाधारणविशेषैरेव निष्कृष्येतेति निरस्तम् । तेषामपि निष्कर्षे विशेषान्तरापेक्षायामनवस्थानाद्, अन्योन्यस्य निष्कर्षणीयशरीरान्तर्गतत्वे तदनन्तर्गतत्वे वान्योन्यनिष्कर्षकत्वायोगाच्च । विशेषविकल्पानुभवेनैव तु स्वरूपमेव निष्कृष्यते । न तु निष्कर्ष एव सविशेषालम्बनः, स्वत एव भावानामसम्भिन्नस्वभावत्वात् । अत एव जात्यादेरपि धर्मिणैव निष्कर्ष इति निरस्तम् । परस्परनिष्कर्षस्य स्वभावायत्तत्वात् ।

यत्तु यदवगतमेव स्वस्य स्वाश्रयस्य वान्यरूपविभ्रमविरोधिजात्यादि, तद्भवेदपि स्वत एव व्यावृत्तरूपनिर्भासितया निर्विशेषव्यपदिष्टम् । न च तथा ब्रह्म सत्तामात्रावभासमित्यतः शुक्तिरिव शुक्तित्वादिभिरन्यरूपविभ्रमविरोधिसत्तातिरेकिस्वभावविशेषैः सविशेषमेव ब्रह्मेति युक्तमिति । नैतद्युक्तम् । ब्रह्मणः स्वरूपाज्ञानमेव हि जगदाकारविभ्रमनिबन्धनम् । न तस्मिन्नवगते तद्विशेषाज्ञानम्, अवभासमानस्यैव तस्य निसर्गतोऽविद्यया जगदाकारावभासि-

१. 'र', २. 'पि' ख. पाठः.

त्वात्। आगमावगते तु तस्मिन् सर्वविभ्रमबाधेन निर्विशेषसत्तामात्रपरिशेष एव, 'यत्र त्वस्य सर्वमात्मैवाभूदि'त्यादिश्रुतेः। ननु द्विरूपावभासित्वाद् विभ्रमस्य ब्रह्मणापि भासितव्यम्। सत्यम्। भासत एव ब्रह्म, अज्ञाततयैव विभ्रमाधिष्ठानत्वात्। भासते च तदज्ञातं चेति विप्रतिषिद्धम्। न विप्रतिषिद्धम्, अज्ञाततयैव स्वतो भानात्। अथ स्वतः परतो वा भासमानस्याज्ञातता रूपभेदोपपाद्येति ब्रह्मापि सविशेषमिष्येत। अज्ञातरूपभेदसत्त्वे मानमन्विष्येत। ननु सविषयकाज्ञानानुभव एव। तत्रापि यदि विषयो भासेत यदि वा न, कस्याज्ञातत्वमनुभूयेत। तस्मादज्ञाततयावभासो न तद्विरोधि। इदं रजतमित्यादावपि शुक्तिकादेरेवाज्ञाततयेदमित्यवभासात्। विभ्रमावभासस्याज्ञातविशेष्यकत्वनियमात्। इदं जानामि न शुक्तिं, चैतन्यं जानामि न ब्रह्मात्मानमिति ज्ञातत्वाज्ञातत्वव्यवहारस्य च कथञ्चन भेदकल्पनया निर्वाह्यत्वात्। केवलस्वरूपावभासस्तु तदज्ञानादिविरोधी[1]। मानवृत्तिरन्यतो वा अतद्रूपभानसामग्रीवैकल्ये शुक्तिरूपावभासस्य तदज्ञानादिविरोधित्वदर्शनात्। तथाच ब्रह्मणः स्वात्मनि सर्वविभ्रमविरोधिस्वरूपावभासावसितत्वादात्मनोऽपि निष्कर्षकधर्मैः सविशेषत्वमापतद् दुष्परिहरमिति प्रत्युक्तम्। एतेन विपर्यस्ताकारविरोधिविशेषविषयं ब्रह्मज्ञानं बाधकमिति तस्य पारमार्थ्ये सविशेषता। अपारमार्थ्ये च पलाशकुसुमदावत्वभ्रमबाधकस्य वृन्तभ्रमरत्वभ्रमस्य वृन्तत्वाविज्ञानेनेव ब्रह्मणि जगद्रूपबाधकस्य विशेषान्तरविभ्रमस्य विशेषान्तरविज्ञानेन बाध्यत्वे तस्याप्यपारमार्थ्ये तद्भ्रमनिवर्तकान्तरापेक्षायामनवस्थेत्यादिदूषणमपास्तम्। स्वरूपावभासस्यैव ब्रह्मणि यावद्विशेषविभ्रमविरोधित्वात्।

यत्तु निर्विशेषत्वसाधकनिवृत्तौ तदनिवृत्तौ वा सविशेषत्वमेवेति। तन्न। नहि हैतुकं ब्रह्मतत्वमाचक्ष्महे। आगमिकं तु, 'नावेदविन्मनुते तं बृहन्तं,' 'तं त्वौपनिषदं पुरुषमि'त्यादिश्रवणात्। आगमार्थपरिशुद्धये च तदवष्टम्भप्रवृत्ता हेतव उपजीव्यन्ते। ब्रह्म निर्विशेषं, स्वरूपावगतिबाधनीयाशेषविशेषावभासत्वात्। यद् यद्रूपावगतिबाधनीययद्विशेषावभासं तत् तद्रहितं, यथा शुक्त्यादि रजतत्वादिरहितमित्याद्याः॥

---

१. 'धि', २. 'हा' क. पाठः.

यत्रत्वस्येतिश्रुत्यर्थः ।

न चासिद्धिः, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिश्रवणात् । न हि सर्वस्यात्मभवनं क्रियानिर्वर्त्यमिहोच्यते मृद इव घटभवनम् । किन्तु ब्रह्मात्मतत्त्वसाक्षात्कारे विशेषरूपबाधेन सत्तामात्र-परिशेषः सर्पधारादेरिव रज्जुतत्त्वज्ञाने तद्भावः । तथा च तत्त्वविज्ञाने कर्तृकरणादिनिखिलविशेषाक्षेपादशेषविशेषबाधस्थिरीकरणात् । निर्विशेषत्वा-दिविशेषा अप्यनुमानेन विधूयन्ते अन्यथोपजीव्यागमविरोधात् । न चैवं साध्यविरोधादुत्पतनहतस्वभावमनुमानमेव न प्रवर्तेतेति वाच्यम् । अभावो न भावाभावधर्मी, अभावत्वात् व्यतिरेकेण घटादिवत् । जातिर्न स्वव्याव-र्तकधर्मवती, स्वरूपावगत्यैव स्वस्वाश्रयान्यतादात्म्यविभ्रमविरोधित्वाद्, व्यतिरेकेण व्यक्तिवदित्याद्यभावप्रसङ्गात् । अथ पुनर्वैकल्पिकसाध्यसाधनो-पाश्रयेण निषेधानुमितिरवर्यन्ती साध्यसाधनधर्मभेदबाधेन स्वरूपमात्रालम्बना पर्यवस्यति, नापर्यवसिता विकल्पोपाश्रयमनुमानं बाधते । पर्यवसितायां पुनरस्यामनुमानानपेक्षैवेत्युच्येत, तथैव प्रकृतेऽपि भविष्यति। अव्यभिचारेणो-द्देश्यविपरीतरूपविरोधिस्वरूपसिद्धौ साध्यसाधनसत्त्वासत्त्वयोरनपेक्ष्यत्वात् ।

यत्तु अनग्निमत्त्वंव्यावृत्तो धूमः पक्षेऽनग्निमत्त्वमेव व्यावर्तयति, न त्वा-कारान्तरम् । एवमिहापि घटादिसविशेषव्यावृत्ता निर्विशेषत्वहेतवः सविशेष एव घटादिगतरूपादिविशेषानेव निवर्तयेयुरिति । तत् तुच्छम् । न खलु स्वरूपसता व्यतिरेकसहचारेण साध्यसिद्धिः, अतिप्रसङ्गात् । तद्भ्रमेणान-नुमानप्रसङ्गाच्च । न चैकेनावच्छेदकेन विना व्यक्तयानन्त्ये सति पुरुषायु-षेणापि शक्यः सहचारोऽधिगन्तुम् । एवंच निर्विशेषत्वहेतोरनन्तत्वानन्य-त्वादेरवैन्यादौ विशेष इत्येव रूपादिभिर्व्यतिरेकसाहचर्याधिगमाद् यावत् किञ्चन विशेषत्वावच्छिन्नमनन्तत्वादिहेतुभिर्ब्रह्मणि निवर्तत इति युक्तम् । न चात्मनः क्षणिकत्वादिवादिनः प्रति नित्यत्वादिविशेषालम्बनपर्यवसानमनु-मानं, तस्य त्रिकालसम्बन्धरूपनित्यत्वासम्भवात् । 'ज्ञः कालकालः', 'अन्यत्र भूताच्च भव्याच्च', 'यस्मादर्वाक् संवत्सरः' इत्यादावात्मनः कालातीतत्वाव-गमात् । किन्तु कालकलानाकलितत्वादिविकल्पमुखेन क्षणिकत्वादिविरोधि-स्वभावावलम्बनावसानं प्रत्यभिज्ञानुगमाव्यावृत्त्यादिनोपपाद्यते ॥

---

१. 'स्य सा', २. 'द्वयात्', ३. 'न' स्य पाठः

प्रज्ञानघनएवेतिश्रुत्यर्थः ।

एवं स्वप्रकाशत्वाद्यनुमानमप्यप्रकाशत्वादिविरोधिस्वभावालम्बनावसानमूहनीयम् । अन्यथा स्वप्रकाशत्वादिविशेषाणामपि स्वप्रकाशत्वे कल्पनागौरवाद्, वेद्यत्वे च तेषामात्मनैवात्मनोऽपि वेद्यत्वापत्तेः । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'त्यादिश्रुतिविरोधाच्च । यद्यपि दृष्टान्ते तदन्तर्गतविरोधिरूपान्तरसंवलनमेव व्यावर्त्यते, अनन्तराबाह्यत्वमपि रसघनस्वरूपापेक्षयैवेति दार्ष्टान्तेऽपि तथैव स्यात्, तथाप्य'नन्तरोऽबाह्यः कृत्स्नो रसघन' इत्येव 'प्रज्ञानघन' इत्येव च तत्तदन्तर्गतविरोधिरूपान्तरसंवलननिवृत्तौ तत्तद्रूपेणोभयत्र विशेषान्तरसम्बन्धव्यवच्छेदफलमवधारणमङ्गीकर्तव्यम्, अन्यथा तद्वैयर्थ्यात् । तत्र रसघनस्यैव सैन्धवघनस्य स्यादपि द्रव्यात्मकरूपभेदेन विशेषान्तरसम्बन्धः, विवक्षितांशेन दृष्टान्तोपपादनात् । न त्वागमगम्यस्य प्रज्ञानघनस्यैवात्मनो रूपभेदे मानमस्ति, येन तेन विशेषान्तरसम्बन्धो न निह्नूयते । वस्तुतस्तु लोकतो रसघनैकात्मप्रत्ययतया द्रव्यत्वादिभेदो नास्तीतिकृत्वैव दृष्टान्तश्रुतिवृत्तिरित्युक्तम् । लोकसम्प्रतिपन्नरूपदृष्टान्तेनैव प्रतिपाद्यार्थे बोध्यबुद्ध्यवतारात् । तदेवं प्रत्यस्तमिताशेषविशेष एवात्मनि साध्यसाधनविकल्पेन कुतर्कोपनीततत्तद्विशेषविरोधिस्वरूपमात्रमवस्थाप्यत इति न सविशेषत्वप्रसङ्गः । न वा स्वरूपमात्रसम्प्रतिपत्तौ विप्रतिपत्तिविरोधः, स्वरूपपरिशेषविरोधिविशेषैरेव तदुपपत्तेः । अत एव न सिद्धसाध्यता । कुतर्कितविशेषविरोधिस्वरूपसिद्धिपर्यवसानात् । न च पक्षसाध्यनिर्देशपर्यायता, पदार्थभेदोपगमात् । एवंच[1] निर्विशेषनिष्कर्षकधर्मापारमार्थ्ये सविशेषसङ्कर इति जल्पाकविकल्पजालमनादरणीयम्, स्वत एव स्वलक्षणनिष्कर्षात् । साध्यसाधनविकल्पैरेव कुतर्कोपनीताशेषविशेषातीतवस्तुस्वभावसिद्ध्यविरोधात् । न चात्मनः सविशेषता शक्या साधयितुम् । साधनविशेषसिद्धौ सिद्धसाधनाद्, अन्यथा हेत्वसिद्धेः । सामान्यविप्रतिपत्तौ च हेत्वतिरिक्तविशेषसाधनस्याप्राप्तकालत्वात् ॥

---

१. 'वं नि' ख. पाठः

यावद्विकारं तु विभाग इति सूत्रार्थः ।

अपिच ब्रह्मणः सविशेषस्वभावत्वे विभक्तत्वाद् विकारत्वापत्तिः । अविभागे सविशेषत्वायोगात् । तथा च सूत्रं 'यावद्विकारं तु विभागो लोकवत्' (ब्र० २. ३. ७) इति । यावद्विकारं विभागो न विकारं व्यभिचरति । तथा च घटशरावोदञ्चनादिवदाकाशादिकमपि विकारो विभक्तत्वादित्यर्थः । न चात्मनि व्यभिचारः, तस्य स्वलक्षणापेक्षया विकारबाधेन ततो विभागासम्भवात् । विकारापेक्षया त्वात्मन एव तद्भावेनाविभागात् । न हि निरात्मको विकारो नाम, यत आत्मा विभज्येत । 'ऐतदात्म्यमिदं सर्वमि'ति च श्रुतिः । अत एव नाज्ञाने व्यभिचारः, असत्त्वापत्त्या सदात्मभेदायोगात्, कारणात्मतया कार्यभेदायोगाच्च । न च जीवेशयोर्व्यभिचारः, तयोरपि कार्यत्वे कृतहानसर्गविपर्यासादिप्रसङ्गादिति वाच्यम् । भेदो हि नाम प्रतियोगिसापेक्षं स्वरूपमेव । तच्च जीवत्वमीशत्वं चौपाधिकमिति अनुपाधिभिन्नत्वस्य हेतुत्वेऽव्यभिचारात् । भगवत्पादास्तु अमुमेवातिप्रसङ्गमाशङ्क्य

"यदि ह्यात्मापि विकारः स्यात् तस्मात् परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् । तथा च शून्यवादः प्रसज्येत"

इत्यादि वदन्तो बाधकाभावे सति विभागं विकारत्वहेतुं मन्यन्ते । न च बाधकाभावमात्रं हेतुः, साधकाभावेन सत्प्रतिपक्षत्वात् । न च बाधकाभावे सति सत्त्वम्, उपायान्तरत्वात् । मिश्रास्तु आत्मान्यत्वे सतीति विशेषयन्ति । न चात्र व्यर्थविशेष्यता यावतामुत्पत्तौ बाधकम् । यथाज्ञानोत्पत्तावनवस्था । आत्मोत्पत्तौ च हेत्वनुपपत्तिः, असतो वा सद्विशेषस्य वासन्मात्रहेतुत्वायोगात् । सामान्यादेव विशेषोत्पत्तिदर्शनात् । अत एव न सन्मात्रं हेतुः, असत्यतिशये कार्यकारणत्वायोगात् । नियतपौर्वापर्यप्रयोजकं पौर्वापर्यमेवेति वदतो दासेरकस्यात्माश्रयत्वात्, पूर्वोत्तरज्वाला असत्यतिशयेऽपि हेतुहेतुमद्भावे निदर्शयतो मूढस्योपेक्षणीयत्वाच्च । तावदन्यत्वलाभार्थत्वात् । असति बाधके वियतोऽप्यनुप्रवेशे गौरवात् । तस्माद् यावतामुत्पत्त्यसम्भवः, तावदन्यत्वमेव हेतुरिति न किञ्चिद् व्यर्थमिति ॥

---

१. 'स्वेत्यपे' ख. पाठः.

परमतम्।

यत्त्वाह— 'ऐतदात्म्यमिदं सर्वमि'त्याकाशस्यापि विकारत्ववचनाद् यावद्विकारं 'तत् तेजोऽसृजते'त्यादावनुक्तोऽपि विभाग उत्पत्तिरुक्तैव भवति। यथा लोके सर्व एते देवदत्तपुत्रा इत्यभिधाय केषाञ्चिदुत्पत्तिवचनेन सर्वेषामुत्पत्तिरुक्तैव स्यात्, तद्वदिति। तन्न। विभागपदस्योत्पत्तावप्रसिद्धेः। 'ऐतदात्म्यमिदं सर्वमि'ति चोक्तविशेषोपसंहारस्तत्त्वमसीतिमते तस्य जीवसाधारण्येनाविकारवचनत्वात्। अन्यथा तस्यापि परस्मादुत्पत्तिरुक्तैव स्यादिति 'नात्माश्रुतेः' (ब्र० २. ३. १७) इत्यादिन्यायविरोधः। कश्चित् तु वियतोऽनुत्पत्तिमेव सिद्धान्तं मन्यमानो वैशेषिकपक्षीयः कथमाकाशनित्यत्वे ब्रह्मणोऽद्वितीयत्वमित्याशङ्क्य यावद्विकारं तु विभागः, न तु ब्रह्मणो जगद्विकारयत्नाभावेऽप्याकाशाद् विभागः, लक्षणान्यत्वाभावात्। क्षीरोदकयोरिव संसृष्टयोरविभागादित्यादि जल्पति। तद् बालिशैरपि जुगुप्सितव्यम्। न हि जगद्विकारयत्नेऽपि संयोगविरोधिविभागो विभुनोरात्माकाशयोरुपपद्यते। स्वभावभेदस्तु विभागस्तदभावेऽपि स्यात्। सर्वदैवात्मत्वानात्मत्वलक्षणान्यत्वात्। सदैव सर्वज्ञब्रह्मणः स्वाकाशविभागावगमप्रयोजकवैलक्षण्यावश्यम्भावाच्च। संसृष्टयोरपि नीरक्षीरयोः स्वभावविभागे सत्येवास्मदाद्यविवेकस्य विभ्रममात्रत्वात्। न चाद्वितीयमित्यविवेकविभ्रमापेक्षयेति युक्तम्। सर्वज्ञब्रह्मणो विभ्रमायोगाद्, जीवस्य चाविकारकालविभ्रमायोगात्। नापि स्वविकारापेक्षयाद्वितीयमिति, तत्र दृष्टान्ते लोकवद् मृदेकाद्वितीयासीदित्यादिवदित्यनुन्मादिना[1] शक्यं वदितुम्। लक्षणानन्यत्वेऽनौपचारिकमद्वितीयत्वं प्रतिज्ञाय स्वविकारापेक्षमद्वितीयत्वं लोके निदर्शयतः सूत्रकृतोऽपि तवेवासम्बद्धप्रलापित्वप्रसङ्गादित्यास्तां तावत्॥

नस्थानतोऽपीतिन्यायः।

अपिचात्मनः सविशेषत्वे 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (ब्र० ३. २. ११) इति न्यायविरोधः। तत्र पृथिव्यादिस्थानोपाधिकस्यापि विशेषस्य प्रतिषेधात्। अत्राह— सविशेषमेव ब्रह्मानेनोपपाद्यते। ब्रह्मणो हि

---

१. 'दिश' ख. पाठः.

तत्तन्नियाम्योपाधिष्ववस्थानतो जीवस्येव दोषसम्बन्धशङ्कायामिदमुच्यते न स्थानतोऽपि दोषसम्बन्धः । यतः सर्वत्र श्रुतिस्मृतिषूभयलिङ्गं निरस्तनिखिल-दोषतासमस्तकल्याणगुणात्मतारूपोभयलक्षणं ब्रह्मावगम्यते । 'एष आत्मापहत-पाप्मा', 'निरवद्यं निरञ्जनं', 'सत्यकामः सत्यसङ्कल्पः', 'सर्वज्ञः सर्ववित्', 'समस्तकल्याणगुणात्मकोऽसौ', 'सकला न यत्र क्लेशादयः सन्ति परावरेशे' इत्यादिष्विति ।

तत् तुच्छम् । 'सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' (ब्र० १. २. ८) इत्येवास्य गतार्थत्वात्, तत्रापि ह्यपहतपाप्मत्वमेव हेतुः । अथापहतपाप्मत्वे-नाकर्मनिमित्तेऽपि देहावस्थाने तन्निबन्धनोऽपुरुषार्थसम्बन्धो दुष्परिहरः । नहि राजापराधनिमित्ते वा चोरस्य स्वच्छन्दनिमित्ते वा राज्ञो दुर्गन्धादिदुःख-भूयिष्ठकारागृहावस्थानेऽनर्थसम्बन्धो विशिष्यते । जीवस्यापि हि देहयोगैकहे-तुरनर्थयोगः । अन्यथा देहयोगमनापाद्यैव कर्माणि भोगमर्पयेयुरित्येवमिहाभ्य-धिका शङ्केति चेत्, तर्हि श्रौतापहतपाप्मत्वादेरप्रयोजकीकृतत्वाच्चोद्यपदस्यैव पुनरुपादानम् 'उभयलिङ्गं सर्वत्र हि' इत्यनर्थकं स्यात् ।

अपिच, देहावस्थानप्रयुक्तानर्थासम्बन्धे जीवसाधारणमुभयलिङ्गत्वमप्र-योजकम् । नन्वेतदेव निरस्यते सूत्रेण 'भेदादिति चेन्न प्रत्येकमतद्वचनात्' (ब्र० ३. २. १२) उभयलिङ्गस्यापि जीववदेव देहयोगरूपावस्थाभेदादपुरु-षार्थयोगोऽवर्जनीय इति चेद्, न । 'यः पृथिव्यां तिष्ठन्', 'स त आत्मान्त-र्याम्यमृतः', 'य आत्मनि तिष्ठन् स त आत्मान्तर्याम्यमृतः', इति प्रतिप-र्यायं नित्यत्वस्यावक्तव्यतया तत्तदवस्थानप्रयुक्तदोषसम्बन्धाभाववचनादिति । उच्यतां सकृदेव शतशोऽपि, कथमप्रयोजकतोद्धारः । अनेनातिरोहितोभयलि-ङ्गत्वं सूच्यते, जीवस्तु कर्माविद्यातिरोहितज्ञानादिगुण इति तदुद्धार इति चेत् । हन्तैवमतिरोहितत्वेन हेतुरनेन विशेष्यत इत्यापन्नम् । ततश्च सूत्रकृतोऽविशे-षितहेतुप्रतिज्ञाहानिः प्रतिज्ञान्तरं च निग्रह आपद्येत । अपिच, देहयोगरूपा-वस्थाभेदादित्युपस्थितिकल्पनाक्लेशः, अतद्वचनादिति कल्प्योपस्थितिकापुरुषा-र्थाभावविषयत्वे तत्पदस्य प्रकृतानमर्शस्वारस्यभङ्गश्च प्रसज्येत । अपिच देहयोगादनर्थसम्बन्धानुमाने परस्योभयलिङ्गत्वान्नायो न परिहारः, तस्य माना-

न्तरविरोधेः श्रुतेरसामर्थ्यात् । न च तिरोहितज्ञानादिगुणकत्वमुपाधेः, देहयोगादेव हि सोऽपि तिरोभावः परस्याप्यनुमेयः कर्मवश्यतादिकं च । नन्वप्रयोजकमनुमानम् । देहयोगोऽपि कस्यचिदनर्थाय कस्यचिन्नियमनादिलीलारसाय स्यात् । सर्वमेव हि देशकालपुरुषभेदेन सुखाय च दुःखाय च कोपाय च प्रसादाय चेति । एवं तर्ह्यौत्प्रेक्षिकेन सौत्रहेत्वानर्थक्यमापादितं स्यात् । अपिचैवं निषेध्यस्य स्थाननिमित्तानर्थसम्बन्धस्य प्रागप्रसक्तेरिहाध्याहारगौरवप्रसङ्गः । जीवावस्थानिरूपणप्रसङ्गाज्जीवस्य तत्तत्स्थानप्रयुक्तानर्थसम्बन्धो बुद्धिस्थ इति ब्रह्मणि तस्यायं प्रतिषेध इति यदि कल्प्येत, तत एव श्येनलयोड्डयनाभ्यामित्र नीडस्य जीवलयोद्गमनाभ्यां ब्रह्मणः सविकारत्वमपि स्याद् बुद्धिस्थमिति तस्यायं प्रतिषेध इति किं न कल्प्येत, तथाच सान्दिग्धार्थं सूत्रमापद्येत । अल्पाक्षरमसन्दिग्धं च सूत्रम् ॥

आह च तन्मात्रमितिसूत्रार्थः ।

अपिचैवम् 'आह च तन्मात्रम्' (ब्र० ३. २. ११) इति सूत्रमसङ्गतम् । अत्र हि मात्रशब्दो न वचनविशेषणम्[1] । विषयसमभिव्याहारात् । तत्र तन्मात्रमाह नान्यद् वाक्यान्तरावगतं निषेधतीति व्याख्यानमसङ्गतम् । तदाह केवलमिति हि तदा स्यात् । अथ तन्मात्रमाह नान्यनिषेधमिति व्याख्यायेत, तर्हि 'प्रकाशवच्चावैयर्थ्यम्' (ब्र० ३. २. १९) इति प्रकृतपरामर्शात् प्रकाशमात्रं ब्रह्माह तत्र नान्यनिषेधमिति वैरूप्यमापद्येत । प्रकाशरूपत्वमात्रमाहेति व्याख्याने च प्रकृतावमर्शस्वारस्यभङ्गः । अपिच तन्मात्रमाह 'सत्यं ज्ञानमित्या'दिरिति यदि विशेषो विवक्ष्येत, नैतेनैकेनोभयं क्रियत इति व्यर्थं वचनम् । अथ श्रुतिमात्रम् 'अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञान एवे'त्यादिविरोधादबद्धं वचनं स्यात् । यथाचातो विशेषनिषेधस्तथा व्याख्यातमधस्तात् ।

तस्मात् 'तत्त्वमसी'त्यादिवाक्यार्थप्रतिपत्त्युपयोगितया त्वम्पदार्थे जीवस्वरूपे निरूपिते तत्पदार्थो ब्रह्म निरूप्यते न स्थानतोऽपीत्यादिना । तत्र ब्रह्मणः सविशेषनिर्विशेषोभयरूपश्रवणादेकस्य स्वभावादुभयरूपायोगेऽपि स्था-

---

१. 'म् । अत्र स' ख. पाठः.

नतः पृथिव्याद्युपाधियोगात् सविशेषत्वं भविष्यतीति प्राप्ते न स्थानतोऽपि परस्य तदुभयलिङ्गं प्रतिपत्तव्यम्, सर्वत्र हि ब्रह्मतत्त्वपरेषु 'अस्थूलमनणु', 'अशब्दमस्पर्शं', 'केवलो निर्गुणश्च', 'नेति नेत्यात्मा', 'प्रत्यस्तमितभेदं यत् सत्तामात्रमि'त्यादिषु निखिलविशेषनिषेधो गम्यत इत्युच्यते । एवं सति आह च तन्मात्रं प्रकाशैकरसम् 'अयमात्मानन्तरोऽबाह्य' इत्यादिः । अतोऽपि नोभयलिङ्गमिति प्रकृतविषया हेतुसमुच्चययोजना श्लिष्टा । परस्य तु मात्रपदलभ्यविशेषो वा, अप्रकृतशङ्कानिरासससमुच्चयो वा चार्थ इति क्लिष्टयोजना । नन्वत्र यदि ब्रह्म 'अरूपवदेव तत्प्रधानत्वात्', (ब्र० ३. २. १४) रूपवदुपदेशवैयर्थ्यमित्याशङ्क्य 'प्रकाशवच्चावैयर्थ्यम्' (ब्र० ३. २. १५) सौरादिप्रकाशवदौपाधिको रूपभेद उपासनार्थमुपदिश्यत इति सूत्रिते, तन्मात्रं प्रकाशैकरसमाहेत्यप्रकृतार्थविषयमापद्येत । सत्यम् । शब्दमात्रादपि तु प्रकृतविषयत्वनिर्वाहः

"नालीकासनमीश्वरः शिखरिणां तत्कन्धरोत्थायिनः"

इत्यादिवदिति । नन्वौपाधिको ब्रह्मणः सर्वज्ञत्वसर्वकर्मत्वादिविशेष उपगम्यते । सत्यम्, तस्याविद्यामात्रत्वमपि । तदिदमत्र ज्ञेयब्रह्मण्युपाधितोऽपि सविशेषत्वनिषेधे फलितमिति । गुणविधिनिषेधविरोधे च बलाबलमवोचाम ।

एतेन सकलविशेषमृषात्व*मारम्भणाधिकरणसिद्धम् । न च श्रुतिविरोधसमाधयेऽयमारम्भः, 'सर्वकर्मा सर्वकामः', 'अस्थूलमनणि'त्यादिविधिनिषेधानां विषयभेदेनाविरोधाद्, अपच्छेदन्यायनेयत्वाद् वा । अपिच, विरोधेऽपि 'सर्वगन्धः सर्वरस' इत्यादिर्नागन्धमरसमित्यादिनिषेधायानुवादः, लोकतोऽप्राप्तेः । नोपासनार्थमारोपः, स्वरूपपरवाक्यसिद्धत्वात् । तदर्थभेदाश्रयणेन विधिनिषेधौ नेतव्यौ । अन्यथा गन्धरसादिमिथ्यात्वे निषेधविरोधमवस्थाप्य सर्वगन्धादिशब्दाप्रामाण्यमेवोक्तं स्यादिति प्रतिक्षिप्तम् । नहि गुणविधिनिषेधौ सामान्यविशेषोत्सर्गापवादन्यायनेयौ, तुल्यविषयत्वादित्युक्तम् । नाप्यपच्छेदन्यायनेयौ, अप्रामाण्यशङ्काधिक्यादेव । अतो लक्ष्यलक्षणरूपविषयभेदव्यवस्थार्थोऽयमारम्भः । सा च दर्शिता 'अरूपवदेव हि तत्प्रधानत्वात्'।

* 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र० २. १. १४)

'प्रकाशवच्चावैयर्थ्यमि'ति स्वतो निर्विशेषमेव, औपाधिकस्तु सौरादिप्रकाशस्येव रूपभेद उपासनार्थ इति । यत्पुनः 'अदृश्यत्वादिगुणको धर्मोक्तेः' (ब्र० १. २. २१) इत्यादिसूत्रकारव्यपदेशविरुद्धो निर्विशेषत्वसिद्धान्त इत्यादि । अत्र वक्तव्यमुक्तं पुरस्तादेव । 'सुखविशिष्टाभिधानादेव च' (ब्र० १. २.१९) इत्यत्र च 'कं ब्रह्म खं ब्रह्मे'त्यादौ कंखंशब्दयोरितरेतरान्वयेन नभोवैषयिकसुखव्यावृत्तं यत् प्रस्तुतं तदुच्यते । सुखविशिष्टमिति नभोव्यावृत्तये, सुखरूपेण विशेषितमित्यर्थः । तेन सुखादिवाचिशब्दानां तद्विशिष्टविषयत्वं वदन् सूत्रकारः कथं निर्विशेषत्वं सिद्धान्तयेदिति निरस्तं, शंकंसुखमित्यादिशब्दानां निष्कृष्टविषयप्रसिद्धिविरोधेन विशिष्टविषयत्ववादायोगात् ॥

यदपि 'लिङ्गशब्दस्तावन् ज्ञाप्यातिरिक्ते ज्ञापके प्रसिद्धः । निर्विशेषत्वधर्मश्च नोपगम्यते । तत्र नोभयलिङ्गम्, किन्तु निर्विशेषलिङ्गमेव । निर्विशेषमेवेति क्लिष्टार्थं कल्प्येत । अपिच नोभयलिङ्गम्, किन्तु सविशेषलिङ्गमेवेति किं न भवेत् । सर्वत्र हि निर्विशेषत्वं प्रतिपाद्यत इति चाहार्यम् । सविशेषत्वं प्रतिपाद्यत इत्यध्याहारे को निवारक इत्यादि, तदप्यसारम् । लिङ्ग्यते गम्यत इति लिङ्गशब्दस्य ज्ञाप्यस्वरूपवृत्त्युपपत्तेः । तवापि ज्ञापकधर्मद्वयं प्रतिपाद्यते सर्वत्र श्रुत्यादौ परार्थानुमानवदिति विवक्षिते ब्रह्मणः शास्त्रयोनित्वन्यायविरोधात्, तद्व्रतः प्रतिपादने च ज्ञापकत्वविवक्षावैयर्थ्यात् । स्थानतोऽपि नोभयलिङ्गमिति सामर्थ्यात् सविशेषलिङ्गनिषेधेन निर्विशेषलिङ्गप्रतिज्ञाया आर्थत्वात् । सा च स्फुटिप्यते 'अरूपवदेव हि तत्प्रधानत्वात्' (ब्र०३. २. १४) इति ॥

अरूपवदेव हीतिसूत्रार्थः ।

न च सर्वानुप्रवेशेन सर्वनामत्वेऽपि 'ब्राह्मणो यजेते'त्यादिकर्मवश्यत्वमनेन परिह्रियते अरूपवद् ब्रह्म रूपरहिततुल्यमितीति युक्तं, तत्प्रधानत्वादिति जीवसाधारण्यादप्रयोजकतापातात् । सोऽपि हि देवमनुष्यादिनामरूपभेदेषु प्रधानमिति नामरूपनिर्वाहकत्वेनेति हेतुविशेषणे चाध्याहारगौरवात्, तन्निर्वाहकत्वेन प्रधानस्यापि कोशकारकिणेरिव तत्सम्बन्धप्रयुक्तकार्यस्यानिवार्यत्वाच्च । तस्मात् सत्यपि रूपवदाम्नाने ब्रह्मारूपवदेव प्रतिपत्तव्यं तत्प्रधान-

---

१. 'ना', २. 'स्य' ख. पाठः.

त्वादित्येव समञ्जसम् । तादर्थ्येन च सर्वत्र हि सविशेषलिङ्गनिषेधो गम्यत इति हेतुसिद्धावनध्याहाराच्चेति युक्ता भगवत्पादीयैव योजना । परस्य गुणसूत्रान्तरानानुगुण्यं च वक्ष्यते । तस्मान्निर्विशेषस्य

सर्वमानप्रसिद्धत्वादागमेदम्परत्वतः ।
निर्विशेषं परं ब्रह्म मृषा तु सविशेषता ॥

निर्विशेषविषयस्यापि मानान्तरस्य सविकल्पकत्वं सम्बन्धिरूपान्तरावभाससामग्रीसमावेशनिबन्धनमित्युक्तम् । तेन मानान्तरेषु निर्विकल्प(क)निरासोऽभ्युपगताभ्युपगम एव । आगमिकमात्मविज्ञानं पुनरशेषविशेषनिषेधावष्टम्भेन निर्विकल्पकमुपेयते । यत्तु प्रकृतिप्रत्ययययोगेन पदानामेव विशिष्टार्थविषयत्वमिति । तदप्रत्याख्येयमनन्वाख्येयं च, अखण्डात्मनो वाक्यप्रत्येयत्वोपपादनात् । प्रकृतिप्रत्ययययोगेन हि पदत्वमित्यपि भ्रान्तप्रलपितम् । वैयाकरणस्य स्वादिष्वसर्वनामस्थानेऽन्यस्मिंश्च प्रत्यये परे पूर्वस्य प्रातिपदिकस्यापि पदत्वस्वीकारात्, प्रत्ययलोपेऽपि पदत्वाच्च । लौकिकस्याप्यावापोद्वापाभ्यां पद्यते गम्यतेऽनेनेति व्युत्पत्त्या शक्तं पदमित्युभयोरपि पृथक्पदत्वादिति ॥

प्रत्यक्षादिप्रमाणानामविशिष्टविषयत्वम् ।

अथापि स्यात् — प्रत्यक्षादिसकलप्रमाणस्य विशिष्टविषयत्वानतिवृत्तेरागमादपि विशिष्टमेव ब्रह्माधिगन्तव्यमिति । अत्रैतच्चिन्तयितव्यम् । न तावदागमस्वरसगतिपर्यालोचनया निर्विशेषब्रह्मणि श(क्त्या?क्या)वगमे मानान्तराविशिष्टविषयत्वानिदर्शनेन निवार्या तस्याविशिष्टविषयता । स्वत एव हि प्रमाणानां प्रामाण्यं न निदर्शनापेक्षामिति[2] । नापि मानत्वेन सामान्यतो दृष्टेन विशिष्टविषयत्वमनुमेयम् । उक्तनीत्यागमेन निर्विशेषवस्तुन्यधिगम्यमाने बाधात् । अन्यथागमदृष्टान्तेन मानान्तरस्यैवाविशिष्टविषयत्वमनुमीयेत । मानान्तरविरोधस्तु विवेचनीयः । प्रत्यक्षादीनि हि भूरम्बु तेजो वायुराकाशं गन्धो रसो रूपं स्पर्शः शब्दो रागो द्वेषो धर्मोऽधर्मः सुखं दुःखं जीव ईशो बन्धो मोक्ष इत्येवम्प्रकाराणि । ब्रह्मात्मा सर्वविशेषातीतो निष्केवलस्वभाव इत्येवं

---

१. 'त्वद', २. 'ति मा' ख. पाठः,

प्रस्थितस्यागमस्य नाहत्यैव किञ्चिद् विरुन्धन्ति, भिन्नविषयत्वात् । न खलु भेदा निरवधयो निषिध्यन्ते, येन स्वरूपग्राहिप्रत्यक्षादिना विरुध्येत । नापि सत्त्वेन, देशकालसम्बन्धस्यार्थक्रियाकारित्वस्य वा सत्त्वस्यानिषेध्यत्वात् । स्वरूपेणैव तु ब्रह्मणि निषिध्यमाना भेदा मिथ्या सम्पद्यन्ते, तेषामशेषतः सदेकायतनतया तुल्यदेशकालनिषेधप्रतियोगित्वपर्यवसानात् । क्वचिदपि कदाचिदपि किञ्चिदपि न तादृशनिषेधप्रतियोगीति सामान्यतो मानान्तरावगतमिति चेत्, तथापि नाहत्य ब्रह्मणि नानानिषेधस्य किञ्चिद् विरुध्यते । पर्यवसितं चागमिकनिषेधप्रत्ययमनुपतन्मिथ्यात्वं प्रपञ्चस्य नौत्प्रेक्षिकेण सामान्यतस्तदभावावगमेन निरोद्धुं शक्यं, जात्यैवागमस्य प्रबलत्वात् । व्यवहारविषये मानान्तरस्यैव व्यवस्थाप्यत्वात् ।

"यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानम्"

इत्याद्यागमस्य चोपलक्षणविषयालम्बनत्वात् । मिथ्याशुक्तिरजतादि च स्थापयिष्यते । नहि प्रत्यक्षादीनि ब्रह्मात्मानं विशेषरूपितमभिव्यञ्जयन्ति, विविक्तरूपाग्रहणात् । यथाहि यथास्वसंस्थानसंस्थितौ विविक्तस्वभावनिर्भासावेव शुक्लपटौ सम्बन्धबुद्धिनिर्ग्राह्यौ, न तथा ब्रह्मात्मा पृथिव्यादिविशेषाश्च प्रत्यक्षादिभिर्गृह्यन्ते, येन तैरागमो विरुध्येत ॥

सत्तामात्रग्राहिप्रत्यक्षम् ।

ननु सन् घटः सन् पट इत्यन्या सत्तान्यश्च घटादिः संसृष्टौ भासेते । सत्ता च ब्रह्म । न त्वर्थक्रियादेशसम्बन्धादिः, तस्यापि सत्त्वानुभवात् । सत्ता पुनरसत्त्वविरोधिविकल्पेन सत्यनुभूयते 'असन्नेव स भवति असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद् वेद । सन्तमेनं ततो विदुरि'त्यसत्त्वाविरोधेन सत्त्वनिर्देशात् । न चार्थक्रियादिराहित्यमसत्त्वं शशशृङ्गादेः, येनार्थक्रियादिरपि तद्विरोधितया विकल्प्येत । तत्प्रयोजकतया स्वरूपशून्यत्वस्यासत्त्वस्य पृथगाश्रयणीयत्वात् । अन्यथा शशशृङ्गादेरर्थक्रियादिरेव किं न स्यादिति चेद्, न ।

सत्तातो विविच्यमानस्य निःस्वभावतया विविक्तसंसृष्टभानानुपपत्तेः । न च सत्ता वान्यद् वा स्वत एव सस्वभावम् । प्रतिभावं सर्वानुगतसत्तातिरिक्तस्वभावकल्पनागौरवात् । सन् घटइत्यादिसामानाधिकरण्यस्य शिलापुत्रको विग्रहवानित्यादिवद् विकल्पमात्रालम्बनत्वात् । सत्तात्मका एव हि घटादयो भेदा विकल्प्यन्ते । तत्र च विकल्पेऽर्थक्रियादयस्तदात्मका एव कल्प्यन्ते । सत्तापि हि सती सत्तेति स्वात्मनैव विकल्प्यते, अन्यथानवस्थानात् । यदा चैवं भूरम्बुतेज इत्येवं विश्वरूपविवृत्ता सत्तैव केवलमवभासते, तदा किं केन रूपितमवभासेत । अत एव 'नेति नेती'त्यादिनिषेधोऽपि भेदविकल्पप्रतिभासापेक्षया विकल्प एव ॥

सत्तामात्रब्रह्मणोऽपि शास्त्रविषयत्वम् ।

अपिचैवं मानान्तरगम्यत्वे सविशेषब्रह्मणः शास्त्रं निर्विषयमापद्येत । जगत् सोपादाननियन्तृकं, कार्यत्वाद् घटादिवद्, धर्माधर्मफलं सदातृकं, चेतनहिताहितक्रियाफलत्वात् सेवापराधक्रियाफलवेतनदण्डादिवदित्यादिभिरेव कारणत्वादिविशेषाणामपि सत्तासामानाधिकरण्यसिद्धेस्तदंशेऽपि शास्त्रस्यानपेक्ष्यत्वात् । अथ सत्तामात्रब्रह्मवाद एष दोषः न तु गुणाः सत्यज्ञानानन्दप्रभृतय इति सगुणब्रह्मवादे तस्य मानान्तरागम्यत्वादिति चेद्, हन्तास्माकमपि सत्ताज्ञानानन्दैकरसतया शास्त्राधिगमनीयरूपेण प्रत्यक्षाद्यविषयत्वाद् न तस्य ततः सविशेषत्वम् । अथ सत्तानतिरेकाज् ज्ञानानन्दयोस्तदेकप्रतिभासतोच्येत, सतोऽपि विज्ञानादिगुणवदव्यतिरेकात् तदेकप्रतिभासतया मानान्तरैरेव सविशेषसिद्ध्यापातः । अथ ज्ञानादिगुणवत्त्वे सति कारणत्वादिविशेषवत्त्वं सतो मानान्तरागम्यमित्युच्येत, तर्ह्यनृतजडदुःखात्मताविरोधिसत्ताद्येकरसतायां सत्यां सविशेषत्वं मानान्तरागम्यमिति तुल्यम् । एतदुक्तं भवति । यथा परस्य प्रत्यक्षाद्यनवगतरूपभेदेन ब्रह्मणः सविशेषत्वे शास्त्रप्रवृत्तिरननुवादः, तथैवास्माकमपि तादृशरूपभेदेन तस्य निर्विशेषत्वे शास्त्रप्रवृत्तिरविरोधिनीति ।

एतेनेदं निरस्तं —

"युक्तिसन्दृब्धमानेन जगन्मिथ्यात्वसिद्धितः ।
सत्तामात्रात्मसंसिद्धेः प्रत्यक्षेण किमागमैः ॥"

इति। अनृतादिविपरीतरूपावभासविरोधिस्वभावेन तस्यागमसिद्धिमुपपादयितुमेव जगन्मिथ्यात्वानुमानाद्, अन्यथानुमानाप्रवृत्तेः। आगमानुपजीवने च तदनुमानस्य शून्यपर्यन्तत्वापत्तेः। सत्तायाश्च मानान्तरेण प्रपञ्चरूपमात्रावभासित्वात्, तस्य च मिथ्यात्वे मानान्तरमागममनुपादाय भावात्मपरिशेषासम्भवात्। अथैवमपि रजतरूपविशेषनिर्भासाया इव शुक्तेः सत्तामात्रात्मनोऽपि प्रपञ्चरूपनिर्भासस्य स्वात्मना तद्विशेषरूपावभासविरोधिस्वभावावबोधिमानप्रवृत्त्यविरोधित्वेऽपि विषयापहाराद् मानान्तरबाधः स्यादेव। न चैवमबाधेन शास्त्रप्रवृत्त्युपपत्तौ युज्यते। तदबाधेन च शास्त्रप्रवृत्तिरनुगमिता मयेत्युच्यते। आगमप्रवृत्तिस्वारस्योपमर्दनेन किमिति तदबाधोऽनुसर्तव्य इति वक्तव्यम्। आब्रह्मविज्ञानोदयादशेषोऽपि दृष्टानुश्रविकविषयव्यवहारो यथायथमुपपद्यते। बाधनीयविषयैरेव स्वकाले स्वप्नव्यवहारस्य च दृष्टत्वात्॥

स्वप्नापारमार्थ्यम्।

न च स्वप्नस्य पारमार्थ्यम्, अर्गलितापवरके शयानस्यैव विनैव दृष्टहेतुं सहस्रशो विविधदेहग्रहणं, त्रुटिमात्रेणानेकयोजनशतविप्रकृष्टदेशविहरणं, तत्रत्यैरदृष्टचराणामसम्भावितार्थानामनेकशो दर्शनं, दृश्यमानानां च क्षणेनानेकपरिणामः, आत्मनश्च पुत्रनप्त्रादिसन्तानप्रबन्धदर्शनेन यून एवानेकशतसंवत्सरातिवाहनेन जरितत्वमित्यादिकमीश्वरसङ्कल्पादेव समर्थयतां 'घ्नन्तीव जिनन्तीव', 'हस्तीव विच्छायति गर्तमिव पतति', 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्' इत्यादिश्रुतय इवशब्दानुबन्धेन स्वप्नमिथ्यात्वमावेदयन्त्यो न दयन्ते। आरुक्षमिव वृक्षाग्रम्, आविक्षमिव प्लक्षवाटमित्यादिप्रतिबुद्धव्यवहाराश्च। 'रथयोगान् पथः सृजते',

"बहिष्कुलायादमृतश्चरित्वा स ईयतेऽमृतो यत्र कामम्।
व भ्रान्तमुच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि॥"

इत्यादिनिरेवानुबन्धसिद्धवन्निर्देशाश्चासन्नारिष्टविषये 'लोहिनी द्यौर्भवति यथामक्षिष्ठे'त्यादिवदवगन्तव्याः। आसन्नारिष्टस्य हि लोहिनीव द्यौर्भवति, न लोहिन्येव। अत एव तत्प्रकरणे 'यत्राच्छिद्र इवादित्यो दृश्यते,' 'यत्र

नील इवाग्निर्दृश्यते, यथा मयूरग्रीवा, यत्र भूमिं ज्वलन्तीमिव पश्येदि'-तीवानुबन्धेन विपरीतरूपमृषाभावो द्योत्यते । तथा स्वप्नस्यापि तत्र तत्रेवानुबन्धेन मृषाभावद्योतनात् । अन्यथा प्रकृतविरोधात् । आत्मनः स्वयंज्योतिष्ट्वं प्रतिपिपादयिषितम् । जागरे सूर्यादिज्योतिर्व्यतिकराद् दुर्विवेचमित्यवतारिते स्वप्नेऽप्यादित्यचन्द्राग्न्यादिसृष्टिपारमार्थ्ये जागराविशेषादफलः प्रयासः स्यात् । आम्नायस्य 'को हि तद्वेदे'ति हि न स्वार्थमुपगम्यते, स्वर्ग्यविधिविरोधात् । तस्मात् प्रकृताविघाताद् 'न तत्र रथा' इत्याद्यभावोपन्यासोपक्रमाच्च निद्रोद्भूताविद्यावासनाविकासमा(त्रा?त्रं) स्वप्नो मनोराज्यवदिति युक्तम् । नहि मनोराज्ये यथाभिमतनानादेहग्रहणं, भारतीयस्य निमेषेण मेरुपृष्ठप्रतिष्ठा, तत्र देवोपास्यता, सङ्कल्पितानामनुकूलमन्यथाभाव इत्येवमादयो भावाः सत्याः शक्योपगमाः । सत्यपीश्वरसङ्कल्पे समाने हेतौ रागाद्युपसृष्टाविद्यावासनाविकासमात्रत्वात् ।

क एवं सति दोषः, सौभर्यादेरनेकदेहग्रहणस्य सत्यत्वाद्, योगसिद्धौ मनोजविनो निमेषेण दविष्ठदेशप्राप्तेः, प्राग् दीनस्य राज्यप्राप्तौ सकलोपास्यतायाः, नन्दिनहुषादेस्तेनैव देहेन देवसर्पादिभावे मनुष्यदेवादिभावव्यभिचारस्य च सत्यत्वात् । एकजातीयकार्यस्यापि लोकेऽनेकसाधनतया तत्सङ्कल्पानुगतकर्मण एव तत्र साधनत्वोपपत्तेरिति चेद्, एवं सति स्वसङ्कल्पादेवायमपि तादृग् विश्वं सृजतीतीश्वरतुल्यत्वं दोषः । स्वमात्रानुभाव्यं तदिति चेद्, न । तस्य सत्यत्वे मनोराज्यगतचेतनवर्गस्यार्धजरतीयन्यायादसत्यत्वायोगेन तेनाप्यनुभाव्यत्वात्, तेनैवाननुभाव्यतयेशसङ्कल्पितजगतोऽपि सर्वानुभाव्यत्वासम्भवाच्च । किञ्चैवमभिमतविषयसाधनायासानर्थक्यं सङ्कल्पितैरेव सत्यविषयैरुपभोगनिर्वृत्तेः, सर्वलोकविसंवादादिविरोधश्च । तदेवं स्वप्नादिवदयथाभूतैरेव स्वकाले प्रत्यक्षादिव्यवहार उपपद्यत इति । यद्युच्येत — न वयं बाधनीयैरर्थैर्व्यवहारानुपपत्तिं ब्रूमहे । किन्तु प्रवृत्तप्रमाणानुपजीविना निरपेक्षप्रवृत्तिकेन च परेण । स्यादपि पूर्वस्य बाधः शुक्तितत्त्वप्रत्यक्षेणेव रजतप्रत्ययस्य । न तु प्रवृत्तप्रत्यक्षाद्युपजीविना पौरुषेयन्यायनियोग्यार्थेनागमेन परेणापि प्रत्यक्षादि

---

१. 'गं' ख. पाठः. २. 'मि' क. पाठः. ३. 'च' ख. पाठः.

बाधो युक्तः । बाधकस्यापि स्वेन स्वबाधे व्याघातात्, प्रपञ्चाबाधापाताच्च । यत्तु प्रपञ्चस्य सत्त्वनिषेधो बाधः स्वरूपानिषेधाच्च न व्याघातादिरिति । तन्न । 'अस्थूलमनणु', 'अशब्दमस्पर्शं', 'नेह नानास्ति किञ्चने'त्यादिप्रपञ्चस्वरूपनिषेधात् । अन्यथा स्वोपाधावनिषेध्यस्वरूपस्य ब्रह्मवदेव सत्त्वापत्तौ तन्निषेधव्याघाताच्च । किञ्च शब्दादौ सत्त्वस्याप्रतीतावप्रसङ्गेन तदवच्छिन्ननिषेधायोगः प्रतीतौ च तद्विरोधेनेति ॥

बाध्यबाधकतानियामकचिन्ता ।

अत्र वक्तव्यम् । किमित्यनुपजीविनापि परेण पूर्वं निरुद्धमपि बाधनीयम्, इन्दीवर इव नीलत्वोत्पलत्वयोर्व्यस्तदृष्टयोरेव शुक्तित्वरजतत्वयोरपि ह्येकत्र समावेशो मानवशादुपपद्यते । एकत्र भिन्नकालनियतश्यामरक्तबुद्धयोरपीतरेतरमबाध्यत्वात् । अथैकस्य श्यामरक्तभाववच्छुक्तिरजतभावो न निर्वर्त्यते हेत्वभावादिति । न । कार्यं हि प्रतीतं कारणकल्पनायां प्रमाणं, न पुनः स्फुटावधारितं कार्यं कारणानिरूपणयापह्नवमर्हतीति हि नीतिविदः । बाध्यबाधकभावस्तत्र लोकसिद्ध इति चेत् । सत्यम् । तन्नियामकं तु निरूपणीयम् । न च विरोधे सति पौर्वापर्यम् । यदनेन बोध्यं तदसत्यमित्याद्युपदेशेन पूर्वेणापि परस्य बाधाद् अग्न्यनुष्णत्वाद्यनुमानस्यादित्ययूपाद्यागमस्य च पूर्वेण प्रत्यक्षेण बाधोपगमाच्च ! ननु तत्र प्रत्ययस्यैवानुत्पादो न बाधः । न । तत्र बाधितविषयत्वप्रसिद्ध्या बाधकाभावे प्रतिपत्तियोग्योपाधौ निषेधप्रमाया अपि बाधत्वौचित्यात् । तमेनमप्राप्तबाधमाचक्षते तान्त्रिकाः । श्रुत्यादिना लिङ्गादिगमनीयार्थबाधस्यैवाप्राप्तविषयत्वात् । भूतले घटाभावप्रमा च न बाधः । तदा सामग्रीविरहेण तस्य तत्प्रतिपत्त्ययोग्यत्वात् । इह च व्याप्तिशब्दज्ञानादिसामग्रीसत्त्वात् । अथोच्येत — पौर्वापर्यमतन्त्रम्, अपरोक्षेण विरोधि परोक्षं बाध्यमित्येष नियम इति । तदपि न । रूप्यापरोक्षभ्रमस्य शाब्दशुक्तिज्ञानबाध्यत्वात्, चन्द्रप्रादेशिकत्वादिभ्रमानुवृत्तावपि तत्प्रतिपत्तियोग्योपाधौ निषेधप्रमारूपबाधस्यागामिकस्य सम्भवाद्, ज्वालैक्यप्रत्यक्षस्य तद्भेदानुमान-

---

१. 'क्तिर' क. पाठः. २. 'यनुमानस्य'. ३. 'स्य' ख. पाठः.

बाध्यत्वोपगमाच्च । अथ प्रमाणं बाधकं तदाभासो बाध्य इत्युच्येत, तदपि न । तादृशोऽपि सत्प्रतिपक्षादेरबाध्यबाधकत्वात् । तस्मादितरेतरविरोधे सति यद् दोषमूलतयान्यथा वा सम्भावितान्यथासिद्धि विषयान्तरेणाप्रामाण्येन वाघटमानं भवति । तत् पूर्वमपरं वा परोक्षमपरोक्षं वा बाध्यम्, अन्यत् तु बाधकमिति नियमे सत्यनादिनिधनाविच्छिन्नसम्प्रदायासम्भाव्यदोषगन्धासङ्कुचद्वृत्तिनिरवकाशानिर्विशेषशास्त्रमानेन सम्भाव्यदोषसावकाशप्रत्यक्षादिविकल्पबाधो नासम्भावनामर्हति । तुल्यबलविरोधे हि विकल्पो विषयव्यवस्था वेति ।

न च स्वेन स्वबाधे व्याघातः । नहि बाधनीयस्य विद्यतिमर्थक्रियां वापह्नुमहे, येन प्रतीतिरूपेण स्वबाधबुद्धिजनकता व्याहन्येत । न च बाधबुद्धेरेव स्वबाधकत्वव्याघातः । स्वत एव स्वोपाधौ विशेषसामान्यनिषेधप्रतियोगित्वावभासाविरोधात् । न च स्वाभावावभासे स्वावभासविरोधः, स्वाभावविकल्पात्मनैवोदितस्य बाधकविकल्पस्य तदुपाधावप्रतीतेः । तदुपाधौ हि तदवभासो विरुध्यते नावभासमात्रम् । यद्येवं स्वप्रतीत्युपाधावनिषेधाद् नासावात्मबाधः स्यात् । न । प्रतीतियोग्योपाधावेव निषेधप्रतीतिबाध इति युक्तम् । स्वनिषेधाप्रतीतौ च स्वसामर्थ्यैव बोधोपाधेस्तत्प्रतीतियोग्यत्वात् । प्रबलज्वलने शल्मलीतूलसंयोगस्य स्ववृत्तिविरोधिसत्त्ववद् बाधविकल्पस्य तदुपाधौ स्वप्रतीतिविरोधिस्वभावत्वोपपत्तेः । इयांस्तु विशेषः । यदेकत्र स्वाश्रयनाशेन स्ववृत्तिविरोधिता । परत्र स्वनिषेधावभासेन तत्र स्वावभासविरोधितेति । अथ बाधविकल्पस्य सत्तानिष्कर्षे निरुपाख्यस्य प्रतिभासानुपपत्त्या सत्तालिप्तावभासे तदुपाधावेव प्रतीतिः प्राप्ता । न । इह घटो नास्ति, न त्वां जानामि, नेच्छामीत्यादौ निषेध्योपाधिसम्बन्धावभासवद् निषेधशेषतया बाधविकल्पसत्तासंश्लेषावभासाविरोधात् । न चैवं बाधबाधे प्रपञ्चाबाधः । स्वरूपबाधेऽपि बाधविकल्पविषयानपबाधात् । युगपदशेषविशेषनिषेधेन निर्विशेषस्वरूपपरिशेषोपपत्तेश्च । कथञ्च सप्रपञ्चता परिशिष्येत यदि हि प्रपञ्चबाधः पर्यवसन्नः पृथग् बाध्येत । रजतत्वबाधबाधे हि रजतत्वं परिशिष्यते । यावद्विशेषबाधं यौगपद्ये च सत्तात्ममात्रपरिशेष इत्युपपन्नमिति दिक् ॥

---

१. 'धवि' ख. पाठः.

विधिकाण्डविरोधः ।

यद्यपि नानाभेदव्यपाश्रयाः कर्मोपासनाविधयोऽप्यपौरुषेयत्वेन समा ब्रह्मात्मविद्याविधिभिः, तथापि ते सिद्धभेदाश्रयेण साध्यसाधनव्यवस्थामात्रकारिणः स्वाश्रयभेदबाधे केवलमुदासते, न विरुध्यन्ते । सति भेदे विधेयसाध्यसाधनभावमात्रस्यानिषेधात् । न खलु बहिः क्रतोरप्प्रणयनाद्याश्रयाभावे गोदोहनादिविधयो विरुध्यन्ते, सत्याश्रये विधेयपशुगोदोहनादिसाध्यसाधनभावानिषेधात्, तद्वत् । तदेवं स्वसिद्धौ प्रत्यक्षाद्युपजीविनापि निगमेन परबाधाभावेन विषयांशे असम्भावितदोषेण स्वरूपतो विषयतश्च सम्भावितदोषमूलत्वान्यथासिद्धि प्रत्यक्षादि बाध्यत एवेति । अन्ये तु — प्राप्तबाधे पौर्वापर्यमेव हेतुः

"पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति"

इति । उक्तं च —

"पूर्वं परमजातत्वादबाधित्वैव जायते ।
परस्यानन्यथोत्पादान्न त्वबाधेन सम्भवः ॥"

इति । कथं पुनरागमस्य परत्वं प्रत्यक्षात्, तावत् स्वरूपासिद्धावुपजीवनात् । कर्मविधेस्तु क्रमपाठात् साध्यविषयत्वाच्च । तत एवोपासनाविधेरपि परो निर्विशेषागमः सर्वमानप्रसञ्जितभेदनिषेधपरत्वाच्चेति वदन्ति ॥

प्रत्यक्षादिदोषमूलत्वसम्भावनाहेतुनिरूपणम् ।

अत्राह — प्रत्यक्षादेर्दोषमूलत्वसम्भावनयान्यथासिद्धिमाचक्षाणेन[1] तत्सम्भावनाहेतुरेव निरूपणीयः । न खलु प्रवृत्तिर्विसंवदते । न च विपरीतदर्शनमस्ति । ननु निर्विशेषागम एव । न । इदानीमस्याप्रतिष्ठत्वात् । प्रथमवृत्तप्रत्यक्षादिपरिच्छिन्नविपर्ययतया स्वार्थस्यापूर्वत्वविघातेनातात्पर्यात् । यथाहुः —

"असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
तादृप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि च ॥"

इति । तथाचागमनिर्विशेषतात्पर्याधिगमे प्रत्यक्षादिदोषमूलत्वसम्भावनायां

---

१. 'णो न' ख. पाठः ।

च प्राप्तमितरेतराश्रयत्वम् । दोषमूलजातीयत्वेन प्रत्यक्षस्य तत्सम्भावना पुनरागमस्यापि स्यात् । अपौरुषेयत्वेन दोषाभावस्तत्र निश्चित इति चेत्, तथापि किं प्रत्यक्षमेव बाध्यतां निर्विशेषादिशास्त्रं वा हेयादिविषये सङ्कोच्यतामिति संशयमूलदोषस्य बोद्धरि सम्भवात् । अतो वक्तव्यः प्रत्यक्षादिदोषमूलत्वसम्भावनाहेतुरिति ॥

भेदग्रहानुपपत्तिः ।

उच्यते — विषयदुर्निरूपतैव हेतुः । अस्ति तावदयं शुक्लो घटो नीलः पट इत्येवं शुक्लघटादयः सत्तया भेदेन चावभासन्त इति । तत्र सत्तया वस्तुभासनं संविदां निसर्गः । अपेक्षया तु भेदेन । न च तदेव धर्मिप्रतियोगिज्ञानमपेक्ष्य तदेव भेदेन ग्राहयति, विरम्यव्यापारप्रसङ्गात् । न च भेदग्राहिज्ञानान्तरमुपजनयति, योगपद्यायोगात् । न च वस्तुस्वरूपज्ञानानन्तरं भेदज्ञानमनुभूयते । यद् वस्तुस्वरूपमपि ग्राहयदुभयव्यवहारं प्रयुञ्जीत । न च प्राचीनतदर्थज्ञानेन प्रतियोगिज्ञानादिसहकारिसम्पन्ना सामग्री तदेव भेदग्राहिवस्तुस्वरूपज्ञानं जनयेदिति वाच्यम् । दृष्टविसजातीयप्रत्युत्पन्नवस्तुविशेषविकल्पे तदसम्भवात् । तत्र च गृह्यमाणविशेषविवेकाज्ञाने सम्बन्धिरूपानवभासाद् निर्विकल्पापत्तेः । एतेन घटादिज्ञाने वित्त्यन्तरवेद्यपटादिभेदावभासो व्याख्यातः । उभयस्वरूपज्ञानानन्तरभाविभेदज्ञाननुभवात् । अपिच धर्मिप्रतियोगिज्ञानस्यापि तदुभयविवेकानवभासित्वे सत्तामात्रावभासिनो मुण्डो गौरित्यादिवद् भेदग्रहाप्रयोजकत्वात् । तदुभयविवेकावभासित्वे च तत्प्रयोजकं धर्म्यादिज्ञानान्तरं मृग्येतेत्यनवस्था ॥

भेदस्वरूपानुपपत्तिः ।

अपिच न वस्तुस्वरूपमात्रं भेदः, ज्ञात एव तस्मिन् प्रतियोगिनिरपेक्षं भेदव्यवहारप्रसङ्गात् । अथ यदि भेदव्यवहारोऽसङ्कीर्णविषयव्यवहारः, स गवादिज्ञानादेव । अथ भिन्न इति व्यवहारः, तत्र प्रतियोगिधीरपि सामग्री कल्प्यते । न । विषयाविशेषे गवादिव्यवहार इव पदव्युत्पत्त्यादिव्यतिरिक्त-

---

१. 'दृष्ट्वा', २. 'प्रत्यक्षपत्र' ख. पाठः.

सामग्रीकल्पनानौचित्यात् । नहि भेदव्यवहार एव व्युत्पत्त्यादिसामग्री कल्प्यते, येन कल्पनीये विशेषेऽन्यदपि कल्प्येत । अथ भेदपदव्युत्पत्तिरेव सप्रतियोगिकत्वोपाधिकेति प्रतियोगिज्ञानं भेदव्यवहारसामग्रीति चेद्, न । यथावगतस्वरूपभेदे गवादिपदस्येव भेदपदस्यापि प्रतियोगिनिरपेक्षमेव व्युत्पत्तेरप्यापाद्यत्वात् । परिमाणे तु ह्रस्वत्वादिग्रहणेऽपि प्रतियोगिज्ञानापेक्षोपगमादनुदाहरणम् । न चैवमन्योन्याश्रयः, परिमाणस्वरूपज्ञाने सति परस्परापेक्षया युगपद् दीर्घत्वाद्यवभासाभ्युपगमात् । अपिचैवं गौर्भिन्न इति व्यवहारो न स्यात् । अर्थावैशेष्येण पर्यायत्वाद्, वस्तुन एव भेदत्वे भेदवद्वृत्तिभिन्नशब्दानाञ्चस्याच्च । न च वस्तुस्वरूपमेव प्रतियोगिनिरूप्यात्मना भेदः पुरुष इव पुत्रादिनिरूप्यात्मना पित्रादिः । तदुपग्रहणव्यवहारौ च प्रतियोगिज्ञानापेक्षौ, भेदादपर्यायत्वं चेति वाच्यम् । एवमपि भेदेन प्रतियोगिज्ञानापेक्षायामन्योन्याश्रयात् । न खलु तस्य स एव प्रतियोगितया निरूपकः । किं कारणं, भेदेनाज्ञानात् । एवमन्यदपि स्यात् ।

नापि वस्तुधर्मो भेदः, धर्मधर्मिभावस्य भेदाधीनत्वात् । तस्य तस्यान्यान्यभेदाभ्युपगमेऽनवस्थानात् । धर्मधर्मिभेदासिद्धौ च धर्मभूतभेदासिद्धेः । तस्याप्यन्यनिरूप्यतया भेदेन धर्मिप्रतियोगिज्ञानापेक्षायामन्योन्याश्रयाच्च । न च न भेदेन धर्म्यादिज्ञानं भेदधीहेतुः, किन्तु पृथक्त्वेनेति वाच्यम् । पृथक्त्वज्ञानस्याप्ययमस्मात् पृथगित्यपेक्षाधीसापेक्षत्वेन भेदधीतन्त्रत्वात् । नापि वैलक्षण्येन धर्म्यादिज्ञानं भेदधीहेतुः । लक्षणवैविध्यस्य विरोधस्य वा भेदधीतन्त्रज्ञानत्वात् । यस्य वैलक्षण्यं यच्च वैलक्षण्यं तयोर्वैलक्षण्यान्तरानिरूपणेन भेदाग्रहप्रसङ्गाच्च ।

एतेन क्वचिज्जातिभेदोऽन्यताप्रत्ययहेतुः गौरियं वडवेयमिति । तुल्यजातीयत्वे लक्षणभेदः कालार्क्षीयं स्वाम्तिमतीयमिति । तुल्यजातिलक्षणत्वे देशभेदः, इदं पूर्वमामलकमिदमुत्तरमिति । एकजातिलक्षणदेशत्वे च परिणामलक्षणभेदो योगिनामर्थान्यत्वप्रत्ययहेतुः, भिन्नदेशोपलब्धामलकयोर्ग्रहे ज्ञातर्यन्यतरापनयनेन तद्देश उपावर्तते, तदामलकाद् भेदज्ञाने लक्षणभेद एव

१. 'तस्यान्या', २. 'णे', ३. 'र्यावे' ख. पाठः.

हेतुरिति पातञ्जलमपि दर्शनं प्रत्युक्तम् । देशादिभेदस्य भिन्नवस्तूपाधिकतया तद्भेदज्ञानस्यापि वस्तुभेदज्ञानाधीनत्वेनान्योन्याश्रयात् । जातिलक्षणभेदश्च वस्तुभेदे न प्रयोजकः, एकस्यापि सम्भवात् । तद्विरोधश्च भेदाज्ञाने दुर्ज्ञान इत्यवोचाम ॥

सिद्धान्ते भेदग्रहोपपत्तिः ।

तत् किं भेदो मा विज्ञायि, तथा सति सर्वोऽपि व्यावृत्तव्यवहारो लुप्येत । न । भेदविभ्रमादेव सर्वव्यवहारोपगमात् । सत्तामात्रपरमार्थे सर्वस्यैव भेदस्य विभ्रमत्वाविशेषेऽपि तात्कालिकव्यवहारसंवादाविसंवादाभ्यां प्रमाणतदाभासत्वविवेकाविरोधात् । सत्युपलब्धरि बाधाबाधाभ्यां तद्विवेक इत्यपरे । अथापि व्यावहारिको भेदो लोकसिद्धहेतुविशेषनिरूपणीय इति प्रतियोग्यादिज्ञानापेक्षायामुक्तदोषः । उच्यते । न भेदेन धर्म्यादिज्ञानं भेदधीहेतुः । किन्तूपस्थिततादात्म्याज्ञानमेव, सम्प्रतिपन्नत्वात् । गौरश्वो नेति च भेदनिरूपकतया तादात्म्यस्याज्ञातस्यैव साक्ष्युपनीतस्योल्लेखनात् । न चैवं परस्यापि[1] उपस्थिततादात्म्याग्रह एव भेदधीहेतुः, भेदनिरूपकतया च तादात्म्योल्लेखो न विरुध्यत इति वाच्यम् । विरोधेन युगपदनाहार्यभेदाभेदग्रहायोगात् । आहार्यतादात्म्यग्रहस्य च भेदग्रहमूलतया तदेकग्रहत्वायोगात् ।

नन्विदं रजतमिति भेदधीर्न स्यात् । उच्यते । नेदं रजतमिति बाधो हि नारोपितरजतभेदज्ञानं, बाधे तस्य तुच्छस्य प्रतियोगित्वाद्यनुपपत्तेः । किन्तु रजतत्वेन सद्रजतभेदज्ञानमेव सामान्यानुबद्धभेदज्ञानस्य यावद्विशेषाभेदावभासविरोधित्वेन वस्तुस्वरूपावभासे रजतभ्रमबाधोपपत्तेः । तत्तादात्म्यं चाज्ञातमेव भेदनिरूपकतया साक्षिणोपनीयते । न च 'नेति नेत्यात्मे'त्यादौ सम्प्रतियोगिकभेदज्ञानं परिशिष्यते येन पृथक् प्रतियोगिसत्त्वमपेक्ष्येत, सर्वभेदविकल्पस्यापि स्वयमेव बाधेन प्रकाशमत्तामात्रपरिशेषात् । अथवाविशेषाकारतादात्म्यं प्रीतात्म्[2]।

---

१. 'स्यो प', २. 'प्रन्थम्' ख. पाठः.

अन्यथा भ्रमत्वयोगात्। तद्रूपभेदप्रत्ययश्चाप्रतीतसत्तामात्रतादात्म्याज्ञानमूल एव स्वसमानविषयाज्ञानमूलमभेदभ्रममपबाधते। अत एव 'नेति नेत्यात्मे'त्यादौ विशेषाकारतादात्म्यविभ्रमबाधो न विरुध्यते। किन्तु तत्र यदि भेदप्रत्ययोऽवस्थाप्येत, तादात्म्याज्ञानमूलो विभ्रम एव स्यादिति सर्वमात्मैवेति प्रत्ययपर्यवसाने भेदविभ्रमबाधः सिध्यति॥

भेदस्य तादात्म्याप्रतियोगित्वं नञर्थः।

यद्वा नात्र भेदप्रत्यये गवाश्वतादात्म्यमवभासते, गौरश्वो नेति शाब्दबोधावैरूप्योपपत्तेः। नहि तत्र नञर्थमनपेक्ष्य प्रथमे गवाश्वसामानाधिकरण्यमधिगन्तुं शक्यते, एकवाक्ये पदानां सम्भूयकारित्वात्। कथञ्च तावद् नञ्पदमनर्थकमुदासीत, यदि गवाश्वतादात्म्यमिह प्रसज्य निषिध्येत। न चैवम्, अप्राप्तेः। अत एव प्रापण्यप्रतिषेधे चावृत्त्यादिप्रसङ्गात्। नासावश्वः अनश्वः नायं धर्मः अधर्म इत्याद्यैकार्थ्येन नामार्थयोगे नञः पर्युदासवृत्तित्वात्। यथाहुः —

"नकारौ द्विविधौ ज्ञेयौ पर्युदासप्रसज्यकौ"

इति,

"नामधात्वर्थयोगी हि नैव नञ् प्रतिषेधकः"

इति च। पर्युदासश्च भेदः। एकस्य द्वैधं यदि तदेकमुपादाय विधीयेत, निष्प्रतियोगिकमधिगम्यते घटो भिन्न इति। भिन्ने जुहोतीत्यादिदर्शनात्। अथ भित्तमुपादाय विधीयेत सप्रतियोगिकमधिगम्यते इदमस्माद्भिन्नमिति। तदिह गौर्नेति भेदे विधेयेऽश्व इति विशेषणादश्वात्मना भिन्न इत्यक्लेशेन सामानाधिकरण्यपर्यवसानेऽर्थात् तत्प्रतियोगिको भेदो गम्यते। तमेतमन्योन्याभावमाचक्षते। अन्योन्यस्यात्मान्योन्यभावः। तद्व्यतिरिक्तोऽन्योन्याभावः, नान्यात्मान्य इति। अथैवं गव्यश्वो नेति कस्मान्न पर्युदासः। क्रियायोगविवक्षया नञः प्रसज्यप्रतिषेधात्। अभावप्रतियोगिव्युत्पत्त्या च नञः सामानाधिकरण्याविघातात्। नामार्थयोगविवक्षायां पुनः पर्युदास एव स्याद् अनश्वो विषाणादिर्गवीति। ननु नञिवयुक्तमन्यसदृशेऽर्थे तथा ह्यर्थगतिः। न खल्वब्राह्मण इति लोष्टमवगम्यते। न। असम्भवेऽन्यमात्रप्रतिपत्तेः। तदेवं सति

गवाश्वैकत्वमनिर्ज्ञातविशेषमर्थादाक्षिप्यत इति तदज्ञानमूला गवाश्वादिभेदप्रत्यया विभ्रमा एव, भेदाज्ञानमूलाभेदप्रत्ययवद्, नहीदं रजतमिति सत्तैकात्मयाथात्म्यमवभासते, येन न भ्रमः स्यात् । इयस्थितरूपाभेदावभासात् तु भ्रम एव । न चैवं परस्यापि तादात्म्याग्रह एव भेदधीहेतुः, गौरश्व इत्येव स्वस्वतादात्म्यग्रहणात् । अन्योन्यतादात्म्यं न गृह्यत इति चेत् । न । तस्यासत्त्वे तदग्रहानिरूपणात् । विकल्पितमात्रस्य खपुष्पवदकार्यकरत्वात् । सत्त्वे च तस्य भेदाभेदविरोधेन विद्यमानाभेदाग्रहमूलो भेदग्रहो विभ्रम एवेति । एतदुक्तं भवति — भूरम्बु गौरश्वो जीव इंग इत्यादिनिर्भेदा एव सत्तैकात्मनो भेदा नाम नातिरिच्यन्ते, अनवस्थानात् । ते च तादात्म्याज्ञानेन स्वसामग्र्यैव स्वरूपेण भूरम्बु गौरश्व इत्येवं प्रतिभासन्ते । अज्ञाततादात्म्येन स्वरूपोपस्थित्यपेक्षया तु परोपाधिना पर्युदासेन इदमिदं न इदमस्माद् भिन्नमित्येवमवभासन्ते । एकस्यैव परोपाधिनिबन्धनरूपभेदप्रत्ययस्य लोके बहुलमुपलम्भाद्, यथा गोरभिन्नो गौरिति । अभेदो हि नाम स्वरूपं गौरिति[2] वावगतं गोभेदापेक्षया तु विकल्प्यते गोरभिन्नो गौरिति, 'परात्मना भवत्यभेदी'ति चेति ॥

सत्तापारमार्थ्यभेदापारमार्थ्यानुमानम् ।

प्रयोगश्च—विमता भेदा अपरमार्थाः व्यावर्तमानत्वाद्, रज्जुसर्पधारामूदलनादिवत् । सत्ता च परमार्थः अनुवर्तमानत्वात् सर्पादिषु रज्जुवत् । न चासिद्धिः, घटोऽस्ति पटोऽस्तीति व्यावृत्त्यनुवृत्त्यनुभवात् । घटादेरव्यावृत्तौ व्यवहारसाङ्कर्यप्रसङ्गात् । प्रतिभावं सत्ताभेदे गौरवाच्च । अपेक्षाबुद्ध्यनुकूलविषयत्वमन्योन्यबुद्ध्यनालम्बनत्वं भिन्नत्वमेव व्यावृत्तत्वम् । विपरीतं चानुवृत्तत्वम् । तच्च परं सत्तायाः । निस्स्वभावालम्बनप्रत्ययायोगात् । सत्ता च स्वभावः सर्वेषामिति । न च बाधाबाधाभ्यां सोपाधिकता, तयोरेव साध्यत्वात् साधनव्यापकत्वाच्च, गौरश्व इति परस्परव्यावृत्त्यवगमात् । व्यावृत्तिर्ह्यभावः ।

---

१. 'व', २. 'गौ', ३. 'त्म' ख. पाठः.

अभावप्रमा च बाधः । सत्तायाः पुनरव्यावृत्तेरबाध इति । न च दृष्टान्तासिद्धिः । अनिर्वचनीयख्यातिर्हि वक्ष्यते । तदेवं हीनबलतया न प्रत्यक्षादीनि प्रतिपक्षतामर्हन्तीत्यतो नागमस्य तदनुरोधः । किन्तु तदुपरोध एवेति ॥

परमते भेदादिनिर्वाहः ।

अत्राह—न तावद् भेदो न प्रतीयत एव, वेदान्तकथानारम्भप्रसङ्गाद्, गौरश्व इत्यादिविशिष्टव्यवहारामावप्रसङ्गाच्च । अप्रतीतव्यवहारायोगात् । अपिचैवं गोरश्वार्थी न निवर्तेत, सत्तामात्रदर्शनाविशेषात् । गवि प्रतिपन्नेऽश्वादिशब्दाश्च स्मर्येरन् । स्मारकप्रतिसम्बन्धिसत्ताग्रहणाविशेषात् । स्मृताश्च प्रयुज्येरन् विषयविशेषाभावात् । अनन्तरप्रतिपन्नगौरश्वादयः प्रतिपद्यमानाः पूर्वसत्त्वबुभुत्सायां बुद्धतयैव परामृश्येरन्, अनुभूतसत्तामात्रत्वात् प्रत्यभिज्ञायमानवत् । अन्धबधिरादिव्यवस्था चोच्छिद्येत, करणभेदव्यवस्थापकविषयभेदाभावात् । वेदान्ताश्चाप्रमाणमापद्येरन्, सत्तामात्रात्मनो मानान्तरासिद्धत्वात् । न च तत्सामग्री नास्ति दुर्निरूपा वा, सम्प्रतिपन्ने कार्ये तदनुरूपसामग्रीकल्पनात् । प्रतीतं हि कार्यं कारणकल्पनायां प्रमाणमिति नीतिविदः । न च निर्विषया बुद्धिः सम्भवति, येन भेदो विषयोऽपह्नूयेत । न च बाध्यो विषयः, प्रत्यक्षबाधाभावात् । न च दुर्निरूपः गौरश्व इत्येव निरूपणात् । तत्र कमर्थयोगपद्यादिविकल्पानवकाशात् । न च स्वरूपेण जात्यात्मभेदज्ञानं प्रतियोगिज्ञानापेक्षं, येन सामग्रीभेदादतिरिच्येत । व्यावृत्तो भिन्न इत्यादिशब्दव्यवहारविशेषे च प्रतियोगिसापेक्षत्वं दाराः कलत्रमित्यादाविव पुंनपुंसकत्वादि शब्दविशेषस्वभावाधीनं नार्थदूषणमावहति । अन्वयव्यतिरेकाभ्यां च शब्दविशेषस्वभावाधीनं प्रतियोगिसापेक्षत्वमिति निश्चीयते । गौरिति च भिन्न इति च व्यवहारेषु तदपेक्षानपेक्षयोः सर्वजनीनत्वात् । भिन्नशब्दो हि व्यावृत्तबुद्धिहेतुत्वरूपप्रवृत्तिनिमित्तसाधारण्यात् साधारण एव तदवच्छेदकाश्वाद्युपाधिपुरस्कारेण गोत्वादिविशेषप्रत्ययहेतुर्गौरश्वाद् भिन्न इत्यतो न पर्यायः । उपाधिशब्दानां वाच्यानतिरेकेऽपि तटस्थोपाधिभेदादपर्यायत्वेनाथ प्रभात इत्यादिसहप्रयोगात् । अत एव स गवादावाञ्जसः । तस्य जात्यादिरूपभेदयोगात् । तस्य च स्वपरनिर्वाहकत्वेन भेदान्तरमनपेक्ष्य वस्तुभेदव्यवहारविषयत्वान्नानवस्था । भेदो हि स्वस्मिन्ननन्याधीनभेदव्यवहारः । स्वसम्बन्धेनार्थान्तरे

तद्व्यवहारहेतुत्वात् । द्रव्ये चाक्षुषत्वनिमित्तरूपमिव स्वस्मिन्ननन्यनिमित्तचाक्षुषत्वम् । स एव चान्यस्मादिव स्वाश्रयस्य स्वस्मादपि भेदव्यवहारहेतुः । भेदाद् भिन्नो गौरिति निराकाङ्क्षतया साकाङ्क्षतया चैकस्यैव व्यवहारोपपत्तेः । भेदो गौर्भिन्न इति चार्थभेदेऽपि भेदयोगकार्यव्यावृत्तिबुद्धिहेतुत्वादुपचर्यते ॥

परोक्तजातिः ।

अथ का सा जातिः यद्विषयो भेदप्रत्ययः । वस्तुसंस्थानम् । तन्न तावदवयवसंयोगविशेषः, आत्मादावभावात् । नापि स्वरूपमात्रं, गवादिज्ञानस्याविशिष्टविषयत्वप्रसङ्गात् । नैवम् । तस्य तस्यासाधारणमपृथक्सिद्धं विशेषणं हि तत् । अपृथक्सिद्धयद्विशेषालम्बनेन यस्य व्यावृत्तबुद्धिः तत् तस्य संस्थानम् । यथा गोर्गोत्वं सास्नादिसन्निवेशः । खण्डस्य खण्डत्वं खण्डगव्याः खण्डत्वे सति गोत्वं, नीलस्य नीलत्वमुत्पलस्य चोत्पलत्वमिन्दीवरस्य च नीलत्वे सत्युत्पलत्वमित्यादि । गुणादावपि यत् तज्जातिव्यञ्जकमिष्यते तदेव संस्थानम् । अस्य च तारतम्याभावादि शुक्लिमादिभ्यो विशेषः । शुक्लः शुक्लतरः शुक्लतमः तारस्तारतरो मन्द्रो मन्द्रतरः खरो मृदुरित्यादिवद् गौर्गोतरो गोतम इत्याद्यभावात् । तच्च संस्थानं प्रतिवस्तु व्यावृत्तस्वभावमपि गवाद्यनुगतव्यवहारं प्रयुञ्जीत । जातिव्यक्त्यादावनुगतरूपान्तराभावेऽपि जात्याद्यनुगतव्यवहारसम्प्रतिपत्तेः । अपिच कोऽयमनुगतव्यवहार इति । न खलु गौर्गौरिति शब्दैकत्वं, वर्णनित्यत्वेऽप्युच्चारणादिक्रमानुपूर्वीविशिष्टवर्णसमुदायान्यत्वात् । अनुगतस्यैकस्य व्यवहार इति च प्रागनुगतजातिसिद्धेरसिद्धम् । तत् सौसादृश्यमेव शब्दानामर्थानामपि गोत्वादिसंस्थानानामनुगतिरङ्गीक्रियताम् । तावतैव व्यक्त्यादिपदानामिव व्युत्पत्तिव्यवहारयोरुपपत्तेरतिरिक्तजातेरकल्पनादनुपलम्भाच्च । किमिदं सौसादृश्यम् । सदृशव्यवहारासाधारणहेतुर्विषयधर्मः सादृश्यम् । तदेव पुष्कलं सौसादृश्यम् । तेन गवये न गोशब्दस्य व्यवहारः प्रवृत्तिनिमित्तसंस्थानविशेषपौष्कल्याभावात् । गवान्तरे च सुसदृश इति न प्रयुज्यते, विवक्षाभावात् । प्रतियोगिसापेक्षत्वेन गौरवाच्च । गौरित्येव तु प्रयुज्यते लाघवात् । सर्वगोव्यक्तिषु च संस्थानसौसादृश्यविशेषात् प्रवृत्ति-

१. 'द्वि', २. 'पवाल', ३. 'छस', ख. पाठः.

निमित्तौल्येन गोशब्दस्य न क्वचिदौपचारिकत्वम् । गौर्वाहीक इत्यादौ तस्य सौसादृश्याभावनिबन्धनत्वात् । ननु संस्थानमालम्ब्य संस्थानि गृह्यते तुल्यवित्तिवेद्यत्वोपगमात् । एवं सति गवये गवयत्वसंस्थानव्यावृत्तगृहीते गोत्वभ्रमो न स्याद्, असाधारणाकारग्रहणस्य भ्रमविरोधित्वात् । न । एकस्यानेकसंस्थानत्वात् प्रतिपन्नसंस्थानाविरोध्याकारभ्रमसम्भवात् । गवयोऽयं गौरिति विरुद्धाकारभ्रमश्च विरोधाज्ञानेन सर्वसमाधेयः । तेन शुक्लो गौरिति ज्ञाने मा काण्ण्यर्थित्वादिभ्रमो भूत् । खण्डत्वादिविभ्रमो भवत्येव । एवं सर्वस्यैव संस्थानस्यापेक्षिकेऽसाधारण्ये समानेऽपि मा भूद् गवापेक्षया द्रव्यत्वं संस्थानं शुक्लत्वं वा शुक्ल्यपेक्षयेति स्वासाधारणरूपं संस्थानमिति विशेष्यते । अथ शुक्लिमा शुक्लसंस्थानं द्रव्यस्यान्यस्मादात्मनश्च व्यावृत्तिर्गृहीतेति कथं तदभेदविभ्रमः । अपृथक्सिद्धेरुत्तेजकत्वात् । तत्र संस्थानान्तरग्रहस्तु विरोधिकार्यगम्यत्वाद् विरोधस्य । न च सम्प्रतिपन्नसंस्थानेनैव प्रतियोगिनिरूपितरूपभेदेन भेदव्यवहारोपपत्तावर्थान्तरमदृष्टं कल्पयितुं युक्तमिति ॥

भेदासत्यत्वानुमाने परोक्तदूषणम् ।

यत्तु व्यावृत्त्या भेदापारमार्थ्यानुमानं, तन्न । बाधात् । सोपाधिकत्वाद् व्याघाताच्च । अमर्यादा हि भेदा न पक्षतामर्हन्ति । प्रतीयमानास्तु सन्त एव प्रतीयन्त इति बाधः । बाधो हि मृषात्वम् । ननु गवादिविषयेऽश्वादिव्यावृत्तिर्बाधकृता । तदिदमनालोचितबाध्यबाधकविवेकस्य भ्रमजल्पितम् । नहि सर्व एव विधिनिषेधपत्वया बाध्यबाधकभूताः, अन्योन्यसिद्धपारिभाषिकनद्भावस्यादृष्टत्वात् । अपि तु विरुद्धयोरन्यतरबलीयस्त्वे तत्रैव तत्प्रसिद्धेः । विरोधश्च विधिनिषेधयोरेकदेशकालप्रकारसम्बन्धावभासनिबन्धनो न तद्भेदे सम्भवति । भुवि गन्धो न जले, प्रगे चत्वरे गजो नेदानीं, पशुरिहेदानीं न गोः, वह्निरिनीयमग्निरित्यादौ तदप्रसिद्धेः । सर्पोऽसौ, नासौ सर्पो रज्जुरेषेत्यादौ देशाद्यभेदे विरोधेन बाध्यबाधकत्वप्रसिद्धश्च । नैवम् । क्वचिद् भेदा निषिध्यन्त इति पक्षे बाधो व्यावर्तमानोऽपारमार्थ्यमपि व्यावर्तयति । अत एवात्र बाध एव साध्य इति निरस्तम् । व्यावृत्तिमात्रस्यातत्फलत्वेनाप्रयोजकत्वात् । प्रतिपन्नो-

---

१. 'था'. २. 'का', ३. 'त्वोप्र' ख. पाठः

पाधौ व्यावृत्तेश्चासिद्धेः । अपिच साध्यधर्मपारमार्थ्ये धर्मिणोऽपि तत् । न खलु रज्जुसर्पस्यासत्यस्य विसर्पणं धर्मः परमार्थो भवति । अत एवानुमानादन्यतो वा तदपारमार्थ्ये च धर्मिसत्यता । बाधबाधे बाध्यस्वरूपावाधनियमाद्, 'द्वौ नञौ प्रकृतमर्थं सूचयत' इति हि शाब्दाः । तथा साधनसत्यत्वे पूर्ववत् तद्धर्मिसत्यत्वं, तदसत्यत्वे च साध्यासिद्धिः । न खलु भ्रान्तधूमेन वह्निः साध्यते । बाधकबाधे च बाध्यसत्यता स्यात् । यद्यपि नाशकमुद्गरादिनाशेऽपि नष्टो घटो नष्ट एव दृष्टः । किन्तु कारकज्ञापकस्वभावो भिद्यते । घटाभाववचने बाधिते घटसत्यत्वदर्शनात् । अपिचैवं बाधकज्ञानस्यापि यत्किञ्चिद्विशेषालम्बनतया भ्रमत्वे तद्बाधकज्ञानान्तरापेक्षानुपरमात् तव निश्शेषभ्रमनिवृत्तिरूपनिर्वाणासिद्धिः । अपिच ब्रह्मणोऽपि जडानृतव्यावृत्तत्वेनैकान्त्यं, तदव्यावृत्तत्वेऽपि गोरिव व्यावृत्तादव्यावृत्तस्य गोत्वमिव व्यावृत्तत्वमित्यनैकान्त्यम् । व्यावृत्तत्वं ब्रह्मणि कल्पितमिति चेद्, गवादिषु किं सत्यम् । तथा सति धर्मिणोऽपि सत्यत्वे मृषात्वानुमानबाधः । कल्पितस्य च तस्य पक्षत्रयसाधारण्यमेवेति दिक् ।

एतेन दृश्यत्वहेतुरपि प्रत्युक्तः, धर्मिज्ञानबाधाद्, बाधेन सोपाधिकत्वात्, हेतुसाध्यपारमार्थ्यापारमार्थ्याभ्यां व्याघाताद् ब्रह्मण्यनैकान्त्याच्च । सदिदं सदिदमित्यध्यस्ताधिष्ठानयोरेकवित्तिवेद्यत्वात् । 'दृश्यते त्वद्भ्यया बुद्ध्ये'ति दृश्यत्वशास्त्राच्च । 'यत् तदद्रेश्यमि'त्यादिसामान्यनिषेधस्योदाहृताद्र्यधीदृश्यत्वविशेषविधिशास्त्रापोदितस्य 'न चक्षुषा गृह्यत' इत्यादिशास्त्रान्तरकाठ्योपपत्तेः । दृश्यतैकस्वभावत्वं मिथ्यात्वहेतुः, स्वयंप्रकाशे ब्रह्मणि नानैकान्तिकमिति चेत् । न । भेदमात्रस्य पक्षत्वे जीवे स्वयम्प्रकाशे भागासिद्धेः । जडमात्रपक्षत्वे चात्मनित्यत्वादिष्वनैकान्त्यात् । ते हि तद्धर्मभूतज्ञानवेद्या एव परमार्थभूताश्च । अन्यथा जीवस्यानित्यत्वादिप्रसङ्गात् ।

सत्तापारमार्थ्यानुमानमप्याभासः । घटादिस्वरूपसत्तानां पारमार्थ्यस्य सिद्धत्वात् । अनुगतसत्तायाश्चासिद्धेरिति ।

तदेवं प्रत्यक्षादेरदुर्निरूपविषयतया दोषमूलता न सम्भावयितुं शक्येति ॥

---

१. 'यदिदमि', २. 'नि नित्य' ख. पाठः.

सिद्धान्तः ।

अत्र वदामः — सत्यं, न भेदा न प्रतीयन्ते, नापि तत्स्वरूपनिरूपणे प्रतियोगिज्ञानापेक्षा, नापि गौर्भिन्न इत्यादिव्यवहारानुपपत्तिः । किन्त्वज्ञातव्यवहारायोगेन प्रतियोगिनिरूप्यरूपभेदज्ञाने भेदेन प्रतियोगिज्ञानापेक्षायामन्योन्याश्रयो दुरुत्तरः । न चाणुत्वमहत्त्वादेर्व्यवहार एव प्रतियोगिसापेक्षता, न ज्ञाने । अन्योन्यनिरूप्यतयान्योन्याश्रयात् । एवमिहापि स्यादिति वाच्यम् । विषयभेदेन पूर्वपूर्वाणुत्वादिज्ञानेनोत्तरोत्तरदीर्घत्वादिनिरूपणोपपत्तेरुपन्यासवैषम्यात् ॥

संस्थानस्य भेदत्वनिरासः ।

यत्तु संस्थानमेव संस्थानिनो भेद इति । तन्न । संस्थानस्य हि संस्थानान्तरभेद्यत्वे मा भूदनवस्थेति स्वयमेव भेद इति परस्यापि सम्प्रतिपन्नम् । एवमन्यस्यापि सम्भवे नार्धजरतीयं युक्तम् । अपिचानुगतरूपाभावमते भावाः स्वत एव भिद्यन्ते । अन्यथा किंरूपाः सन्तु स्वतो भावाः, अनुगतरूपा हि नेष्यन्ते । न च ते निःस्वरूपा एव । अथ संस्थानभेदा एव भावा उपगम्येरन्[1], कः कस्यान्यो भेदः स्यात् । अथ कामं भावाः स्वत एव भिद्येरन् । किन्तु भ्रमसहस्वभावाः । संस्थानं तु भेदः स्वस्वाश्रययोरान्यात्म्यविभ्रमविरोधीति चेत् । ननु स्थाणुः पुरुषश्चेत्यादिविभ्रमा अपि शतशो दृश्यन्ते । न च तदेकाश्रयत्वसम्भावना तदुत्तेजिका । तदा तदा तन्नियमहेत्वभावात् । संस्थानभेदा अपि विरोधिज्ञानापेक्षा विभ्रमं विरुन्धन्तीति चेद्, अथापि कथं स्थाणुरयं पुरुषो वेति संशयः । न च गृहीतसंस्थानभेदशुक्लादिगुणगुण्यभेदविभ्रमे अपृथक्सिद्धिरुत्तेजिका । सदैवाभेदभ्रमे शुक्लादिविशिष्टप्रत्यक्षाभावप्रसङ्गात् । दोषबलादभेदभ्रमः संशयो वेति च स्वरूपभेदमतेऽपि स्यात् । प्रतियोग्युपसर्गगृहीतसंस्थानभेदो भ्रमादिविरोधीति चेत् । तत्तत्स्वरूपमेव तथा गृहीतं भ्रमादि विरोत्स्यतीति किमतिरेकेण । अपिचैवं तव तदेव भेदेन प्रतियोगिज्ञानापेक्षायामन्योन्याश्रयणम् । अस्माकं पुनरज्ञाततादात्म्येन भेदस्वरूपज्ञानापेक्षया भेदेन तन्निश्चयो भ्रमादिविरोधीत्युपपन्नम् । स्थाणुः

---

१. 'न् कस्या', २. 'वि' ख. पाठः.

पुरुषश्चेति तु तादात्म्यमवभासते। संशये तु भेदापातधीरेव, दोषप्राबल्यात्। प्रागारोपात् तु तदनुपस्थितिरेव, दोषसंस्कारादिभिरेवारोपोपपत्तेः। एवञ्च रूपरूपवदभेदविभ्रमेऽपि स्पर्शसामानाधिकरण्यज्ञानं विरोधीति न कल्पनीयम्। अभेदभ्रमविरोधिज्ञानानुगमोपपत्तेः। स्पर्शतद्वदभेदविभ्रमे रूपसामानाधिकरण्यज्ञानं विरोधीति कल्पनेऽन्योन्याश्रयाच्च। परस्य तु नागृहीततादात्म्येन प्रतियोगिज्ञानापेक्षया भेदेन ज्ञानमुपपद्यत इत्युक्तम्। एतेन संस्थानभेदस्य स्वपरनिर्वाहकत्वानुमानं प्रत्युक्तम्। भावानां स्वत एव भेदव्यवहारहेतुत्वेन स्वसम्बन्धेनार्थान्तर इत्यादिहेत्वसिद्धेः॥

VIRAVANALLUR.

वस्तुसंस्थानस्य जातित्वनिरासः।

यदपि जातिर्नाम वस्तुसंस्थानमेवेति। तन्न। तस्य प्रतिवस्तुव्यावृत्तस्यानुगतव्यवहारानिर्वाहकत्वाद्, अश्वकादौ तुल्यसंस्थानेऽश्वादिव्यवहारागौणत्वप्रसङ्गाच्च। जातिव्यक्त्यादौ च साधारणात्मत्वासाधारणात्मत्वाद्यनुगतोपाधिनैवानुगतव्यवहारोपगमात्। अपिचैवं गवादिष्वेव गवादिशब्दा नानार्थाः प्रसज्येरन्। प्रवृत्तिनिमित्तभेदात्। सास्नाद्युपाधिकं गवादावनुगतमन्यत् सौसादृश्यमिति चेद्, नाममात्रविवादः। न च सास्नादिकमेव सदृशव्यवहारासाधारणहेतुविषयधर्मत्वेनानुगतिः क्रियते, परस्यासम्भवात्। नह्येकजात्येनावगतं सास्नादि गवादौ सदृशव्यवहारहेतुः, अनुगतजात्यनुपगमात्। न च सौसादृश्येन, अनवस्थानात्। स्वरूपेणैव चेद्, एकशफादिसंस्थानमपि गोसदृशव्यवहारहेतुः स्यादिति गोपदशक्यत्वापत्तेः। तावतो गौरवेण गवादिपदाशक्यत्वाच्च। तदज्ञानेऽपि गवादिपदादाकृतिविशेषविशिष्टगवादिविज्ञानाद् गवादिपदव्युत्पत्तेश्च। तस्य धेनुपदादौ गोत्वादेरिव शक्त्युपाधित्वकल्पनाया अप्यमूलत्वात्। तथा च स्वर्गेपुपशुवागादाविव प्रतिव्यक्ति गवादिपदव्युत्पत्तौ गौरवम्। क्वचिदेव गवादिपदव्युत्पत्तिः सदृशेऽर्थे सदृशशब्दप्रयोगहेतुरिति कल्पना तु निर्मूला, अतिप्रसक्ता च। गवयेऽपि गोसादृश्यात्, खण्डमुण्डादिगवीषु कथञ्चिद् वैसादृश्याच्च॥

---

१. 'वा' ख. पाठः.

सिद्धान्ते अनुगतव्यवहारोपपादनम् ।

यत्पुनरनुगतव्यवहारविकल्पदूषणं, तत्रोच्यते — परेण तावदेकजातीयपिण्डेषु प्रथमदर्शनं निर्विकल्पकं, द्वितीयादिदर्शनं तु सविकल्पकम् । जातेरनुवृत्तिरपि हि तत्र भासत इति विशेष उपेयते । न च तत्रानुवृत्तिरेकत्वं, संस्थानलक्षणजातेरन्यान्यत्वात् । न च सादृश्यं, गुणेषु गुणावयवकर्मान्यतमसामान्यस्य सदृशव्यवहारासाधारणहेतुधर्मस्य दुर्वचत्वाद्, अन्यस्य चानुवृत्तिरूपस्य गन्धादिसंस्थाने सविकल्पकग्राह्यस्यानिरूपणात् । नाप्येकजातीयत्वं, सास्नादावपि संस्थानसादृश्यविवक्षायामनवस्थानात् । अतिरिक्तैकजात्युपगमे किं गवादौ तत्प्रद्वेषेण । यदि च संस्थानस्वरूपमात्रमनुवृत्तिः, प्रथमदर्शनमपि तद्विषयमेवेति सविकल्पकमापद्येत । अनुभूतापेक्षावच्छेद्यं संस्थानमेवानुवृत्तिः, सा च गृह्यते द्वितीयादिज्ञाने अयमपि गौरयमपि गौरिति, न प्रथमे । अयं गौरित्येवावभासादिति चेद्, एवं घटबुद्धिरप्यनुभूतगवापेक्षावच्छेद्यसंस्थानविषया कस्मान्न भवति । न च वैसादृश्यात्, तव गवामप्यन्योन्यगुणावयवादिसामान्याभावात् । गुणादावनुगतजात्यनुपगमात्, संस्थानसादृश्यानवस्थानाच्च । न च स्वभावात्, जातिभेदस्य नियामकत्वसम्भवात् । तथाच प्रतिगवमान्यजात्ये संस्थानानुवृत्तिविषयत्वमेव द्वितीयादिज्ञानस्य दुर्भणमित्यनुगतजातिरकामेनाप्यतिरिक्तोपेतव्या । न चानुगतिर्व्यवहारस्य सौसादृश्यमेव, न खलु स्वर्गेषुपशुवाग्वज्रादिषु गोव्यवहारानुगतिः । शब्दभेद इवार्थभेदेऽपि तदनुगमाप्रसिद्धेः । तस्मादुक्तस्वविषयशब्दैकजातीयत्वं व्यवहारस्यानुगतिः । विषयभेदे सति बुद्धबोधिसजातीयत्वं तु ज्ञानस्य । अर्थस्य तु भिद्यमानेष्वभिन्नत्वमनुगतिः । तत्रायमनुगतव्यवहार ईदृशीमर्थानुगतिं साधयन्नौपाधिकभेदेष्वाकाशादिषु व्यक्त्यभेदं स्वरसभेदेषु गवादिषु जात्याद्यभेदं च साधयति । शुक्लः शुक्ल इत्याद्यनुगतव्यवहारोऽपि सामान्यात्मा[1] अनुगतशुक्लाद्यालम्बन एव ।

तस्माद् वस्तुसंस्थानातिरिक्तैव जातिः, शक्त्यैकत्वसकृद्व्युत्पत्त्याद्युपपत्तेः । अन्यथा निःसामान्यस्वलक्षणार्थवादिसौगतसङ्गतमतेस्तान्त्रिकस्य सकृदुक्ते गोशब्दे व्यक्तिविशेषोऽवबुध्येत । न खलु ततः संस्थानसुसदृशत्वमिति प्रजायते गोषु, न च कृत्स्नैकदेशवृत्तिविकल्पदुःसहता, तादात्म्योपगमात् ।

---

१. 'त्मनानु' ख० पाठः.

सत्ताया एव जातित्वम् ।

सा च सर्वेषु भेदेषु सत्तैकैव, लाघवात् । सूचीपाशादिपरामर्शे सत्येवाकाशस्येव गवादिभेदपरामर्शे सत्येव गोत्वादिभेदावगमस्यौपाधिकत्वोपपत्तेः । अतिरेके गौरवाद्, मानाभावाच्च । सन् गौरिति सत्तागोत्वभेदप्रत्ययस्य च गवादिविशेषोपधानभानाभाननिमित्तत्वात् । अनवधारितरूपो गवादिरेव सत्तामंशेनोपधत्ते अंशेनावधारितरूप इति विशेषोपपत्तेः, अन्तराकाशमित्यादौ तस्यैव रूपभेदेन द्विरवभासदर्शनाद्, अनुवृत्तिव्यावृत्तिवैधर्म्यस्य चाकाशघटाकाशादिवदभेदेऽपि भवतः सत्तागोत्वभेदाप्रयोजकत्वात् । तदिदमभिप्रयन्त आहुः —

"सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥"

इति ।

अपरे तु अविद्यैव सर्वभेदानुगता गोत्वादिजातिरित्याहुः । सा चेयं सत्ता गवादिभेदेनैव गृह्यते, न सत्तामात्रेणेति यथायथं विशिष्टव्यवहारा व्यवतिष्ठन्ते । नहि वयमपोदिताशेषविशेषसत्तामात्रपरिनिष्ठितं प्रत्यक्षादिकमाचक्ष्महे यथौपनिषदं विज्ञानम् । उक्तरीत्या तादात्म्यानवबोधमूलविभ्रममयतत्त्वद्वेषोपसृष्टसत्ताविषयत्वानपवादात् । न च यौक्तिकभेदविभ्रमत्वावगमोऽपि तत्त्वपरिशेषाय क्षमते, दिङ्मोहादावदर्शनात् । आरोप्यापवादविकल्पेन विषयस्वभावापरोक्षावभासे सत्येव न रजतामियं शुक्तिः 'नेति नेति', आत्माहमि'त्यादौ तत्त्वपरिशेषदर्शनात् । स चायमागमादृते सत्तात्मनि न सम्भवतीत्यस्थाने विशिष्टप्रतीतिविरोधाद्युपन्यासो मुग्धदासेरमोहनफलः ॥

भेदापारमार्थ्यानुमाने दूषणोद्धारः ।

यदपि बाधादिभिर्भेदापारमार्थ्यानुमानदूषणं, तदप्यौत्प्रेक्षिकसमयप्रतारितलोकस्य प्रेक्षावैकल्याविष्करणमेव । नहि सत्ताप्रत्ययो भेदापारमार्थ्यं विहन्ति । शुक्तिरजतादयोऽपि हि सन्त एव प्रतीयन्ते । न च ते परमार्थ

---

१. 'स्य ग', २. 'पा' ख. पाठः.

इति वक्ष्यते । न च प्रतीयमानं सत्यमसत्यमिति वा प्रतीयते । यथायथं प्रत्ययानां सामान्यविशेषात्मवस्तुमात्रावभासित्वात् । नातो धर्मिज्ञानबाधः । नापि बाधेन सोपाधि(क)त्वम् । परस्योपाधिसाध्यव्याप्तयुदाहरणाभावात्, तस्य हेतुसमत्वाच्च । अनन्यात्मत्वधीविषयत्वं हेतुः । अन्यस्यान्यात्मना निषेधप्रमा च बाधः । नेदं रजतमिति शुक्त्यात्मना निषेधेन रजतबाधात् । नहि नेदं रजतमित्येव तद्बाधः, रजतस्यापीदम्भावाविरोधात् । किन्तु शुक्त्यात्मनैव, भेदेन च घटोऽयमित्यादिधरिवान्यात्मना निषेधोल्लेखिनी । अन्यथा व्यवहारसङ्कर्यप्रसङ्गात् । नञर्थविकल्पव्यवहाराभावस्य च प्रतियोगिनिरूप्यरूपानवभासनिमित्तत्वात् । तदनवभासश्च प्रतियोगिनामानन्त्येनैकरूपबुद्ध्यनुपारोहात् । घटादिबुद्धौ यावदुपस्थितपटाद्यात्मतोल्लेख्यावृत्त्युल्लेखस्य च सर्वजनीनत्वात् । यत्तु देशकालादिभेदेन निषेधबुद्धिरेव बाध इति, तत् तथैव । घटादिस्तु तदैव तस्मिन्नेव सत्तासामान्योपाधौ पटाद्यात्मताव्यावृत्त्या बुध्यते । नन्वेवं बाधबुद्धिरेवैकेयमिति कुत्र कस्य प्रतिपन्नस्यायं बाधः स्यात् । न । सत्तोपाधावेव तदात्मना सर्वात्मताप्रतिपत्तियोग्यस्य घटादेरन्यात्मना बाधोपपत्तेः । इदमात्मना शुक्त्यभेदप्रतिपन्नं तु रजतमनन्तरं बाध्यते, प्राग् बाधसामग्र्यसमावेशात् । घटादिस्तु सैव बाधसामग्रीति बाधेनैव प्रतिपद्यते । न चैवं विसंवादो घटादिव्यवहारस्याभाव एव वा स्यादिति शङ्क्यम् । तथाविधैरेव प्रत्ययैरनादिसिद्धव्यवहाराविसंवादस्यानतिशङ्क्यत्वात् । यदात्मना यस्य बाधस्तदात्मना तद्व्यवहारानुपगमाच्च । अत एव तत्र बाधाप्रसिद्धिरपि न दुष्यति, तत्प्रत्ययनिबन्धनव्यवहाराविसंवादेनागन्तुबाधवैलक्षण्यात् । एतेनेदं निरस्तम् —

"अविरुद्धा बलीयस्त्या घटास्तित्वधिया कथम् ।
निषेध्यन्त्यापि बाध्येत पटो देशादिभेदतः ॥"

इति,

"अन्यस्यान्यात्मना सत्त्वे नैत्यिकी प्रतिषेधधीः ।
विरुद्धातः परेत्येषा बलीयस्त्वेन बाधिका ॥"

इति । किमुक्तं भवति । भेदबुद्धिर्न तत्प्रतीत्युपाधिगत्वे तदैव तत्प्रतिषेधप्रमारूपार्थस्य बाधः रजतमनिषेधरूपत्वाविदानव शुक्तिरजतभेदबुद्धिरिति ।

---

१. 'भा' अ. भा.

अत्र पक्षे बाधितत्वपर्यवसायिनि हेतौ अदोषमूलज्ञानानालम्बनत्वं, भ्रममात्रसिद्धत्वं, विद्यमानाभेदाज्ञानाधीनस्थितिकत्वं, तदपेक्षापादनीयविधिनिषेधानर्हत्वं वा साध्यम् । यदि चान्यदेव व्यावृत्तत्वं, तदा बाध एव साध्य इत्यनुपाधिः ।

यदपि साध्यस्य पारमार्थ्येऽपारमार्थ्ये च व्याघात इति । तदपि न । तदपारमार्थ्येऽपि भेदसत्यत्वविरोधात् । अन्यथा तदपारमार्थ्यासत्त्वे किमपारमार्थ्येन विकल्प्येत । सत्य एव भेदे तदारोपितमिति चेत् । कुतः पुनरारोपः । बाधनुमानादिति चेद्, एवं तदनुमितेरारोपत्वे को हेतुः । भेदसत्यत्वाधिगम इति चेत् । केन पुनस्तदधिगमः । प्रत्येकत्वं तावद् रज्जुसर्पादिनानेकान्तम् । अर्थक्रियाकारित्वं व्यवहाराविसंवादित्वं च स्वाभिमतानामपि स्वकाले तथाभावात् । अदोषाधीनविषयत्वमबाध्यत्वं चासिद्धसन्दिग्धम् । तस्माद् भेदानामपारमार्थ्यमनुमानेन धर्मिसमस्वभावं सिध्यत् स्वविरोधिधर्मान्तरं विरुणद्धीति न भेदसत्यता । अपिचैवं

सत्यत्वं यद्यसत्यं ते जगतः स्यादसत्यता ।
धर्मान्तरेण सत्यत्वे तस्य स्यादनवस्थितिः ॥
यदि स्वेनैव सत्यत्वमात्मनश्च परस्य च ।
मिथ्यात्वमपि किं न स्यादात्मनश्च परस्य च ॥

मिथ्यात्वस्य मिथ्यात्वान्तरमनपेक्ष्य मिथ्यात्वेऽपि धर्मिसमस्वभावत्वानपवादेन जगत्सत्यतानापत्तेः । अन्यथा कस्य मिथ्यात्वं विकल्प्येतेत्युक्तम् । एवं यत्र,

बाधिसाध्यमवस्थाप्य तद्विकल्पेन दूष्यते ।
तत्सिद्धौ तदसिद्धौ च विरोधस्तत्र दुस्तरः ॥
परोपदर्शितप्रायः सहचारप्रसञ्जितम् ।
साध्यमेव विकल्पेन दूष्यते तत्र दुष्यति ॥

यथैव, किमिदमपारमार्थ्यम् । न तावदसत्त्वं, पक्षतानिरोधात् । नाप्यर्थक्रियाशून्यत्वम्[1] बाधात् । नापि स्वसंवेद्यमानाधिकरणानिष्टात्यन्ताभावप्रतियोगित्वं, विरोधादित्यादि ॥

---

१. 'किं पा', २. 'नां पा' ख. पाठः।

बाधबाधे बाध्यसत्यत्वनिरासः ।

एतेन बाधबाधे बाध्यसत्यतेति निरस्तम् । सति बाधधर्मिणि तदबाधात् । ब्रह्मणि रज्जौ वा सत्येव तद्बाधबाधेन वैशेष्यात् । एवं साधनधर्मोऽपि तादृगेव स्वसाध्यं साधयति, साध्यसिद्धेः प्रागबाधेनार्थक्रियाकारित्वात् । साध्यसिद्धिपर्यवसाने च तस्य पुनरनपेक्ष्यत्वात् । न च बाधकबाधे बाध्यसत्यता, ज्योतिष्टोमप्रयोगे औत्सर्गिकद्वादशशतदक्षिणाबाधकस्य नैमित्तिकादक्षिण्यादेरुत्तरनिमित्तसर्ववेदसादिना बाधेऽपि तदप्रत्यापत्तेः । 'एचोऽयवायावः' (६. १. ७८) इत्युत्सृष्टबाधकस्य 'एङः पदान्तादति' (६. १. १०९) इति पूर्वरूपत्वस्य 'प्रकृत्यान्तः पादमव्यपरे' (६. १. ११५) इति बाधेऽपि अयवायप्रत्यापत्तेः, वृन्तभ्रमरभ्रमस्य पलाशकुसुमदावभ्रमबाधकस्य बाधेऽपि तदसत्यत्वाच्च । आरोप्यस्वरूपबाधो हि तत्त्वपरिशेषपर्यन्तस्तदपवादेन विषयापरोक्षमपेक्षते । केवलबुद्धिबाधस्तु मिथ्याविषयत्वाध्यवसायो विशेषदर्शनादेवोपपद्यते । तत्र यदि व्याप्यभ्रमरभ्रमेणाक्षसन्निकृष्टपलाशकुसुमयोग्यतया नायं दाव इति विषयापरोक्षमेव सम्पद्यते, यदि वा दावभ्रमहेतुदोषप्राबल्येन परोक्षमवतिष्ठते, उभयथापि दावभ्रमो बाध्यत एवेति, एतेन पलाशे दावत्वनिवृत्तिः । वृन्तेन तद्बुद्धिनिवृत्तिस्तु स्वयमेव क्षणिकत्वात् । भ्रमरभ्रमस्तु दावबुद्ध्यन्तरोदयप्रतिबन्धको न बाध इति प्रत्युक्तम् । बाधकोच्छेदप्रसङ्गात् । रजतत्वनिवृत्तिः शुक्तित्वेन । तद्बुद्धिनिवृत्तिस्तु स्वयमेव । शुक्तित्वधीश्च भ्रमान्तरोदयप्रतिबन्धिकेति सुवचत्वात् ।

अपिचैवं धर्मस्य तदतद्रूपविकल्पेन प्रत्यवस्थानाद् नित्यसमजातिरेषा, एवं हीदं पर्यवस्यति । परार्थापारमार्थ्यधर्मित्वात् परमार्था भेदाः, धर्मिणोऽपारमार्थ्ये धर्मपारमार्थ्ययोगात् । अपरमार्थापारमार्थ्यधर्मित्वाद् वा, आरोपितस्य स्वभावाविघातकत्वात् । तथा परमार्थहेतुधर्मित्वात् परमार्था भेदाः हेतुधर्म एव व्यावर्तमानत्वहेतोरनैकान्त्यात्, अपरमार्थहेतुधार्मित्वाद् वा स्वरूपासिद्धेरिति । यथा लक्षिता सा गौतमेन 'नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः' (न्यायद० अध्या० ५. आह्नि० १. सू० ३९) इति । अनित्यः शब्द इति प्रतिज्ञायामनित्यत्वस्य नित्यत्वेऽनित्यत्वे वा शब्दनित्यत्वोपपादनेन प्रत्यव-

---

१. 'त्तिस्तु स्व' ख. पाठः २. 'तत्वा' क. पाठः.

स्थानं नित्यसमजातिरित्यर्थः । ताममूं नित्यत्वानित्यत्वाभिन्नत्वाभिन्नत्वकार्यत्वाकार्यत्वादिसर्वधर्मोपलक्षणेनोपरञ्जकसमामाचक्षते । तदुद्धारं च सोऽसूत्रयद् *"निषेध्ये नित्यमनित्यभावादनित्यत्वोपपत्तेः प्रतिषेधाभावः" (न्यायद० अध्या० ५. आह्नि० १. सू० ३६) इति । नायमपारमार्थ्यवान् अपरमार्थतद्वत्त्वात् परमार्थतद्वत्त्वाद् वेत्येव निषेध्ये हेतुतया सर्वथैवापारमार्थ्याङ्गीकारादुक्तोपपत्तिमूलप्रतिषेधो न भवति । प्रतिज्ञाङ्गीकारे हेतोर्हेत्वङ्गीकारे च तस्या व्याघातादिति । यत्तु अप्रामाणिकधर्मपरम्परापादनेन दूषणं हि नित्यसमा । मिथ्यात्वामिथ्यात्वं च प्रामाणिकं, रज्जौ रज्जुबुद्धेः सर्पबुद्धिबाध्यत्वस्य बाध्यत्वादिति । तत् तुच्छम् । अपारमार्थ्यस्य ह्यपरमार्थनिरूप्यस्य पारमार्थ्यं सत्यत्वापरपर्यायमप्रामाणिकम् । नहि सर्पोऽपरमार्थस्तद्विसर्पणं परमार्थ इति युज्यते । सर्पत्वादि तु साधारण्येन तदेकनिरूप्यत्वाभावात् तदपारमार्थ्यं नानुविधत्ते । धर्मिसमसत्ताकतया मानसिद्धस्य भेदापारमार्थ्यस्य सति विषये बाध्यत्वलक्षणमपारमार्थ्यमप्यप्रामाणिकमेव । रज्जौ हि सर्पबुद्ध्यापादितरज्जुत्वापारमार्थ्यस्य पुना रज्जुबुद्धिबाध्यतया सत्येव विषये बाध्यत्वलक्षणमपारमार्थ्यमुपपद्यते । रज्जुसर्पबुद्ध्या तु न तदपारमार्थ्यं बाध्यते, स्वभावहानायोगात् । एवमिह मानसिद्धे भेदापारमार्थ्ये भेदसत्यत्वपर्यवसाय्यपारमार्थ्यमौत्प्रेक्षिकसमयाजीवेनापि न प्रामाणिकमुत्प्रेक्षितुं शक्यम् ॥

शून्यनिरासः ।

एतेन माध्यमिकोक्तस्य ज्ञानबाध्यत्वस्य बाध्यत्वाभ्युपगमो व्याख्यातः । बाधमात्रस्यारोप्यविषयतत्त्वज्ञानाधीनतया तन्निर्मासविरोधिनो बाध्यत्वस्य तत्प्रवृत्त्यैव बाध्यत्वोपपत्तेः । अथ ज्ञाने बाध्यत्वं न मिथ्याविषयत्वं पराभिमतम् । किन्तु शून्यपरिशेषावधिः स्वरूपनिषेधः । न । ज्ञाने सत्यसति वा तन्निषेधसिद्धिविघातात् । सिद्धान्त इव साधारण्येन स्वाभावविकल्पावभासं

१. 'त्वाद् नि' क. पाठः. २. 'ध्य', ६. 'त्यभावा' ख. पाठः.

* प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेरि'त्यादि मुद्रितन्यायदर्शनसूत्रपाठः ।

ज्ञानं शून्यावसानं स्यादिति चेद्, न। सिद्धान्ते सत्ताभूतस्य स्वाभावस्य स्वकालेऽपि भावोपगमात्। असत्ताभूतस्य स्वाभावस्य स्वकालभावित्वे च स्वावभासविरोधात्। अभाव एव तदारोपे च तत्सत्तावभासविरोधात्। विषयानुविद्धावभासित्वादारोप्यस्यात्तावभासप्रसङ्गाच्च। तत् स्वसत्तावभासाविरोधिविषयालम्बनस्वाभावविकल्पेन स्वबाधे वाच्ये शून्यावधिबाध्यत्वस्य विषयतत्त्वावभासबाध्यत्वोपगम इति॥

परोक्तभ्रमानवस्थित्यादिदूषणपरिहारः।

यदपि बाधकज्ञानस्यापि विशेषालम्बनतया भ्रमत्वे तस्य तस्योत्तरोत्तरबाधकज्ञानापेक्षया भ्रमानवस्थितिरिति। तदपि न।

नहि व्यावर्तमानत्वबुद्धिर्भेदस्य बाधिका।
किन्तु बाध्यत्वधीहेतुर्बाधकं ब्रह्मवेदनम्॥

तच्च स्वरूपमात्रावभासमेव भ्रमविरोधीति न्यरूरुपाम।

स्वतोव्यावर्तमानत्वबाध्यताधीश्च नान्यतः।
अतो नान्यान्यबाध्यत्वसिद्धौ हेत्वनवस्थितिः॥
परमार्थो न बाधोऽपि बाध्यभेदविकल्पितः।
किन्तु तेनैव बाधेन भेद इत्येव[1] बाध्यते॥
विशेषा हि प्रसज्यन्ते यावन्तो ये च के च ते।
यौगपद्येन बाध्यन्ते नेति नेतीति वीप्सया॥
रज्जुतत्त्वधिया सर्पबाधे सर्पनिरूपिते।
बाधिते न पुनः सर्पसत्तैवं भेदसत्यता॥
सर्पबाधविकल्पैव रज्जुतत्त्वापरोक्षधीः।
यत् तत् तु रज्जुसमसत् सर्पसत्त्वनिबन्धनम्॥
सत्तामात्रापरोक्षं तु सर्वशो भेदबाधने।
विधिना वा निषेधेन न विकल्पनमर्हति॥

किन्तु,

---

१. बु[2] २. [2]षं क. पाठः.

निर्विशेषपदारूढं स्वे महिम्नि व्यवस्थितम् ।
संविदेकरसं सत्ताकैवल्यमवशिष्यते ॥

एवञ्च काल्पनिकबाधस्यापि काल्पनिकत्वाद् बाधकृप्तिरूपैव भ्रान्तिरविरतेति निश्शेषभ्रमनिवृत्तिरूपनिर्वाणानुपपत्तिरिति निरस्तम् ।

यत्तु भ्रमबुद्धिविनाशं बाधं परिकल्प्य तत्तन्निवर्तकोत्तरोत्तरज्ञानापेक्षायामनवस्थानात् कस्यचित् स्वयं नाशे काल्पनिकघटादिनाशस्येव तन्नाशस्य काल्पनिकत्वान्नाशकृप्तिरूपभ्रान्तिः स्थितेत्यनिर्मोक्ष इति । तदननुभाष्यानुभाषणम् । न खल्वारोप्यं तन्निषेधविकल्पविषयतत्त्वावभासेन नाश्यते । किन्तु विधिनिषेधप्रत्ययानर्हमापद्यते । अविद्याभेदभ्रमनिवृत्तिवादाश्च सिद्धान्तेषु सति तत्त्वज्ञाने तस्य सत्त्वव्यवहारायोग्यतया गौणाः । घटादयो हि नाशे न सत्त्वव्यवहारार्हा इति । तथाच लिङ्गं 'न पश्यो मृत्युं पश्यति', 'तत् केन कं पश्येदि'ति । एतेन 'भूयश्चान्ते विश्वमायानिवृत्तिः

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः"

इत्यादिश्रुतिस्मृतिवादाश्च व्याख्याताः ।

घटस्य मुद्गराघाते नाशो यः शकलावधिः ।
कथं स शुक्तिरूप्यस्य कल्पितस्यावकल्पते ॥
अविद्यादिविभेदश्च सत्तामात्रे विकल्पितः ।
विनाशहेत्वसम्बन्धान्न विनाशनमर्हति ॥

ननु वह्निसंस्पर्शविषये श्यामनाशो घटावधिरिव तत्त्वधीविषये सत्तामात्रावधिरविद्यादिभेदविनाशः स्यादिति चेद्, न । अविद्यादिभेदस्य निषेधविकल्पेनैव तत्त्वावबोधनात् ।

"अन्यदेव तद् विदितादथो अविदितादधि"

'नेति नेत्यात्मे'त्यादिश्रवणात् । नहि यस्य यदात्मना त्रैकालिको निषेधस्तस्य तदवधि ध्वंसो भवति, घटध्वंसस्य तन्तुपटाद्यवधित्वादर्शनात् । न चाविद्यादेः स्वानुगतसद्रूपावधिध्वंसः स्याद् मृद्रूपावधिरिव घटस्येति वाच्यम्। इदमनुगतावभासस्यारोप्यरूप्यस्य स्वकालनिषिद्धस्य शुक्तितत्त्वज्ञानेन लोके

तदवधिकध्वंसाप्रसिद्धेः । अदृष्टशकलसर्वलोकाविदितध्वंसकल्पने मानाभावाद्, मृषैव केवलं रजतमभासिष्टेति सर्वलोकानुभवविरोधाच्च । तस्मादविद्यादिभेदस्य न तत्त्ववेदनाद् विनाशः, किन्तु बाध एवेति ॥

व्यावर्तमानत्वस्य ब्रह्मणि व्यभिचारोद्धारः ।


यदपि व्यावर्तमानत्वं ब्रह्मण्यनैकान्तिकमिति । तदपि तान्त्रिकस्य तत्त्वदर्शनविद्वेषोन्मादविलसितम् । 'ऐतदात्म्यमिदं सर्वमि'ति सर्वात्मत्वश्रवणात्, तदात्मनश्च ततो व्यावृत्त्यनुपपत्तेः । एवं ब्रह्मणो जडत्वापात इति चेत्, किं कुर्मः । ज्योतिष्ट्वाज्ञानविरोध इति चेद्, ननु विश्वात्मताज्ञानमपि दर्शितमिति कर्तव्यो यत्नः, चैतन्यैकरसमेव सत्तात्मकं ब्रह्म जगदात्मना विवर्तत इति कृतोऽत्र[1] यत्नो मनीषिभिः । नहि घटादिरिव ब्रह्म कस्यचित् सामान्यस्य विशेषः, येन कुतश्चिद् व्यावर्त्येत । न च घटादिबुद्धाविव पटादिर्जगद्बुद्धौ ब्रह्म[2] नालम्बनं, सदित्येव सर्वानुभवात् । अन्यथा सत्ताव्यतिरेके निःस्वभावस्य भानानुपपत्तेः । नन्वन्या सत्ता प्रतिभासते, न ब्रह्मसत्ता सर्वमानातीत्वात् । अन्यथा ब्रह्मसत्तयैव सत्त्वे जगतः पारमार्थ्यप्रसङ्गादिति चेद्, न । अनुगतसत्ताद्वैधे प्रमाणाभावात् । ननु त्रिविधं सत्त्वमिष्टं भवतां, सत्यमिष्टं प्राचाम् । किन्तु तद् वस्तुस्वरूपावसितमतुच्छत्वापरपर्यायमबाध्यत्वमर्थक्रियामात्रकारित्वं प्रतिभासमात्रार्हत्वमित्येवं विवक्षाभेदेन ।

सर्वानुगतसत्ता तु ब्रह्मणो नातिरिच्यते ।
भिन्नस्वरूपसत्त्वेन नानुगच्छति सन्मतिः ॥
विशेषेषु ततो ब्रह्मसत्तया सानुगच्छति ।
विशेषा विनिवर्तन्ते सत्तायामेव सर्वशः ॥
बाध्यमाना न सत्ता तु ब्रह्मैवाबाधिता सती ।
सत्तैकात्मतया सर्वे[3] भावाः सन्ति पृथक् पृथक् ॥
ततो विविच्यमानानां किं रूपमवशिष्यते ।
सामान्यरूपनिर्मुक्ता विशेषा बुद्धसम्मताः ॥

---

१. 'तो त्र', २. 'ह्मा', ३. 'र्वे' ख. पाठः.

तद्विनेयेन शक्येरन्नुपगन्तुं न मादृशैः ।
यत् सामान्यविशेषात्मा भावः सर्वोऽपि भाव्यते ॥
विकल्पेन विशेषात्मा सामान्यात्मा तु सत्तया ।
स्वेतरानुगताभावादव्यावृत्तेः[1] कुतश्चन ॥
असामान्यविशेषात्मा ब्रह्मसत्ता तु शिष्यते ।
यावद् भेदविकल्पं तु सत्तासामान्यता मिता ॥
विलीनेषु विकल्पेषु न सामान्यति सा पुनः ।
मानातीतापि सा सत्ता विवर्तैरुपसर्गतः ॥
सर्वमानपदं रूपारोपे नैत्रं नभो यथा ।



यथाहुः —

"सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते"

इति । वस्तुतस्तु

मानवृत्त्युपधाने तां व्यञ्जयन्ती गवादि च ।
स्वयं प्रकाशते सत्ता चैतन्यैकरसा हि सा ॥

तथाच श्रुतिः 'प्रतिबोधविदितमि'ति । न चैवं विशिष्टा सती सत्ता भिन्नैवानुभूयमाना कथमव्यावृत्तानुगम्येतेति शङ्क्यम् । सत्तानुगतव्यवहारस्यानुगतविषयापेक्षितया तदनुगमसिद्धेः । सादृश्यादनुगतव्यवहारं सर्वत्रैवाभ्युपयतः क्षणिकत्वेऽपि प्रत्यभिज्ञासादृश्यादेव सुघटेति सौगतसङ्गत एव तान्त्रिकसमयः स्यात् । न चैवं जगतः पारमार्थ्यप्रसङ्गः । व्यावृत्तात्मना रज्जुसर्पधारादिवदपारमार्थ्योपपत्तेः । तदेवं

विविक्तसत्तासम्बोधे जगद्बाधो जगन्मतौ ।
सत्तानुवर्तते तत्र ब्रह्म व्यावर्ततां कुतः ॥

एतेन व्यावृत्तादव्यावृत्तस्य ब्रह्मणो व्यावृत्तत्वादनैकान्त्यमिति निरस्तम् । न हि भेदतावन्मात्रं ब्रह्म, भेदा एव तु ब्रह्ममात्रमित्युपगमात् । यत्तु जगद् न ब्रह्मेति व्यावर्तमानत्वं ब्रह्मणि विकल्प्यते विकल्पितं च तदपारमार्थ्यलिङ्गमुपेयते घटादावपीत्यनैकान्तिकतैवेति । तन्न । धर्मिसमस्वभावस्य तस्य हेतुत्वोपगमाद्, जगदुपाधिभेदविकल्पेन ब्रह्मणोऽपि बाध्यत्वे विरोधाभावाच्च । सत्तामात्रात्मपरिशेषो हि तत्त्वमुपगम्यते । तत्र च न व्यावर्तमानत्वमिति । ननु च

---

१. 'तैः' क. पाठः.

येषु व्यावर्तमानेषु यत्किञ्चिदनुवर्तते ।
तत् तेभ्यो भिद्यते सूत्रं कुसुमेभ्य इव स्रजि ॥
व्यावृत्तेष्वनुवृत्तं च भेदेभ्यो ब्रह्म भिद्यते ।
तच्च व्यावर्तमानत्वमित्यनेकान्तता पुनः ॥

न ।

असद्भावमनापाद्य भेदानेभ्यो न भिद्यते ।
असद्भाविषु भेदेषु ब्रह्म व्यावर्ततां कुतः ॥
तुल्यसत्ताकसामान्यविशेषात्मसु वस्तुषु ।
सोऽयं न्यायो विनेतव्यो नारोप्यविषयेषु सः ॥
घटत्वव्यतिभेदे च कः स्वभावो घटस्य वा ।
आत्मा विशेषसामान्ये भावानामविशेषतः ॥
अनपेक्ष्यविशेषात्मा सामान्यात्मा त्वपेक्षया ।
एवं वैकल्पिकं भेदमादाय न्यायसङ्गतिः ॥
कथञ्चित् तुल्यसत्त्वेषु नारोप्यविषयेषु तु ।

यत्तु—

"व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य च"

इति विष्णुपुराणे व्यतिरेकवचनं ब्रह्मणः, तत् स्वरूपावभासे बाधेन जगदसम्भेदाभिप्रायम् । अन्यथा 'व्यतिरिक्तं न यस्यास्ती'ति विरोधात् । एकव्यतिरेकस्यान्यव्यतिरेकनान्तरीयकत्वात् । अथवा 'व्यतिरिक्तं न यस्यास्ती'त्युदिते जगन्मात्रमेव ब्रह्मेति मा शङ्कीति 'व्यतिरिक्तोऽखिलस्य चे'ति जगदपेक्षयैव स्वरूपं विकल्प्यते कथं तद्बाधेन प्रतिपद्येतेति । तत् सिद्धं सर्वभेदा अपरमार्थाः व्यावर्तमानत्वाद् रज्जुसर्पधारादिवदिति ॥

सत्तापारमार्थ्यानुमानाभासत्वनिरासः ।

एवं सत्तापारमार्थ्यानुमानमपि नाभासः, अनुगतसत्तासिद्धेः । न च रज्जुदृष्टान्ते साध्यवैकल्यं, स्वारोप्यबाधावधित्वस्य पारमार्थ्यस्य तत्रापि सत्त्वात् । परन्तु सत्ताबाधावध्यन्तराभावात् सैव परमः परमार्थ इति ।

दृश्यत्वादप्येवमनुमेयं, धर्मिज्ञानाबाधात् । साधनव्यापकतया साध्यतया वा बाधस्यानुपाधित्वाद्, हेतुसाध्यपारमार्थ्यादिविकल्पदोषनिरासाच्च । यत्तु ब्रह्मण्यनैकान्तिकमिति । तन्न । तस्य स्वयम्प्रकाशसंविदात्मनो दृश्यत्वायोगात् । वेद्योपधानेऽपि तदवभासात्मना स्वयंभानोपगमात् । न च विषयारोप्ययोरेकवित्तिवेद्यतानियमः, तादात्म्येनोभयभानमात्रादिष्टसिद्धेः । तच्च स्वतः परतो वेत्यन्यदेतत् ॥

दृश्यते त्वग्रयेतिश्रुत्यर्थः ।

'दृश्यते त्वग्रया बुद्ध्ये'ति च न ब्रह्मणो दृश्यत्वं विधीयते, किन्तु एष सर्वेषु भूतेषु गूढोत्मा तादात्म्येन न प्रकाशते, स्वरूपेण । न चैवं निःश्रेयसायोगः, प्रकाशते तु सत्यामग्र्यायां बुद्धावित्युच्यते

"दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"

इति । अयोगिनो हि पराग्वृत्तैरिन्द्रियैर्विषयवृत्तिधना बुद्धिर्योगे सति विषयाश्लेषविगमपरिशुद्धा निशाता सूक्ष्मकुशकण्टकादेरग्रमिव भवति । तस्यामग्र्यबुद्धौ सत्यामात्मनो यत् स्वयमेव प्रकाशनं तदुच्यते 'दृश्यते त्वि'ति । न दृग्विषयत्वम्, अग्र्यबुद्धेरभावे न प्रकाशत इति प्रक्रमात् तद्भावे प्रकाशमात्रविवक्षौचित्यात् । ननु न प्रकाशत इति प्रकाशविषयत्वस्यैव निषेधः, दृश्यते त्विति वाक्यशेषात् । न च श्रुतिमात्रपरिच्छेद्ये न वाक्यशेषापेक्षा, सविता प्रकाशते प्रकाशः प्रकाशत इतिवद् घटः प्रकाशते न प्रकाशत इति प्रकाशविषयेऽपि प्रयोगादात्मा न प्रकाशत इत्यर्थसन्देहे वाक्यशेषापेक्षयैव तदर्थनिर्णयात् । 'सन्दिग्धे तु वाक्यशेषात्' (जै० १. ४. २९) इति न्यायात् । नैवम् । 'यत् तदद्रेश्यमग्राह्यम्', 'अविज्ञातो विज्ञाता', 'न विज्ञातेर्विज्ञातारं विजानीयाः' इत्यादिनिषेधेन विकल्पानुपपत्त्या च यावदर्थविशेषनियमं वाक्यशेषस्यापि सन्दिग्धत्वात् । नन्वेवमात्मनि दृश्यत्वादृश्यत्वाव्यवस्थितेः सन्दिग्धव्यभिचारित्वम्, आत्मातिरिक्तस्य सर्वस्य दृश्यत्वे जडत्वाव्यभिचारादात्मनि दृश्यत्वव्यापकविरुद्धोपलब्धिसनाथादृश्यत्वश्रुतेरेव बलवत्त्वात् । न च दृश्यतैकस्वभावत्वं जडत्वप्रयोजकं, गौरवात् । एवमद्रेश्यादिवाक्यस्य तत्परतया करणविशेषानवच्छिन्नदृश्यत्वसामान्यनिषेधस्वारस्यभङ्गायोगात् ।

---

१. 'ति तस्य' ख. पाठः.

दृश्यते त्वित्यस्य च सत्यामभ्यबुद्धावात्मा प्रकाशत इत्येव लब्धविषयत्वात् । कर्तृकरणसमभिव्याहारस्य कर्मास्ख्यातान्तदृशिप्रयोगोपाधित्वात् । यथा ये विक्लिद्यन्ते तण्डुलास्त उच्यन्ते पच्यन्ते तण्डुलाः सूदेनैधाग्निनेति नार्थभेदः । तथेहापि स्यादिति । एतेन 'न हिंस्यादि'ति सामान्यनिषेधश्रुत्या हिंसात्वादधर्म इति न्यायानुगृहीतया अग्नीषोमीयहिंसापि न प्राप्नुयादिति निरस्तम् । विधिविषयान्तराभावेन वैषम्यात् । तन्निषेधेऽपि तत्प्राप्तिं चोदैरिराम । ननु सत्तानुभूयते, सत्ता च तव ब्रह्म । न । अनुभूतेरेव सत्तयावभासात् । ननु सर्वे भावाः सत्तयैवावभासन्ते । सत्यं, व्यावृत्ता अपि ते भासन्ते । नन्वनुभूतिरपि व्यावर्तते । न । अनुभाव्याद् व्यावृत्त्यनुपपत्तेः । अनन्यगत्यानुभवाभेदेनैव सर्वस्यानुभाव्यत्वात् । न चानुभूतेरनुभूतिर्व्यावर्तते[1], प्रकाशमात्ररूपाविशेषात् । ननु दृष्टिश्रुत्यादयः संशयनिश्चयादयः परोक्षापरोक्षादयश्च करणभेदाधीना जातिभेदा नानुभवस्यैक्ये सम्भवन्ति । न च ते विषयोपाधिका इति साम्प्रतम् । जातिगुणादिभेदेषु विषयैकरूप्याभावेन तत्तज्जातिभेदस्य करणोपाधिकत्वावश्यम्भावात्, परोक्षापरोक्षभेदस्य विषयोपाधित्वसम्भवाच्च । यद्यपि परोक्षस्वभावाः केचिद् धर्मादयः, केचिदपरोक्षस्वभावाः सुखादयः, तथापि[2] ते नैकरूपेणानुगमयितुं शक्यन्ते । अपिच वह्न्यादयो नापरोक्षस्वभावाः । न परोक्षस्वभावाः । तद्विषयौ च परोक्षापरोक्षभेदौ करणभेदोपाधिकाविति युक्तम् । तस्माद् भेदोऽनुभवस्यापि । उच्यते । सर्वत्रैव प्रकाशरूपानुगमे दृष्ट्यादिरूपभेदाः कथञ्चिदौपाधिकाः कल्प्यन्ते, स्वभावभेदे मानाभावात् । यत्तु करणभेदाधीना दृष्ट्यादिभेदा इति । तदस्तु । तावद्विषयप्रकाशाञ्जनबुद्धिवृत्तिभेदोपगमात् । तदुपाधिश्च प्रकाशात्मानुभवभेदावभास इति ॥

ज्ञानस्य स्वप्रकाशत्वम् ।

स च स्वयम्प्रकाशः अनुभूतित्वाद् व्यतिरेकेण घटादिवत् । अन्यथा संविदः प्रकाशासिद्धेः । न हि सा स्वयमेव गृह्यते वृत्तिविरोधात् । विषयविषयिभावस्य भेदनियतत्वात् । यथाह तान्त्रिकोऽपि —

---

१. 'र्त्यते अप्र', २., ३. 'द' ख. पाठः.

"अङ्गुल्यग्रं स्वमात्मानं नात्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति ॥"

इति । यत्त्वाह — उत्पादक एव स्वविषयत्वविरोधः, न ज्ञापके, ज्ञातरि मनसि शब्दशब्दे पदपदे च तद्दर्शनादिति । तन्न । आत्ममनसोः स्वाविषयज्ञानहेतुत्वेऽपि स्वतः स्वविषयत्वासिद्धेः । परत्र च वाच्यवाचकरूपभेदेन भेदात् । घोषादिसाधारणशब्दत्वजात्या वाच्यस्य शकाराद्यानुपूर्वीकवर्णसमुदायरूपासाधारणाकारेण वाचकत्वात् पदपदस्यापि शक्तत्वपकाराद्यानुपूर्वीकवर्णसमुदायत्वरूपभेदेनैव वाच्यवाचकत्वादिति । ननु तद्व्यवहारशक्तत्वं तद्विषयत्वं ज्ञानस्य स्वस्मिन्नपीति चेत् । कुतः पुनरिदं व्यवतिष्ठेत । तत्प्रतिबद्धकरणजन्यत्वादिति चेत् । तर्हि ज्ञानं न स्वविषयं स्याद्, विषयेण हि मानस्य ज्ञानजननंप्रयोजकसम्बन्धः । तथाच घटज्ञानं न स्वविषयं, स्वजननानुकूलमानसम्बन्धानाश्रयत्वात् पटादिवत् । सिद्धान्ते तु संविदोऽजन्यतया स्वभावादेव स्वपरव्यवहारप्रयोजकतास्थीयते । न च जन्यसंविदोऽप्ययं स्वभावः, स्वभाववादापातादिति । नापि ज्ञानान्तरेण । न खलु घटादयो वा सुखादयो वान्योन्यं सिध्यन्ति, जडत्वात् । एवं ज्ञानमपि स्यात् । सत्तासंशयादिविरोधिस्वभावत्वाभावाविशेषात् । अपिच न ज्ञानद्वययौगपद्यं सम्भवति, एकदैकत्रैकावच्छेदेनैकजातीयोद्भूतपरिणामद्वययोगात् । पञ्चावधानादौ च नानेकज्ञानानां यौगपद्यं, न्यायिभिः क्रमिकत्वोपगमात् । सिद्धान्ते चैकस्यैव भेत्रावच्छेदवैचित्र्योपगमात् । भेदेऽपि करणानां स्वस्वविषययौगपद्ये गन्धरसादिप्रकाशाभेदानुभवात् । तान्त्रिकस्यापि करणवृत्तियौगपद्ये नानाविषयविचित्रैकज्ञानविकासोपगमाच्च । न च विनश्यदवस्था पूर्वसंविदुत्तरयानुभूयते, सत्त्वानुभवविरोधात् । स्थितिसमयावच्छिन्नसंविद्विषयैवोत्तरोत्पद्यते । उत्पत्त्यैव संविदः सविषयत्वादिति चेत् । तथापि सा यदि बुभुत्सितग्राह्या, तर्हि बुभुत्सान्तरितत्वाद् न पूर्वसंवित्सत्तानुभवः, तज्ज्ञानाज्ञानाभ्यां बुभुत्सानुपपत्तिः, ज्ञेयत्वनियमाभावेन कदाचित् स्वानुभवसंशयाद्यापत्तिश्च अबुभुत्सितग्राह्यत्वे सुखादिवदवश्यज्ञेयतया तत्तदनन्तसंविदावलीसमुदयस्यावर्जनीयत्वेन विषयान्तरसञ्चारो न स्यात्, अन्यज्ज्ञानमबुभुत्सितग्राह्यं न ज्ञानज्ञानमिति न कश्चि-

---

१. 'नसंयोजकः स', २. 'तं' ख. पाठः,

न्नियमहेतुः । कस्यचिज्ज्ञानस्य ग्राहकसामग्र्यमेलनसम्भवाद् न ज्ञानपारम्पर्याविरतिरिति चेत् । न । तद्विषयाधिकृतदुत्पादकसामग्र्या एव तद्ग्राहकत्वाद्, अतिरेके गौरवाद् मानाभावाच्च । सामग्र्यन्तरबलवत्तया विषयान्तरसञ्चार इति चेत्, तथापि यदेव ज्ञानमज्ञातं तदसिद्धौ तद्विषयासिद्धिसंशयादिप्रसङ्गः ।

अग्रिमस्य स्वतः सिद्धेः प्रसङ्गो यदि वार्यते ।
प्रथमस्य तथाभावे प्रद्वेषः किन्निबन्धनः ॥

एतेन ज्ञानं मानसप्रत्यक्षं क्षणिकात्मविशेषगुणत्वात् सुखादिवदिति प्रत्युक्तम् । क्षणिकत्वगुणत्वासिद्धेः, सुखादावन्यतरमते साध्यसाधनासम्प्रतिपत्तेः, साध्याप्रसिद्धेश्च । अपर आह — संविदो मानसप्रत्यक्षत्वे सुखादिवदबुभुत्सितग्राह्यत्वं नियतमिति ज्ञानज्ञानपरंपराविरामः । न च स्वापादौ जीवनप्रयत्ने व्यभिचारः, तदा तदभावात् । देहधारणादयश्च तदानीमीश्वरसङ्कल्पाधीना एव । 'यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः' इति परमात्मविषयम् 'अन्तरा भूतग्रामवत्—'(ब्र० ३. ३. ३५) इत्यधिकरणे स्थितम् । जागरे हि प्राणनादौ परायत्तो जीवोऽपि कर्ता । स्वापादौ तु परमात्मैव स्वसङ्कल्पेनेति दंशमशकादिभिरङ्गप्रत्यङ्गतोदादल्पबोधे देहपरिवर्तनादिप्रयत्नश्च धीविषय एवेति न व्यभिचारः । किञ्च मानसप्रत्यक्षत्वे सुखादिवदुपलभ्यत्वानियमात् बुभुत्सितग्राह्यत्वेऽपि संविदो बुभुत्सानियमोऽपि कल्प्येतेति बुभुत्सान्तरितज्ञानानवस्थैवेति ॥

ज्ञाततानिरासः ।

नापि ज्ञाततया संवित्सिद्धिः । स्वसत्तायां प्रकाशाव्यभिचारेण लैङ्गिकत्वायोगात् ।

ननु संविदुदये विषयमात्रमवभासते घटोऽयमिति । न हि कश्चिदपि तदैव तामविषयभूतामनिदम्भावामनुभवति घटो मयानुभूयत इति । न च यत् प्रकाशकं तज् ज्ञाततयैवेति नियमः, चक्षुरादौ व्यभिचारात् । तथाचालोकलिङ्गादेर्ज्ञाततया चक्षुरादेरज्ञाततया च प्रकाशकत्वेऽनुभवानुरोधादनुभवः सत्तया प्रकाशककोटिमनुप्रवेक्ष्यति । स त्वनन्तरमर्थगतकादाचित्कप्रकाशाति-

शयलिङ्गेनानुमीयते । कादाचित्कं हि कार्यं कारणमनुमापयति । तस्य च प्राकट्यस्यार्थगतस्यापि स्वव्यवहारोपपादिनः स्वसम्बन्धितया स्वसमवेतज्ञानानुमानोपपत्तेः । अनुमानप्राशुभावेन तु प्रत्यासत्त्यतिशयाद् घटोऽनुभूयत इति वर्तमानव्यवहारः । न चैवमनुभवस्य जडत्वापातः । ज्ञानविषयत्वमात्रस्येष्टत्वात् । अज्ञानत्वं तु नापाद्यम् । तन्मात्रव्यावृत्तिसौलभ्येनातिप्रसङ्गात् । ज्ञेयत्वे सुखमसुखं स्यादित्यापादनसम्भवात् । प्रकाशाव्यभिचारित्वं तु सुखादिसाधारणमनुभाव्यत्वेऽपि न विरुध्यते । उत्पत्त्यैव तदव्यभिचारित्वमसिद्धं ज्ञानस्येत्यावेदितमिति ।

तदिदं कर्मजडिमास्कन्दितचित्तसत्त्वस्यानुभवविभवविवेचनमश्रोत्रियदण्डग्रहणमनुसरति । न खल्वनुभवातिरेकी विषयधर्मः प्राकट्यमुपलब्धमुपपन्नं वा, येन ज्ञानमनुमीयेत । तथाहि — किं तज्जननेऽनुभवः कारक एव तद्व्यापारो वा स्यात् । आद्ये व्यापारो वाच्यः । क्रियानिविष्टस्यैव कारकत्वात् । 'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्' (जै० १. १. ४) इत्यत्र बुद्धिः प्रत्यक्षमिति वक्तव्ये जन्मग्रहणं कुर्वन् जैमिनिर्जनिमेव क्रियामभिप्रैतीति चेत् । न । जन्मना लब्धात्मकस्यैव चक्षुरादेः कारकतया दृष्टविपरीतकल्पनायोगात् । ननु संयोगादिकारिका क्रिया न क्रियान्तरनिवेशिनी । एवमनुभवोऽपि क्रियैवेति चेत् । सा किमात्मनोऽन्यस्य वा स्यात् । अन्यस्य चेद् आत्मनो न किञ्चित् प्रकाशेत । तदीयानुभवजन्यप्रकाशाश्रयस्तस्य भासत इति नियमोपगमात् । अन्यथा कस्यचिदनुभवे सति विषयप्रकाशसाधारण्यप्रसङ्गात् । मनःप्रभृतिषु तदीयतासम्बन्धस्य पुत्रादिव्यावृत्तस्य दुर्निरूपत्वात् । आत्मनश्चेदमूर्तस्य न परिस्पन्दः । परिणाम इति चेद्, एवं तर्हि मृत् परिणमते घटः फलमिति परिणामफलयोरेकार्थसमवायनियमादात्मन्येव प्रकाशफलमस्तु । अनुभवपरिणामोऽपि वा विषयेष्वस्तु । न तु तयोरदृष्टा भिन्नाश्रयता युक्ता कल्पयितुम् । ततो वेद्यात्मनोरात्मानात्मत्वविनिमयः । एतेन कारकव्यापारोऽनुभव इति निरस्तम् । अपिच विषयधर्मः प्राकट्यमतीतादौ न सम्भवति । उक्तं हि—

---

१. 'भ्येऽनति', २. 'वि', ३. 'देवानु', ४. 'नियमः । ए' ख. पाठः.

"अतीतेऽनागते चार्थे कथं प्राकट्यसम्भवः ।
न हि धर्मिण्यसत्येव धर्मः सम्भवमृच्छति ॥"

इति । द्वित्वादिवत् स्यादिति चेद्, न । अपेक्षाबुद्धिविषयतोपाधिना जननीयस्य द्वित्वादेस्तदुपाधिनैव सत्यतीतादावुपपत्तेः । ज्ञानविषयतोपाधिना च सत्त्वमतीतादेरविप्रतिपन्नम् । अन्यथा तस्यानवभासप्रसङ्गात् । न चैवं ज्ञानविषयतोपाधिना जननीयस्य प्राकट्यस्यापि तदुपाधिनैव धर्मिसत्त्वापेक्षा, न स्वरूपेण, तेन ज्ञानं प्राकट्यमुत्पादयत् स्वविषयत्वोपाधिना धर्मिसत्तामापादयदेवोत्पादयतीति वाच्यम् । प्राकट्यस्य विषयतानिर्वाहकत्वोपगमविरोधात् । विषयताप्राकट्ययौगपद्येऽपि विषयतोपाधिना सति प्राकट्यजन्मानिरूपणाच्च । गुणादेरपि ज्ञानजन्यधर्माश्रयत्वे द्रव्यत्वापत्तेश्च । अपिच एकत्ववद् द्वित्वादेरपि यावद्वस्तुभाविनः परत्वादिवदपेक्षाबुद्धिव्यङ्ग्यत्वमात्रमुपगम्यते । अतीतादावनुत्पत्तावपि तस्य बुद्ध्युपारूढतयातीतादिवदेव व्यवहारसम्भवात् । संयोगादिवदन्यतरविनाशेऽपि तन्निरूपितद्वित्वविनाशोपपत्तेश्च । अत एव अमी मम सुतास्त्रिचतुराः पुरासन् । एकद्वेषु नष्टेष्विदानीं द्वित्रा इत्यतीतादितुल्ययोगितया लोके संख्याव्यवहारः । न च प्राकट्यमपि यावद्विषयभाविज्ञानेनाभिव्यज्यत इति शक्यमुपगन्तुम् । ज्ञानसाधारण्ये तदभिव्यक्त्य नियमात् ।

अपिच न तदप्रकाशमानं विषयप्रकाशः, प्रकाशमानस्यैव सौरादिप्रकाशस्य विषयप्रकाशत्वात् । असंशयाय ज्ञानानुमितौ लिङ्गभानावश्यम्भावाच्च । प्रकाशमानं च न स्वगोचरधीजन्यप्रकाशान्तरेण, अनवस्थानात् । नापि स्वेन, अङ्गुल्यग्रस्येव स्ववृत्त्यसम्भवात् । प्रकाशतावन्मात्रस्य चान्यं प्रति भानाप्रयोजकत्वाद्, आत्मसम्बन्धाभावात् । अपिच विषयधर्मः सन् प्रकाशो योग्योऽन्यैरपि किं नोपलभ्येत रूपादिवत् । अपेक्षाधीजन्यद्वित्वादेरिव तदनुभवजन्यप्रकाशस्य तदेकवेद्यत्वनियम इति चेद्, युक्तं द्वित्वादेर्यावद्वस्तुभाविन एव व्यञ्जकापेक्षाबुद्धिनियमात् सिद्धाञ्जनव्यञ्जनीयनिधेरिव तं प्रत्येवाभिव्यक्तिनियमः । प्राकट्यस्य पुनः प्रकाशात्मनैवोदितस्य साधारण्यमनिवार्यम् । स्वहेतुज्ञानसमवायिन एव भासते नान्यस्येति प्रकृतैकविषयनियमकल्पनस्य प्रबलप्राकट्यसाधकाभावे निर्मूलत्वात् ।

अपिच विषयगतं प्राकट्यं किमर्थमुपेयते । विषयतानिर्वाहार्थमिति चेत् । को विषयताया निर्वाहः । न तावदुत्पत्तिः, तस्याः स्वहेतुसिद्धविषयस्वरूपानतिरेकात् । अतिरेके वा गुणादेरपि विषयतया जन्यधर्माश्रयत्वे द्रव्यत्वापत्तेः । अपिच अनुभवादेवाहत्य विषयतोत्पत्तिसम्भवे किमन्तर्गडुना प्रकाशेन । अथ ज्ञानसाधारण्ये सति नियमो विषयताया निर्वाह इत्युच्येत, स प्रकाश एवानियतः कथं विषयतां नियन्तुमीशीत । तन्नियमश्चानुभवसाधारण्ये दुर्घटः । अनुभवकारणव्यवस्थया प्रकाशाश्रयनियम इति चेद्, विषयतैव तया नियम्यतामावश्यकत्वात् । नापि विषयव्यवहारार्थम्, उभयसिद्धानुभवादेव तदुपपत्तेः । एवं तर्हि ज्ञानविषयसम्बन्धाभावाच्चेतनस्य विषयो न प्रकाशेत । असम्बद्धभाने चातिप्रसङ्ग इति चेत् । किमेवं प्रकाश एव सम्बन्ध इत्वभिप्रायः । तथा सति सम्बन्धस्य सम्बन्धिसभानतया ज्ञानस्य तदनुमेयत्वमेव हीयेत । न च तटस्थेन प्राकट्येन ज्ञानार्थसम्बन्धो जन्यते । सति सम्बन्धिद्वये संयोगातिरिक्तजन्यसम्बन्धाभावात् । धनेन स्वस्वामितेव प्राकट्येन विषयविषयितेति चेद्, न । विनापि तेन तदुपपत्तौ तत्कल्पनागौरवात् । परमते स्वभावादेव विषयविषयितोपगमात् । सिद्धान्ते चानुभवतादात्म्यादेव विषयोऽवभासत इति स्वावसरे वक्ष्यामः ।

अपिच प्रकाशकार्येण कारणमात्रमनुमीयेत । कथं तस्य ज्ञानत्वसिद्धिः । प्रकाश इत्येव ज्ञानानुमानमसम्भवि, व्याप्त्यसम्प्रतिपत्तेः । अनुभवप्रकाशसाहचर्यप्रत्यक्षासम्भवेन पूर्वपूर्वानुभवप्रकाशोदाहरणस्यान्धपरम्परामात्रत्वात् ॥

V. S. GOPALASWAMY SASTRY.
VIRAVANALLUR.

स्वप्रकाशत्वनिरुक्तिः ।

तत् सिद्धं संवित् स्वप्रकाशा संवित्त्वादिति । स्वप्रकाशत्वं च स्वसजातीयानधीनस्वकर्तव्यविषयाभिव्यक्तिजातीयाभिव्यक्तिनियतत्वमालोकानुभवसाधारणम् । अनुभवासाधारणं तु संविद्विषयतानधीनभाननियतत्वं, स्वसत्तासंशयादिविरोधिसत्ताकत्वम्, अनन्याधीनस्वसत्तासंशयादिशून्यत्वं वा । अवेद्यत्वे सत्यपरोक्षावभासित्वमित्यपरे । तत्राद्यं विषयाभिव्यङ्ग्यकत्वादालोकवदि-

त्यन्वयिनापि । इतरदुक्तव्यतिरेकिणा । विपक्षे च संविदसिद्ध्या विषयासिद्धौ सर्वशून्यत्वप्रसङ्गो बाधकस्तर्कः । यथाह परोऽपि —

"तदेवाप्यतां सर्वशून्यत्वाद् विभ्यतां सताम् ।
गतिः स्वयम्प्रकाशत्वादृते नान्योपलभ्यते ॥"

इति । यत्तु — प्रथमं विषय एवावभासते न संविदिति । तन्न । तस्या विषयप्रकाशानतिरेकात् । अप्रकाशे च प्रकाशस्योलूकादेरिव तदा विषयाप्रकाशो मा प्रसङ्क्षीति प्रकाशमानत्वावश्यम्भावात् । अक्ष्यादेरविषयप्रकाशत्वेन सत्तयैव प्रकाशप्रयोजकत्वोपपत्तेः । शब्दव्यवहारस्य विवक्षाधीनतया तदभावे घटोऽनुभूयत इत्याद्यव्यवहारोपपत्तेः ।

अपर आह — अनुभूतिः स्वजन्यपरगतधर्मात्यन्तसजातीयधर्मभाक्त्वे स्वात्यन्तसजातीयापेक्षानियमरहिता, स्वविजातीये स्वावश्यम्भाविधर्मात्यन्तसजातीयस्वसम्बन्धतुल्यकालधर्महेतुत्वात् । घटादौ चाक्षुषत्वधर्महेतुशुक्लादिवत् । ज्ञानान्तरेण घटादिवदेव प्रकाशधर्मभाक्त्वोपपत्तेरर्थान्तरं मा भूदिति स्वात्यन्तसजातीयेत्यादि । अनुभूतित्वसत्तादेः स्वाभाविकतया धर्मभाक्त्वे परगतधर्मात्यन्तसजातीयधर्मभाक्त्वे वा स्वात्यन्तसजातीयानपेक्षतया सिद्धसाधनं मा भूदिति स्वजन्येत्यादि । अन्यापेक्षानियमराहित्योक्तौ दृष्टान्ते रूपे चक्षुरपेक्षया चाक्षुषत्वभाजि साध्यवैकल्यम् । अतः स्वात्यन्तसजातीयेति । तदनपेक्षत्वमात्रोक्तौ परकीयेऽतीतादौ च ज्ञाने बाधः । तस्य प्रकाशनधर्मभाक्त्वे स्वात्यन्तसजातीयानुमित्यादिसंविदन्तरसापेक्षत्वात् । अतस्तदपेक्षानियमरहितेति । तेन वेद्यत्वाविरोधिसंविदन्तरानपेक्षप्रकाशार्हत्वमात्रं स्वप्रकाशत्वं सिध्यति । द्रव्यस्य द्रव्यान्तरे स्वजन्यसंयोगात्यन्तसजातीयसंयोगभाक्त्वे स्वात्यन्तसजातीयद्रव्यापेक्षानियम इत्यव्यभिचाराय स्वविजातीय इति । पुरुषे दण्डित्वहेतोर्दण्डस्य दण्डित्वभाक्त्वे स्वात्यन्तसजातीयदण्डापेक्षानियमादनतिचाराय स्वावश्यम्भावीति । न च दण्डित्वमापादयतो दण्डस्य तदवश्यम्भावीति । पितृविजातीये पुत्रे पुत्रत्वहेतौ पितरि पुत्रत्वभाक्त्वे स्वात्यन्तसजातीये पित्रन्तरापेक्षानियम इति तदव्यभिचाराय स्वसम्बन्धतुल्यकालेति । न पितृसम्बन्धतुल्यकालं पुत्रत्वं, प्रमीते च प्रोषिते च पितरि तद्भावादिति ।

अत्रेदं चिन्त्यम् । अनुभूतेरेव प्रकाशतावन्मात्रतया तद्धर्मकत्वबाधात् तत एव व्यवहारादिसिद्धौ विषये तज्जन्यप्रकाशातिशयस्यानुपगम्यत्वात् । हेत्वभावनिबन्धनसंशयाद्यभावस्य विषयेऽनुभवाजन्यत्वाद्, अनुत्पन्नसंशयादौ तन्निवृत्तेरजननीयत्वाच्च । अपिच स्वात्यन्तसजातीयानपेक्षत्वमेव साध्यताम् । न चांशतो बाधः, एकतया नित्यतया च संविदोऽनुमानाद्यगम्यत्वस्य वक्ष्यमाणत्वात् । एतेन धर्मपदस्थाने सर्वत्र व्यवहारपदावापेन प्रयोगो व्याख्यातः । अपिच नेदानीमनुभवस्य विषयप्रकाशनदशायां प्रकाशधर्मोऽवश्यम्भावीति सिद्धमस्ति, ज्ञानजाड्यविप्रतिपत्तेः । अत एव न स्वावश्यम्भाविधर्मनिबन्धनत्वं व्यवहारस्य स्वावश्यम्भावित्वं सम्भवतीति दिक् ।

यत्तु स्वसत्तायां प्रकाशाव्यभिचारित्वात् संवित् स्वप्रकाशा । व्यतिरेके हि घटादिवदन्याधीनप्रकाशा स्यात् । यथा संवित्सिद्धौ

"यद्यप्रकाशमाना धीः कदाचिदवतिष्ठते"

इत्यारभ्य

"घटादाविव तत्रापि कल्पनीयं प्रकाशकम्"

इति । न च सुखादावनैकान्त्यं, संवित्त्वात् । यथाह लक्ष्मणः — 'ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यत' इति । श्रुतप्रकाशिकाकारश्च 'सुखादेर्ज्ञानविशेषत्वेने'ति । तदतिरेकेण हेतुविशेषणाद् वेति । तदेतद् रज्जुसर्पाज्ञानादिभिरनैकान्त्यादयुक्तम् । परस्योत्पत्त्यैव प्रकाशाव्यभिचारित्वासिद्धेः, सुखादावनैकान्त्याच्च । न च सुखादिरपि संविदेव, विषयप्रकाशत्वतदप्रकाशत्वरूपभेदात् । अन्यथा स्वसम्बन्धिभविष्यद्वानादिज्ञानमिदानीं सुखमिति तदुत्कण्ठानुपपत्तेः । विषयापरोक्षमनुकूलं सुखमिति चेद्, दयिताहितलाभादिश्रवणे सुखानुभवो न स्यात् । अथ सुखजनने या ज्ञानभेदव्यवस्था सा सुखात्मत्व एव स्यात् । न स्यात् । तत्र परोक्षापरोक्षत्वादिजातिभेदाननुभवात् । इष्टविषयज्ञानजातिभेदानुभवः सुखस्यैवेति शक्यं शाक्यविनेयेनोपगन्तुं, नान्येन । अनुकूलात्ममात्रेण तस्य सर्वजनीनानुभवविरोधात् । न च सुखादिव्यतिरेकविशेषणं, दुःखरज्जुसर्पादिसाधारणावच्छेदकदुर्वचतया व्यक्तिभेदव्यतिरेकस्य दुर्ज्ञानत्वात् । शङ्कितव्यभिचारगोचर इत्युक्त्वा तदतिरेकविशेषणे च साधुन्यायकौशलं तान्त्रिकस्येति ।

---

१. 'त्वा', २. 'दा', ३. 'ति तु श' ख. पाठः.

अन्ये तु संविदनन्याधीनासत्त्वादिव्यवहारहेतुविरहनियता, स्वसम्बन्धादन्यत्र तद्विरहप्रयोजकत्वात् । यत् स्वसम्बन्धादन्यत्र यद्विरहप्रयोजकं तत् स्वत एव तद्विरहनियतम् । यथालोकस्तमोविरहनियतः, वह्निर्वा हिमविरहनियतः, हिमं वोष्मविरहनियतमिति । अत्र स्वसत्तानिश्चयः स्वयमेवेति पर्यवसानान्नियतग्रहणेनान्याधीनतद्विरहनिषेधान्नार्थान्तरता । न च संविदस्वप्रकाशा, वस्तुत्वाद् घटादिवत् । संविदसिद्ध्यादिप्रसङ्गेन वेद्यत्वबाधोन्नीतस्य पक्षेतरस्याप्यसंवित्त्वस्यैवोपाधित्वात् । न चैवं संवित् सत्यसती वा स्वाभावं ग्राहयति, विरोधात् । नाप्यन्या, तद्भेदासिद्धेः । संविदोऽपि वेद्यत्वे घटादिवदसंवित्त्वादिप्रसङ्गाच्च । तस्मादभिन्नस्वप्रकाशसंविदेकरससत्तामात्रात्मनि दृश्यत्वाभावान्नानैकान्त्यमिति ॥

संविदोऽवेद्यत्वे शङ्का ।

अत्राह — सत्यं ज्ञातुरात्मनो विषयप्रकाशदशापन्ना संवित् स्वयम्प्रकाशेति । न च तावता सर्वदा सर्वेषामेवैषैव । अतीतादिसंविदोऽनुमेयत्वात् । परसंविदोऽपि हानादिलिङ्गगम्यत्वेन व्युत्पत्त्याद्युपपत्तेः । आचार्यादेर्ज्ञानवत्त्वानुमानेन तदुपगमादिव्यवहाराच्च । इयदेव हि संविदः संवित्त्वं स्वप्रकाशत्वं च यदुत विषयसम्बन्धदशायां सत्त्वमेव स्वाश्रयं प्रति प्रकाशमानत्वम् । तथैव स्वाश्रयं प्रति विषयप्रकाशत्वं वा संवित्त्वम् । स्वसत्तायामनन्याधीनप्रकाशत्वं च स्वप्रकाशत्वम् । तच्च वेद्यत्वेऽपि न विरुध्यते । तद्रूपविरहाच्च घटादेरसंवित्त्वाद्युपपत्तेः । अन्यथा वेद्यत्वेनैव घटादिवदसंवित्त्वादिप्रसङ्गे संविदोऽवेद्यत्वेन खपुष्पादिवदसत्त्वमसंवित्त्वमज्ञानाविरोधित्वमस्वप्रकाशत्वं च किमिति न प्रसज्येत । न चैको नित्यश्चानुभवः, विषयप्रकाशात्मनः करणव्यापारानुविधायित्वात् । अथ ज्ञानपदाभिधेया बुद्धिवृत्तिभेदा एव तथेति तदुपधेयानुभवस्यापि तथात्वविभ्रम इति चेत् । न । तेषामेव विषयप्रकाशत्वोपपत्तौ विषयप्रकाशानुभवस्य नित्यस्यान्यस्याकल्पनीयत्वात् । ननु नित्यं ज्ञानमनित्यं च तवापि सम्प्रतिपन्नम् । सत्यं सम्पतिपन्नम् । किन्तु आत्मरूपमाश्रयभूतं नित्यं ज्ञानं स्वात्ममात्रावसितावभासम् । आश्रितं च नित्यं ज्ञानं न स्वरूपेणैव स्वयमप्यवभासते,

---

१. 'म' ख. पाठः.

विषयविकासपरिणामेन स्वस्वविषयप्रकाशत्वोपगमात् । अथैवमुभयसम्प्रतिपन्नानित्यज्ञानस्यैव स्वतः स्वात्मपरिसमाप्तस्वभावस्यापि व्यञ्जनीयविषयाञ्जनबुद्धिवृत्त्यविभागवृत्तितया व्यवस्थितविषयप्रकाशत्वसम्भवे सत्युपजनापायधर्मकानेकवृत्तिभेदानामर्थप्रकाशत्वकल्पना न युक्तिमतीति चेद्, न । विषयप्रकाशपूर्वापरावध्यनुभवस्यौपाधिकत्वकल्पनागौरवेणानन्यथासिद्धत्वात् ॥

पररीत्या विषयसंविदः स्वरूपस्वभावादिविचारः ।

यत्तु सत्यसती वा संविद् न स्वाभावमवभासयतीति । तन्न । नहि संविदेव वा प्रमाणसंविद् वा प्रत्यक्षसंविद् वा स्वसमसमयवर्तिनमेव विषयीकरोतीति नियमः, स्मृत्यनुमानागमयोगिप्रत्यक्षादेरतीतादिविषयत्वात् । न च संवित् स्वाभावमेव तथाभूतं विषयीकरोतीति नियमग्रहः सम्भवति । अन्यथा तत एव तदभावसिद्धेः । न चैं तत्प्रागभावादिस्तत्समसमयस्तया गृह्यत इति केनचिदुपगम्यते । किन्तु भिन्नकालो योग्यानुपलब्ध्या संविदन्तरेण, स्वयम्प्रकाशत्वेऽपि संविदोऽभावनिरूपकतयानुभाव्यत्वाविरोधात् । अन्यथा संविदमविषयीकृत्य प्रागभावनिरासस्याप्यसिद्धेः । यद्यपि विषयसंविदः सत्त्वे स्वप्रकाशतया स्वयमेवोपलब्धिः प्रसज्यत इति योग्यानुपलब्धिस्तदभाव एवापद्यते, तथापि पिण्डाद्युपलब्धिरिव घटस्य संविदोऽवस्थान्तरोपलब्धिरेव योग्यानुपलब्धिरुपगम्यते । अभावश्चावस्थान्तरमेव, सङ्कोचोऽर्थान्तरज्ञानं वा । अतस्तत्कालस्य स्वापादेर्घटादिज्ञानस्य वा प्रतिसन्धानं गजादिज्ञानस्य योग्यानुपलब्धिः । सा च लिङ्गतया तदभावनिश्चायिकेति । अथवा सैव संवित् तैंत्कालपरिच्छिन्नस्वविषयसत्त्वावभासा पूर्वापरकालासत्त्वमात्मनो गमयति, इदानीमेवेदमहं वेदेति तयैव व्यवहारात् । विषयसंविदो घटादिवदज्ञातसत्त्वानुपपत्तेः । यदि च कालानवच्छिन्नावभासा घटादिसंवित्तित्या स्याद्, घटाद्यवभासकादाचित्कत्वानुपपत्तिः । अपिच प्रत्यक्षसंविदः सद्विषयत्वनियमेन तन्नित्यत्वे घटाद्यनित्यत्वानुपपत्तिः । अपिचैवं सर्वसंविद्विषयनित्यत्वप्रसङ्गः । अनुमानादिसंविदामतीतादिविषयत्वसम्भवेऽपि विषयाणामेव निरवधिकातीतत्वाद्यसिद्धेः । न च संविदवधिः, तव नित्यत्वात् । न च निमेषादिः, तस्यापि प्रत्यक्षस्य नित्यत्वसिद्धेः ।

---

१. 'र', २. 'मतानां', ३. 'च प्रा', ४. 'तै का' ख. पाठः.

ननु निर्विषयाञ्जना संवित् स्वतो निर्विकल्पावभासा नित्यैव । तस्यास्तु विषयाञ्जनोपाधिना कालपरिच्छेदावभासेऽपि न स्वतः पूर्वपरावधिसिद्धिरिति चेत् । न । स्वप्रकाशत्वाभिमताया विषयप्रकाशसंविदो निर्विषयसत्त्वप्रकाशायोगात् । ननु संवित्त्वादेव संवित् स्वप्रकाशा, न विषयप्रकाशत्वात् । न । संवित्त्वं हि न स्वसिद्धत्वं, साध्याविशेषात् । नापि स्वसत्तानियतप्रकाशत्वम् । सुखादावस्वयम्प्रकाशे तवानैकान्त्यात् । मम निर्विषयसंविदः स्वापादावस्वप्रकाशत्वाच्च । विषयप्रकाशत्वं चेत्, तथैव स्वप्रकाशत्वापत्तावुक्तदोषानुषङ्गात् । न चान्तरिक्षालोकस्येव निर्विषयसंविदः सत्त्वप्रकाशसिद्धिः । युक्तं तत्रात्रत्यविषयाभिव्यक्त्या गगनसत्त्वमालोकस्यानुमीयते । नेह, तदैवोत्पत्त्यापि विषयप्रकाशनिर्वाहात् । न च स्वापादिदशासु निर्विषया केवलैव संविदवभासते । आश्रयविषयशून्यसंविदोऽनुपलब्धिहतत्वात् । तास्वपि दशास्वनुभूता चेत्, प्रतिबुद्धेनानुसन्धीयेत । यद्यपि नायं नियमोऽनुभूतमवश्यमनुसन्धेयमिति । विषयान्तरव्यासङ्गाद्, ग्राह्यविषयावैचित्र्याद्, अफलत्वेन तदनादरात्, तादात्विकतीव्रसंवेदनान्तराद् अनुभवानभ्यासाद् वा,

"प्रायणान्नारकक्लेशात् प्रसूतिव्यसनादपि ।
चिरातिवृत्ताः प्राग्जन्मभेदा न स्मृतिगोचराः ॥"

इत्युक्तहेतोर्वानुभूतास्मरणस्य सर्वसम्प्रतिपत्तेः । तथाप्युक्तसंस्कारतिरस्कारकाभावे कदाचिदपि स्मरणावश्यम्भावेन तदभावे व्यापकविरुद्धोपलब्ध्या प्रागननुभवं मन्यामहे । अपिच प्रतिबुद्धस्य न किञ्चिदवेदिषमिति प्रत्यवमर्शः संविदोऽप्यनुभवाभावं दर्शयति । न चास्मरणमभावावमर्शश्च संविदोऽहङ्कारविषयासंश्लेषेण निर्विकल्पावभासत्वाद्, न स्वनवभासादभावाद् वेति वाच्यम् । अहङ्कारादिसंश्लेषस्यानुभव इव स्मरणेऽप्यहेतुतया अनुभूतस्मरणस्यानिरोधनीयत्वात् । इदानीमहमर्थविषयानालिङ्गितसंविदनवभासेन स्वापादावपि तदसम्भवाच्च । तत्राप्यहङ्कारानुवृत्तेश्च । स चात्मा प्रत्यक्त्वानुकूलत्वादिविशेषेणैव स्वयमवभासते । तस्य चावभासः स्फुरणं व्यवहारानुगुण्यं व्यवहारप्रतिसम्बन्धितादिहेतुत्वं स्वाभाविको धर्मो दीपस्येवौज्ज्वल्यम् । तस्यैव धर्मभूतापरा संवित् प्रभेव दीपस्य । तत्स्फुरणं तु विषयसम्बन्धनिबन्धनं तदानी-

---

१. 'त्वाविषयप्र', २. 'पाव', ३. 'द्धेन ना' ख. पाठः.

मेवेति तदवस्था सा विषयप्रकाशरूपा पूर्वोत्तरावधिमती भवति । अत एव सुतौ सत्या एव केवलं संविदोऽभिव्यक्तिं जागरादावसूत्रयत् 'पुंस्त्वादिवत् त्वस्य सतोऽभिव्यक्तियोगात्' (ब्र० २. ३. ३१) इति स्वापादौ कर्माविद्यासंकुचितवृत्तितया संविदो यावद्विषयसम्बन्धप्रतिबन्धादस्फुरणमेव । न त्वसत्त्वमात्मनो ज्ञातृत्वस्वभावत्वोपगमात् । तदेवं निराश्रयविषयसंविदोऽप्रामाणिकत्वाद् विषयप्रकाशसंविदश्चानित्यत्वादनुपलब्ध्या स्वतः परतो वावधिग्रहणसम्भवादुत्पादविनाशवती संविद् नानैव । तथाच संवित्तिसिद्धौ

"प्रतिप्रमातृविषयं परस्परविलक्षणाः ।
अपरोक्षं प्रकाशन्ते सुखदुःखादिवद् धियः ॥"

न च ज्ञातृज्ञेयभेदोपाधिको भेदः, स्वतस्तु संविदभिन्नैव व्योमवदिति वाच्यम् । यतः

"सम्बन्धिव्यङ्ग्यभेदस्य संयोगेच्छादिकस्य तु ।
नहि भेदः स्वतो नास्ति नाप्रत्यक्षश्च सम्मतः ॥"

इति । तथाच

भिन्नस्वरूपसत्तैव यस्य नान्यानपेक्षया ।
भिद्यते तत् स्वभावेन संयोगेच्छादिकं यथा ॥
अनन्याधीनसत्ताकं यदन्याधीनभेदवत् ।
तत् तु स्वतो न भिद्येत घटाकाशादिकं यथा ॥
न संविद्रूपसत्ता च वेद्यवेदित्रनाश्रया ।
संयोगादिवदेवातः सा स्वभावेन भिद्यते ॥

स्वगताश्चास्याः संवित्त्वस्वप्रकाशत्वादयो भेदा न निवार्याः । न चेदृशी संविदात्मा, कादाचित्कत्वादनेकत्वाच्च घटादिवत् । यदि हि वेद्यमहमवेदिषमिति प्रतीतकालपरिच्छेदा प्रतिविषयोदयभङ्गा प्रकाशमात्रसंविदात्मा स्याद्, आत्मनोऽन्यस्य वा प्रत्यभिज्ञा भज्येत । अन्यान्यस्यातद्विषयत्वाद्, अन्यानुभूतेऽन्यस्य तदसम्भवात् । संविन्मात्रस्याप्रतिसन्धातृत्वाच्च । अपिच ज्ञानावगत्याविपर्याया संवित् सकर्मिका संवेदितुरात्मनो धर्मः, न त्वात्मैव । घटमहं जानामि इममवगच्छाम्यमुं संवेद्मीति सर्वसाक्षिकानुभवात् । न च चैतन्य-

1. 'तृत्व' क. पाठः.

प्रकाशादन्यदेव वृत्तिज्ञानं तथानुभूयत इति शङ्क्यम् । आत्मनः स्वयम्प्रकाशत्वं साधयता ज्ञातृज्ञेयसम्बन्धिप्रकाशस्यैव तत्साधनात् । न च संविदेव संविदाश्रयः, स्ववृत्तिविरोधात् । तथाच यदि संविदात्मा स्याद्, आत्मधर्मो न स्यात् । अवेदिता चात्मा प्रसज्येत । न च संवित् प्रतीची, येन सैवात्मा स्यात् । प्रत्यक्त्वं हि स्वस्मै प्रकाशमानत्वम् अहमिति । संविच्च सुखादिवदन्यस्मै भासते संवेद्यीति ॥

संविद्रूपज्ञातुरात्मनोऽहमर्थत्वम् ।

ननु 'विज्ञानात्मा पुरुषः', 'हृद्यन्तर्ज्योतिः पुरुषः', 'अत्रायं पुरुषः स्वयं ज्योतिः', 'कृत्स्नः प्रज्ञानघन एव' ज्ञाता स्वधर्मभूतप्रकाशनिरपेक्षसिद्धिः, भासमानतयैव साक्षात् परम्परया वा धर्म्यन्तरापरोक्षावभासहेतुधर्मकत्वात् । तथाभूतप्रभाधर्मकदीपस्य स्वधर्मभूतप्रभानपेक्षप्रकाशत्वदर्शनादिति । श्रुत्यादिकमनुरुन्धानस्य तवापि निर्विषयाश्रयस्वयम्प्रकाशचिद्रूप आत्मा सम्प्रतिपन्न इति चेत् । सत्यम् । स एवाहमर्थो ज्ञातोपेयते मया । ज्ञात्रतिरिक्तसंविदश्च निराश्रयविषयाया असत्त्वमनात्मत्वं च । त्वया तु विपरीतमिति वैषम्यम् । तत्राहमुपलभे जानामीति प्रत्यक्षाद्, 'एष हि द्रष्टा श्रोता', 'यो वेदेदं जिघ्राणीति स आत्मा', 'विज्ञातारमरे केन विजानीयात्', 'न पश्यो मृत्युं पश्यती'त्यादिश्रुतेः,

"एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः"

इति स्मृतेः, 'ज्ञोऽत एव' (ब्र० २. ३. १८) इति सूत्राच्च ज्ञाताहमर्थ एवात्मेति युक्तम् । ज्ञातृत्वं च ज्ञानगुणाश्रयत्वमात्मनः स्वाभाविको धर्मः । न विक्रिया । नित्यं हि ज्ञानं नित्यस्यात्मनो धर्मः । 'अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा', 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इत्यादिश्रुतेः । ज्ञानं हि स्वतोऽपरिच्छिन्नं नित्यमेव कर्माविद्यावरणापावरणाभ्यां हैतुकसङ्कोचविकासशीलम् अत एवोदितास्तमितव्यपदेश्यं ब्रह्मतत्त्वदर्शनविधूते सर्वाविद्यावरणे सर्वविषयं स्वरूपेण विशदीभवति । यावदात्मभाविनो ज्ञानस्य पर ज्योतिरुपसम्पद्य स्वेन रूपेणाविर्भावोपगमात् । यथाह शौनकः—

---

१. 'प' क. पाठः.

"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतः सम्भवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥"

इति । अक्षादिहेतुकज्ञानप्रसरे तु कर्तृत्वेऽपि नात्मनो विक्रिया । अचेतनवद-परिणामित्वात् । नापि तत् स्वाभाविकं, कर्माविद्यानिमित्तत्वात् । विकारनिषेधस्य चात्मनि स्वाभाविकविकारविषयत्वात् । न च कर्तृत्वेऽप्यनात्मत्वं, यत्ताधारत्वस्य घटादावप्राप्तेः । परिस्पन्दाश्रयत्वं तु परमात्मन्यसिद्धम् । जीवस्योत्क्रान्त्यादिश्रवणेन तदनात्मत्वसाधने बाधः । धात्वर्थमात्राश्रयत्वं च नानात्मत्वहेतुः । आत्मन एव तव भ्रमाश्रयत्वात् । भ्रमाश्रयत्वमात्मनोऽन्यद्वा मिथ्येति चेद्, न । ब्रह्मातिरिक्तसर्वमिथ्यात्वमते तात्त्विकधात्वर्थाश्र(या?यत्वा)-भावादव्यावर्तकत्वात् । 'अन्तः प्रविष्टः कर्तारमेतं', 'कर्तारमीशं पुरुषं ब्रह्मयोनिं', 'कर्ता विज्ञानात्मा पुरुषः', 'साधुकारी साधुर्भवति', 'स हि कर्ता', 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र० २. ३. ३३) इत्यादिश्रुत्यादिविरोधाच्च । तथापि ज्ञानप्रसरे कीदृशं कर्तृत्वमात्मनः, तदवस्थज्ञानाश्रयत्वमेवेति गृहाण ॥

पररीत्या ज्ञातुरात्मनो ज्ञानसम्बन्धभानोपपादनम् ।

अथ ज्ञातृज्ञानसम्बन्धः कथमवभासताम् । तदभाने चात्मनो ज्ञातृत्वासिद्धेः, स्वपरज्ञानविभागासिद्धिप्रसङ्गाच्च । तत्र ज्ञाता ज्ञानमपि प्रत्यक्त्वेनानुकूलत्वेनैकत्वेन च स्वतो भाति नार्थान्तरं विषयीकर्तुमलमिति भवतोपगम्यते । विषयज्ञान पुनरात्मानमविषयीकृत्य न तत्सम्बन्धमवभासयितुं शक्नोति, सम्बन्धस्य सम्बन्धिनिरूप्यत्वात् । सम्बन्धिनः सम्बन्धवित्तिवेद्यत्वाच्च । तदवभास्यत्वे चात्मनः स्वयम्प्रकाशत्वमनपेक्ष्यं स्यात् स्वापादावात्मा मावभासिष्टेति, प्रतिबुद्धप्रत्यवमर्शान्यथासिद्धेः । ज्ञानान्तरेण तदुभयसम्बन्धग्रहे च तस्य तस्य ज्ञातुश्च सम्बन्धग्रहानवस्थानात् सर्वस्यैव ज्ञानस्याहं जानामीति ज्ञातृसम्बन्धभानस्य सर्वजनीनत्वादिति ।

नैवम् । सम्बन्धमानं हि सम्बन्धिभाननियतं न तद्विषयत्वमपेक्षते, गौरवात् । सम्बन्धिजाड्यात् तु सुरभि पुष्पमित्यादौ तदपेक्षते । तथाच विशेष्यतैकस्वभाव आत्मा विशेषणतैकस्वभावं ज्ञानं च स्वयमेव सह भासमाने परस्परप्रतियोगितयैव भासेते अपेक्षणीयान्तराभावादित्युपपन्नम् ॥

ज्ञानस्य ज्ञानाश्रयत्वम् ।

ननु न ज्ञानं ज्ञानाश्रयम् । कोऽभिप्रायः । आत्मा न ज्ञानमिति, आगमादिविरोधः । अथ ज्ञानमनाश्रयमनात्माश्रयं वेति, जानामीत्यनुभवादिविरोधः । अपिचैवं यदि व्याप्तिमात्रमुपजीव्येत, ज्ञानं साश्रयमेव स्याद्, न स्वतन्त्रमात्मा । श्रुत्या तु ज्ञानाश्रयतापि स्यात् । न च ज्ञानं गुणः, येन गुणे गुणो न स्यात् । द्रव्यं तु, प्रकाशगुणत्वात् । एकजातीयद्रव्ययोरनुपादानोपादेयत्वेऽपि धर्मधर्मिता न नोपपद्यते दीपप्रभयोरिव । न च प्रभा दीपस्यैव रूपगुणः, अतिरिक्तदेशव्यापित्वात् । गन्धस्य च विशरारुपुष्पाद्यवयवाश्रयस्यैवान्यत्रोपलम्भसम्भवात् । 'यथा वृक्षस्य सम्पुष्पितस्य दूराद् गन्धो वाति'

"गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्"

इति चोपलब्धौ तत्प्राधान्याद् व्यपदेशः । गन्धवन्तो वा गन्धा उच्यन्ते, अजन्तत्वोपपत्तेः । अत एव गन्धस्याश्रयानतिक्रमाद्

"उपलभ्याप्सु चेद् गन्धं केचिद् ब्रूयुरनैपुणाः ।
पृथिव्यामेव तं विद्यादपो वायुं च संश्रितम् ॥"

इति स्मर्यते ।

अपर आह — चक्षुरिव घ्राणमपि दूरप्रसृतस्वरश्मिसम्बद्धगन्धग्राहि[1] कल्प्यं,

"नह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः ।
प्रवर्तमानैरनयैर्दुर्धर्षैरकृतात्मभिः ॥
तेषां तु मनसा रश्मीन् यदा सम्यङ् नियच्छति ।
तदा प्रकाशते ह्यात्मा दीपो दीप्यन्निवाकृतिः ॥"

---

१. 'न्ध' ख. पाठः.

इतीन्द्रियाणामविशेषेण भारते रश्मिमत्त्वस्मरणादिति । अथ ज्ञानमालोको वा परायत्तस्थित्यादितया गुण उच्येत । 'गुणाद् वालोकवत्' (ब्र० २. ३. २९) इत्यादौ न काचिन्नः क्षतिः, द्रव्यत्वाविघातात् ॥

दीपप्रभास्वरूपविवेकः ।

अथ सततोदयव्ययशीलस्य दीपस्य विशीर्यन्तोऽवयवा एव प्रभा । न धर्मः । सन्ति हि विशीर्यन्तोऽवयवा दहनस्य जलादावनुप्रविशन्तः । अन्यथा तत्रौष्ण्योपलम्भासम्भवात् । तत्र विजातीयदहनोत्पत्तिकल्पनाया निर्मूलत्वात् सौरातपतातपितशिलादौ च सूरकिरणभुक्ताग्न्यवयवानुप्रवेशेनैवौष्ण्योपलम्भात्।

"वसन्ते ग्रीष्मके रश्मिशतैः सन्तपति त्रिभिः ।
शरद्यपि च वर्षासु चतुर्भिः सम्प्रवर्षति ॥
हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः ।"

इति मात्स्ये रविः स्वकिरणापीतमुक्ताभ्यावयवैर्जगतः सौहित्यमिवाग्नेयावयवैः सन्तापमपि करोतीत्यवगमात् । अत्र च रश्मिशतैः सन्तपति त्रिभिरिति प्रागुपात्ताग्न्यवयववर्षेणेति पूरणीयम् । उत्सर्गप्रकरणस्वारस्यात् । 'उद्यन्तं वा वादित्यमग्निरनुसमारोहती'त्यग्न्यवयवानामंशुभिरादित्येनोपादीयमानत्वश्रवणाच्चेति । अत्र यद्यपि वर्षजलानि हिमकणा वा नैं विशीर्यन्तो रविकिरणा एव, वैजात्यात् । सन्तापनं तु किरणैरेव सम्भवति । तेषामेवोपचयापचययोगितया विशरणसम्भवेन शिलादौ तदवयवानुप्रवेशोपपत्तेरिति वयं पश्यामः । नैवम् । मणिद्युमणिप्रभादावुक्तगत्यसम्भवात् । न च मण्यादिरपि विशीर्यते, अनन्तरानुपलम्भप्रसङ्गात् । दीपस्य स्नेहदशावयवभेदवदन्यस्य प्रतिकलोदयसामग्र्यस्याभावेन प्रत्यभिज्ञाबाधायोगात् ।

"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्"

'नाग्नीषोमौ न सूर्यः' इत्यादिनियतकालोत्पत्त्यप्ययाम्नायाच्च । अथ तेजस्त्वादिना सूर्यादि क्षणिकमनुमीयेत, जगदेव सत्त्वादिना । व्यतिरेके शून्योदाहरणसम्भवात् । प्रत्यभिज्ञा तु बाधिका परत्रापि । अपिच चरमदशादिविनाशेऽपि दीपस्य विशीर्यदवयवानपायेन प्रभोपलम्भप्रसङ्गः । अथ स्नेहदशाव-

---

१. 'वात् । वसन्ते', २. 'त्र र', ३. 'न ही' ख. पाठः.

ष्टम्भविनाशे दीपस्यैव विनाशेन सावष्टम्भस्यैव तस्य सा विशीर्यन्तोऽवयवा इत्युच्येत, नियतारोहपरिणाहस्य दीपावयविनोऽनुपलम्भप्रसङ्गः । सक्तूनामाप्यावयवावष्टम्भादिव विशरणस्वभावस्यैव तस्य पार्थिवावयवावष्टम्भात् पिण्डीभूतावयविनो नोपलम्भानुपपत्तिरिति चेत्, तर्हि यावदवष्टम्भमवयवविशरणानुपपत्तिः । अत एव न निमित्ताभिघाते कतिपयावयवाविशरणमुपपद्यते । नियतोत्सेधाद्यनुपलम्भप्रसङ्गादेव । अपिच निवातस्तिमितदीपस्य वातानभिघातेऽवयवाविशरणे प्रभा न स्यात् । अपिच पांसव इव वायुना दीपस्य विशीर्णावयवा विक्षिप्य विकीर्येरन्निति नियतदेशा प्रभा नोपलभ्येतेत्यादि बहुदोषदूषणाद् न विशीर्यन्तोऽवयवा दीपस्य प्रभेति युक्तम् । तदेवं दीपस्य प्रभेव चिद्रूपस्यैवात्मनो ज्ञानं सजातीयद्रव्यमेव धर्मो गुण इत्युपगम्यते । अन्यथा अहं जानामीति ज्ञातृत्वानुभवनिर्विषयत्वप्रसङ्गात् ॥

अहङ्कारस्याहमर्थत्वे शङ्का ।

ननु न वयमहमर्थस्य ज्ञातृत्वमपह्नुमहे । न चाहङ्कार आत्मा, संविदतिरेकिणस्तदधीनप्रकाशस्य पराक्त्वाद् घटादिवद्, अहम्प्रत्ययविषयत्वादेव वा, देहादिवत् । न चैवं पराचोऽचेतनस्य प्राकृतस्य परार्थस्याहमर्थस्य घटादिवद् न ज्ञातृत्वमनुभूयेत, कल्पनामात्रत्वात् । अथापि निर्विषया न कल्पनेति वक्तव्या विषयोपपत्तिः । उच्यते—बुद्धिसत्त्वस्य चित्प्रतिबिम्बग्राहितयाहङ्कर्तुर्ज्ञातृत्वाभिमानः यावकप्रतिबिम्बग्राहिस्फटिकादेरिव रक्तत्वाभिमान इत्येके । अग्निसम्पर्कादयसो दग्धृत्वाभिमान इव चित्सम्पर्कादहङ्कर्तुर्ज्ञातृत्वाभिमान इत्यपरे । स्वास्मस्थतया चिदभिव्यञ्जकत्वाद् जालकालोकाभिव्यञ्जककरतलादिवत् तस्य तदाश्रयत्वाभिमान इत्यन्ये । कथञ्च स्वापादाविननुगच्छन्नहमात्मा येन ज्ञातैवात्मा स्यात् । अन्यथा जागरवदवभासेत अहमिति, स्वस्मै स्वयम्प्रकाशत्वोपगमेनापेक्षणीयाभावात् । अथावभासेत, 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मी'ति श्रुतिर्विरुध्येत । मामहं नावेदिषमिति प्रतिबुद्धप्रत्यवमर्शश्च । स्मृतिश्च —

---

१. 'षाद् न', २, ३. 'र्ज्ञातृ' ख. पाठः.

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च"
"एतत् क्षेत्रं समासेन सविकारमुदाहृतम्"

इत्यहङ्कारं क्षेत्रेऽन्तर्भावयति । तस्मादहम्प्रत्ययगोचरादेव देहादेरतिरिक्तः पारलौकिक इवाहङ्कारादपि तदवभासात्मा दृशिमात्रः प्रामाणिकैरात्मैषितव्य इति ॥

पररीत्याहमर्थस्य ज्ञातुरात्मत्वनिरूपणम् ।

नैवम् । प्रत्यगर्थ एवात्मा न परागर्थ इति तावत् सर्वसम्प्रतिपन्नम् । तत्र यद्यपि विषयप्रकाशा संवित् स्वसत्तायामिथमिति नावभासते, तथापि न प्रतीची, परस्मै भासमानत्वात् । तद्धि परात्वं घटादावपि । अन्यथा तव परात्वहङ्कारो न स्यात् । न च दृश्यत्वमेव परात्वं, प्रत्यगर्थाभावप्रसङ्गात् । न चान्याधीनासत्त्वशङ्काशून्यत्वम्, अहङ्कर्तुरपि स्वयम्प्रकाशचिद्रूपत्वात् । न चेदमेव प्रत्यक्त्वम्, एकत्र प्रत्यगर्थद्वयापत्तेः । आत्मभूतं[1] हि ज्ञानं स्वस्वधर्मप्रत्यक्त्वानुकूलत्वादिव्यवहारप्रतिसम्बन्धितादेतुत्वात् स्वप्रकाशम् । विषयसंविच्च तथा, स्वम्वगतैकत्वपरात्वादिविषयव्यवहारानुगुण्यापादनशक्तिमत्त्वात् । तच्च ज्ञानत्वादिति । प्रत्युतात्मभूतज्ञानसम्बन्धाधीनभाननियमाद् घटादिवदप्रतीची संविदिति युक्तम् । अपिच

प्रत्यगात्मा ह्यहंबुद्ध्या परागर्थाद् विविच्यते ।
अहमर्थातिरिक्ता च प्रतीची ते कथं चितिः ॥
अस्मदर्थेऽनिदम्भूतमहङ्कारातिरेकिणम् ।
तदाभासं चिदात्मानं न विविञ्चमः कथञ्चन ॥
अतः स्वस्मै स्वयम्भातः प्रत्यगात्माहमेव नः ।
अहमर्थो न चेदात्मा शास्त्रं कस्य प्रमाणतु ॥
तत्राधिक्रियमाणस्य विरहे मुक्तिकाम्यतः ।
न चाधिक्रियते संवित् केवला शास्त्रवर्त्मनि ॥

---

१. 'तं यदि' ख. पाठः.

अहमर्थानुषङ्गेण सुखप्रेप्सादिदर्शनात् ।
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् ॥

भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ।
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति ॥

अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ।
मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवास्थिता ॥

इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ।
ज्ञप्तेः सत्ता ज्ञप्तिता च कर्तृकर्मानुबन्धिनी ॥

कर्तृरूपविनाशे च का ज्ञप्तिरवतिष्ठताम् ।
छेत्तुश्छेद्यस्य चाभावे छेदनं न हि तिष्ठति ॥

अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति गृह्यताम् ।
विज्ञातारमरे केन न पश्य इति च श्रुतिः ॥

एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः ।
सूत्रकृज्ज्ञोऽत एवेति विज्ञात्रात्मत्ववर्त्मना ॥

ज्ञातारमहमर्थं नः प्रत्यगात्मानमब्रुवन् ।
कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव ! ॥

शब्दोऽहमिति दोषाय नात्मनीत्यपि च स्मृतिः ।
विज्ञातारमहङ्कारमात्मानं प्रब्रवीति नः ॥

अन्यथा वो युष्मदस्मत्प्रत्ययेत्यादि कुप्यति ।
अस्मत्प्रत्ययसिद्धोऽहं युष्माकं युष्मदर्थताम् ॥

यातीति वदतां वन्ध्या ममाम्बेति न दुर्भणम् ।

न च प्रकाशस्वभावस्य तस्य पराधीनप्रकाशता, येन तद्बलनिर्भासतया लक्षणतो युष्मदर्थः स्यात् । नहि दीपः प्रभाधीनप्रकाशः, प्रकाशगुणकत्वात् । एवमहङ्कारोऽपि । न चाहम्प्रत्ययविषयत्वादहमनात्मा देहादिवत् । मा भूद् रजतं रजतधीविषयत्वादरजतं शुक्तिवत् । अबाधश्चाहमात्मत्वेऽपि समानः । न चैवं चिद्रूपेणापि प्रादेशिकेनात्मना असम्बन्धिविषयव्यवहारः, अतिप्रसङ्गात् ।

तत्प्रादेशिकदीपस्य प्रभेव[1] विषयप्रकाशाय मानवृत्तिनिबन्धनविषयसम्बन्धमात्मनो धर्मभूतमपि ज्ञानमवश्यमेषितव्यम् । मा निर्विषयो ज्ञातृत्वानुभवो भूदिति च । अहमोऽनात्मत्वे घटादिवदज्ञातृत्वात् ॥

ज्ञातृत्वस्याध्यस्तत्वनिरासः ।

न च केवलसंविद एव तव ज्ञातृत्वं, येनालक्तकरक्तिमेव स्फटिके तद्बिम्बग्राहिण्यहमिति भ्राम्येत । अत एवायोदग्धृत्वनिदर्शनमपि निरस्तम्, अग्नेरिव[2] दग्धृत्वस्य संविदोऽहमो वा तव ज्ञातृत्वस्यानुपगमात् । अपिचैवं यदि निर्विषयाश्रया संविद् ज्ञातृतया भ्राम्येत, संविदहमिति प्रतीयेत । न त्वहमनुभवामीति, वैयधिकरण्येन भ्रमस्यारोप्यविषयसामानाधिकरण्यावभासित्वादिदं रजतमिति । दिक्षु मालिन्यं नभसि राग इत्यारोपेऽपि दिक्त्वमालिन्यनभस्त्वरागैकाधिकरण्यभानाद् दिशो मलिना रक्तं नभ इत्यतोऽविशेषात् । शब्दगतं तु वैयधिकरण्यमहेतुः । संवित्तत्त्वमहमध्यासे मा भासिष्ट, विरोधाद्, रूप्यारोपे शुक्तितत्त्वमिव । न, निरंशतया संविदः शुक्तिवदंशभेदेनाप्यनवभासे तद्विषयारोपानुदयात् । अपिचाहं संवेद्मीति भासमान एव संवित्स्वरूपे ज्ञातृत्वावभासोऽनध्यास इति युक्तम् । न हि निर्विषयाश्रया संविदस्ति । विषयसंविदेव च स्वप्रकाशा भवतात्मेष्यते । अतिरेके वा यथागमानुभवं विषयानुभवाश्रयोऽहमर्थो ज्ञातात्मेष्यताम् । यद्यविद्यावतोऽवभासाद् ज्ञातृत्वं मिथ्या, संविदपि स्यात् । तत्त्वज्ञानाबाध्यता च ज्ञातृत्वस्यापि । 'सर्वं ह सर्वः पश्यती'त्यादौ मुक्तावपि ज्ञातृत्वश्रवणात् ॥

संविन्मात्रात्मनोऽन्तःकरणप्रतिबिम्बितत्वतद्व्यङ्ग्यत्वनिरासः ।

यत्तु—उभयत्र ज्ञातृत्वाभावेऽप्यादर्शवदहमि मुखस्येव संविदः प्रतिबिम्बात् तस्य ज्ञातृत्वाभिमानः । अथवा करतलादिकमालोकमिवात्मसंविदमात्मस्थतयाभिव्यञ्जयत्यहमिति ज्ञातृत्वाभिमान इति । तदत एव निरस्तम्, अचाक्षुषत्वादव्यवधानाच्च प्रतिबिम्बायोगात् । अलातचक्रस्येव कल्पितरूपस्यैवाकाशस्य प्रतिबिम्बोऽनुभूयत इत्यनुदाहरणम् । अन्यथा कालादिप्रतिबिम्बोऽपि स्यात् । करतलादिकं च नाभिव्यञ्जकमालोकस्य, प्रतिस्फालनपरावृत्त्या द्वैगुण्येन बाहुल्यमात्रहेतुत्वात् । अपिच,

---

१. 'च विषयप्रभेव विषय', २. 'मि' ख. पाठः.

"शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः ।
स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत् ॥"

अपिच चिदात्मानमनुदितानस्तमितप्रकाशस्वभावमहमाद्यशेषविशेषापरोक्षावभासमात्रमचिदहङ्करोऽभिव्यनक्तीत्यात्मविदः परिहसन्ति । अपिचाहङ्कारस्य चिद्व्यङ्ग्यस्य तद्व्यञ्जकत्वं तत्पुत्रस्य तत्पितृत्वमिवायुक्तं, स्वभावविरोधात् चिदात्मनोऽचित्त्वप्रसङ्गाच्च । तदुक्तं—

"व्यङ्क्तृव्यङ्ग्यत्वमन्योन्यं न च स्यात् प्रातिकूल्यतः ।
व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद् यथा घटे ॥"

इति । न च व्यञ्जनमुत्पादनं प्रकाशनं वा, आत्मनो नित्यत्वात्, स्वप्रकाशत्वाच्च । अत एव न तद्ग्रहसामग्र्यनुग्रहः । न हि करणानुग्रहः, अनैन्द्रियके नित्यप्रकाशात्मनि व्यक्तेरिव जातावादर्शस्येव मुखादाविन्द्रियसम्बन्धघटकत्वानिष्टेः । यथाहुः —

"करणानामभूमित्वान्न तत्सम्बन्धहेतुता"

इति । न च बोद्धुनुग्रहः शमादिना हि कल्मषापनयोऽनुग्रहः शास्त्रकृतः, नाहमा । अपिचाहमर्थस्य बोद्धृत्वान्न स तेनैव शोध्यते, स्वरूपस्य सार्वदिकत्वेन दशाभेदायोगात् । न चालोकेन घटादौ तमस इवाहमा चिदात्मन्यज्ञानस्यापनयोऽनुग्रहः, यतो ज्ञानमज्ञानस्य निवर्तकमुपगम्यते । संविन्मात्रे स्वयम्प्रकाशे ज्ञानसमाश्रयविषयाज्ञानायोगाच्च । अन्यथात्मनो ज्ञातृज्ञेयभावप्रसङ्गाद्, घटादिवदज्ञातुरज्ञानानाश्रयत्वाच्च । अपिच ज्ञानमप्यविषयसंविदात्मनोऽज्ञानं न विरुन्धीत, शुक्तिज्ञानस्य रज्ज्वज्ञानाविरोधात् । तद्विषयत्वे वा वेद्यत्वापातः । अपिच स्वप्रकाशचिदात्मनि नाहङ्कारापनेयमनाद्यनिर्वचनीयमज्ञानमुपपद्यते, मानाभावात् । ज्ञानप्रागभावश्च नात्मन्यपनेयः, तज्ज्ञानापरिपन्थित्वात् । तस्माद् नाहङ्कारः संविदात्मनोऽभिव्यञ्जकः । न चाभिव्यञ्जकमभिव्यङ्ग्यमात्मस्थतयाभिव्यनक्तीति नियमः, घटादिव्यञ्जकालोकादिष्वदर्शनात् । न चादर्शो निदर्शनम् । चाक्षुषरश्मिप्रतिहतिहेतुतया तस्याव्यञ्जकत्वात् । व्यक्तेस्तु जातिराकार इति तदाश्रयतया गम्यते, न तु व्यक्तिव्यङ्ग्येति । न चाहङ्कारे तदुभयमस्ति, येन ज्ञातृत्वारोपो निरुध्येत । तस्मात् स्वत एव ज्ञातृतया सिध्यन्नहमर्थ एव प्रत्यगात्मा न ज्ञप्ति-

---

१. 'दं प्र', २. 'घ', ३. 'ज्ञानि', ४. 'माश्र' ख. पाठः.

मात्रम् । अज्ञातृत्वेऽनहन्त्वे च घटादिवदप्रत्यक्त्वात् । अत एव न ज्ञातृत्वादिरात्मधर्मः, दृश्यत्वाद् रूपादिवदिति निरस्तम् । तदनुभवस्य निर्विषयत्वप्रसङ्गाद्, आत्मनोऽपि दृश्यत्वोपगमेनाप्रयोजकत्वाच्च ॥

सुषुप्तावहमर्थानुवृत्तिसमर्थनम् ।

यत्तु सुप्तादावसन्ननुलब्धोऽहमनात्मेति । तन्न । असत्त्वानुपलम्भयोरसिद्धेः । तमोगुणाभिभवाद्धि सुखादिब्राह्मणत्वाद्यन्तर्बहिर्विशेषणवैशिष्ट्येन विशदावभासाभावेऽप्याप्रबोधमहमित्येकाकारेण स्फुरणात् । संविदात्मवादेऽपि ज्ञातृज्ञेयोपश्लेषविरहेणाविशदावभासत्वोपगमात् । अत एव मामपि[1] नाज्ञासिषमिति जागरानुभूतजात्यादिविशिष्टाहमज्ञानमेव परामृश्यते । अन्यथाहं नाज्ञासिषमित्यहमनुवृत्त्यनुभववचनविरोधात् । 'नाह खल्वयमि'त्यादिश्रुतिरपीदमेवानुवदति । 'अयमहमस्मी'ति विशेषणात् । न च कश्चिदपि प्रतिबुद्धोऽहंभावरहितं निर्विशेषज्ञप्तिमात्रमज्ञानसाक्षितयावतिष्ठत इत्यवमृशति । किन्तु न किञ्चिदहमवेदिषं सुखमहमस्वाप्समित्येव । तत्र विषयविज्ञानमात्राभावः स्वापोऽतीतकालसम्बन्धो वा प्रागनुभूतार्थप्रत्यभिज्ञायोग्यानुपलब्धिभ्यामनुमीयत इति तद्वैशिष्ट्येनाहमर्थोऽनुकूलतया प्रत्यक्तया च प्रागनुभूत एव प्रत्यभिज्ञायते सुखमहमस्वाप्समिति । यथा प्रगे चत्वरगजाभावपरामर्शे प्राक् प्रतियोग्यस्मरणादननुभूतस्यैव योग्याननुस्मृतिलिङ्गानुमितस्य तस्य विषयत्वं, चत्वरे तु प्रागनुभवसम्भवाद् न प्रकारान्तरमाश्रीयते । तद्वत् । मन्दमगमं मधुरमगासिषमित्यत्र गतिगानसहभावेन तदानीन्तनमान्द्यमाधुर्ययोरिव स्वापसहभावेनाहं सुखमस्वाप्समिति प्रत्यक्त्वानुकूलत्वयोरपि तत्कालतयानुसन्धानात् । स्वापादौ चागतिकमनुमानम् । नहि सुप्तादिविनाश्यः प्रबोधाद्युत्पाद्यश्चाहमर्थः, येन सुखमहमंशेऽपि प्रतिबुद्धदशानुभव एव स्यात् । अहमिदमकरवम्, अदोऽवेदमेतदवचमिति वस्तनानुसन्धानं हि न स्यात् । न च सुप्तावहमोऽनुभवसामग्र्यभावः, स्वयम्प्रकाशत्वात् । 'अत्रायं पुरुषः स्वयं ज्योतिरि'ति बोद्धुरहङ्कारस्य पुरुषसंशब्दितत्वात् । 'बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति श्रुत्यन्तरात् ।

---

१. 'मामोऽपि', २. 'वाद्' ख. पाठः.

लोके च ज्ञातरि पुरुषशब्दप्रसिद्धेः । न च न किञ्चिदवेदिषमित्यहमवभास-व्यासेधः । नावेदिषमहमिति तदनुवृत्त्यैव वेद्यभानाभावावगमात् । अन्यथा अविशेषनिषेधः संविन्मात्रावभासस्यापि स्यात् । अपिच प्रगे गजाभावाश्रयतया चत्वरस्येव सुप्तावज्ञानाश्रयतयानुसन्धेयस्याहमोऽभाववचनमुन्मादोद्घोषणमात्रम् । मामपि नाज्ञासिषमित्यस्य च गतिरुक्ता । अपिचाज्ञानसाक्षी सुप्तौ भवदुपेतात्मा न ज्ञातुरतिरेकमर्हति, तत्रैव साक्षिशब्दप्रसिद्धेः । स्मरति च भगवान् पाणिनिः 'साक्षाद् द्रष्टरि संज्ञायाम्' (५. २. ९१) इति । स चायं साक्षी साक्षाद् ज्ञाता जानामीति प्रतीयमानोऽस्मदर्थ एव । अपिच स्वप्रकाश आत्मा न परस्मै प्रथत इति तवापि सम्प्रतिपन्नम् । तथाच सौषि-काात्मा अहम्भावानुगतप्रकाशः, स्वस्मै स्वयम्प्रकाशत्वात् सम्प्रतिपन्नजागरात्म-वद् व्यतिरेकेण घटादिवच्च । तस्मात्

सुप्तावविशदाभासादविशिष्टावमर्शनात् ।
अहम्भानोपपत्तेश्च सौषिके पुरुषश्रुतेः ॥
अहमर्थानुसन्धानात् प्रतीपानवमर्शनात् ।
अज्ञानाश्रयवाच्च साक्षित्वोपगमादपि ॥
न सुप्तावहमोऽभावो भवता शक्यशङ्कनः ।
स च स्वस्मै स्वयं भातः प्रत्यगात्माहमिष्यताम् ॥

मुक्तावहमर्थानुवृत्तिसमर्थनम् ।

अत एव मुक्तावप्यहमर्थोऽनुवर्तते, स्वस्मै स्वयं भासमानस्याहमित्येव भाननियमात् । न च सुखभाजो दुःखनिवृत्तेरहमात्मनो विनाशोऽपवर्गः पुरुषार्थो भवति, मुक्तावहमर्थानुवृत्तावधिकारिविरहात् । शास्त्राप्रामाण्यादि-दोषाश्च प्रागुक्ताः । न चात्मनोऽहमारोपितो धर्मः, येन तद्विलयेऽपि स्वरूपमव-शिष्येत । स्वरूपमेव ह्यहमिति । अहं जानामि मम ज्ञानमिति ज्ञानस्यैव तद्धर्मत्वप्रतीतेः । न चैवं कदापि पुनरज्ञत्वसंसारित्वप्रसङ्गः ।

---

१. 'सुषुप्ता' ख. पाठः.

"न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्"

इत्याम्नायबाधात् । अन्यथा सहचारदर्शनमात्रेण तत्प्रसङ्गः संविन्मात्रात्मवादेऽपि स्यात् । अत एव नाज्ञत्वप्रयुक्तमप्यहन्त्वं संवित्त्वं वा । नह्यहमित्यज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा, येन मुक्तावपि तन्मूलः संसारः प्रसज्येत । अहमित्येव ह्यात्मनः स्वरूपमिति तस्मिन् तद्रूपावभासिनः सम्यग्ज्ञानस्याज्ञानादिविरोधित्वात् । श्रूयते च ब्रह्मभावापरोक्षनिर्धूतनिरवशेषाविद्यादीनामपि वामदेवादीनामहम्भावानुगमः 'अहं मनुरभवं सूर्यश्च', 'मामेव विजानीहि', 'अहमेव वर्तामी'त्यादौ । यदुपासनया चामीषामविद्यासंसारात्यन्तापगमः, तस्यापि परमात्मनः 'बहु स्यां प्रजायेय', 'हन्ताहमिमास्तिस्रो देवताः' इत्यादौ । स्मर्यते चाहम्भाव ईश्वरस्य 'यस्मात् क्षरमतीतोऽहम्', 'अहं सर्वस्य जगतः प्रभवः', 'अहमात्मा गुडाकेश!', 'अहं सर्वस्य प्रभवः', 'तेषामहं समुद्धर्ते'त्यादौ । न च मुख्यसम्भवे सर्वत्राहमिति चिन्मात्रलक्षणा युक्ता यत्तु 'महाभूतान्यहङ्कारः' इति तस्य क्षेत्रान्तर्भाववचनं, यच्च

"अथ चेत् त्वमहङ्कारान्न श्रोष्यसि विनंक्ष्यसि"

इत्यनर्थहेतुतावचनं, यच्च 'अहङ्कारं बलं दर्पं विमुच्य ब्रह्मभूयाय कल्पते' इति मुक्तौ त्याज्यत्ववचनं, यच्च

"अहङ्कारविमूढात्मा कर्ताहमिति मन्यते"

इति तदात्मभावस्य मोहत्ववचनं, तत् सर्वमहमश्च्व्यन्तात् करोतेः करणे भावे च घञि योऽनहम्यहम्भावकरणमव्यक्तपरिणामः यश्चानहम्युत्कर्षगर्भोऽहमभिमानात्मा 'गर्वोऽभिमानोऽहङ्कार' इति पर्यायनामा प्रकृष्टजनावमानहेतुः 'अनात्मन्यात्मबुद्धिर्या' इत्यादिस्मरणादविद्यालक्षणः तद्विषयं व्याख्येयम् । सर्वत्र स्वरूपोपदेशप्रतिपत्त्योरहमित्येवानुगमो न विरोत्स्यते । यद्यपि च 'अथातोऽहङ्कारादेश' इत्यादिषु शुद्धस्वरूपाभिधानमुपगम्यते, तथापि तत्र क्विप्रत्ययमनुत्पाद्याहमिति कारः करणमस्मिन्निति व्युत्पाद्यते विवक्षाभेदात् । न चाहङ्कारपदवाच्यत्वादेवाहमर्थजाड्यमनुमेयम् ।

"तथाच हरिशब्दस्य दृष्टा मण्डूकवाचिता ।"
इति तच्छब्दवाच्यत्वात् सिंहो मण्डूक एव किम् ॥

---

१. 'न वि' क. पाठः.

तथा गोशब्दवाच्यत्वाच्छब्दश्चापि विषाणवान् ।"

इति ह्युक्तम् । अपिच

अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ।
ज्ञप्तिमात्रात्मवादे स्याद् देहे तन्मात्रगोचरः ॥

ज्ञात्रहमर्थगोचरस्तु स मनुष्योऽहमिति ।

तस्मादबाधिताहन्तानिर्भासश्चेतनः स्वदृक् ।
ज्ञातैवात्मानहम्बोधा संवित् तु न घटादिवत् ॥

तथाचात्मसिद्धौ —

"अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् ।
अविद्यायोगतश्चात्मा ज्ञाताहमिति भासते ॥"

इति । तथा

"देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥"

इति । धीभ्योऽन्यः न विषयसंवित् । अनन्यसाधनः स्वप्रकाशः । व्यापी अणुरपि क्रमेण सर्वचेतनान्तःप्रवेशी । धर्मभूतज्ञानेन वा व्याप्तिरत्रैवोक्ता । व्याप्तिरपि चैतन्यमात्रेण रूपेणेति । तदेवं संविदात्मनानात्वेन जीवपरयोरपि दृश्यत्वे भेदापारमार्थ्यसाधनानैकान्त्यम् । अन्यथा शास्त्रानर्थक्यात्, 'तरति शोकमात्मवित्,' 'ब्रह्मविदाप्नोति परमि'त्यादिविरोधाच्चेति ॥

सिद्धान्तः ।

अत्राभिधीयते — स्वयम्प्रकाशचिद्रूपस्तावदात्मा तवापि सम्प्रतिपन्नः । 'अत्रायं पुरुषः स्वयं ज्योतिरि'त्यादिश्रुतेः ॥

ज्योतिःपदवृत्तिनिमित्तम् ।

अत्र यदन्य आह — 'किं ज्योतिरेवायं पुरुष' इति प्रश्नस्योत्तरम् 'आदित्यज्योतिः सम्राडि'ति । न चात्रात्मनो ज्योतिष्ट्वं प्रश्नविषयः । उत्तरवैयधिकरण्यप्रसङ्गात् । किं तर्हि । पुरुषस्य[1] व्यवहारहेतुज्ञानानुग्राहकं ज्योतिरेव ।

---

१ 'षव्य' ख. पाठः.

एवमस्तमित आदित्ये चन्द्रमसि च शान्तेऽग्नौ वाचि च किञ्ज्योतिरेवायमिति प्रश्न उत्तरम् 'आत्मैवास्य ज्योतिरि'ति स्वयमेव स्वस्यासनादिव्यवहारहेतुज्ञानजनक इत्युच्यते । स्वप्नावस्थायामप्यादित्यादिज्योतिरभाव इति तदेव चात्मज्योतिष्ट्वम् 'अत्रायं पुरुषः स्वयंज्योतिरि'त्युपसंहरति । स्वयमात्मैव वासनावशाद् ज्ञानं जनयतीति । एवञ्च ज्ञानजनकवाची ज्योतिश्शब्दो न ज्ञानवाची, आदित्यादावनन्वयात् । तस्मिन्नेव प्रकरणे तस्यैवार्थभेदायोगाच्च । आह च भगवान् भाष्यकारः — 'ज्योतिश्चरणाभिधानात्' (ब्र० १. १. २४) इत्यधिकरणसिद्धान्ते

"यद्वा नायं ज्योतिःशब्दश्चक्षुर्वृत्तेरनुग्राहके तेजसि वर्तते । अन्यत्रापि प्रयोगदर्शनात् । 'वाचैवायं ज्योतिषास्ते', 'मनो ज्योतिर्जुषतामि'ति च । तस्माद् यत् कस्यचिदवभासकं तद् ज्योतिःशब्देनाभिधीयते"

इति । तस्माद् न स्वयम्प्रकाशचिद्रूप आत्मेति ।

अत्र ब्रूमः — न ज्ञानजनकत्वमेव ज्योतिःपदवृत्तिनिमित्तं, विषयशरीरादावपि प्रसङ्गात् । नापि ज्ञानप्रतिबन्धपरिपन्थित्वम् । कुड्यादिव्यवधानापनायकेऽपि प्रसङ्गात् । धीसामग्रीकालीनत्वं प्रतिबन्धकविशेषणमिति चेत्, तथापि सूर्यादीनां तथाभावेऽपि मनोवागात्मनामतथात्वेनाज्योतिष्ट्वप्रसङ्गात् । तस्मात् प्रकाशत्वमेव तत्पदवृत्तिनिमित्तं लाघवात् । तच्च स्वसंसृष्टविषयप्रकाशनव्यवहारानुकूलस्वभावत्वं, स्वपरव्यवहारानुगुण्यापादकत्वं वा साधारणम् । आलोकः प्रकाशते लोकः प्रकाशते ज्ञानं प्रकाशते सुखं प्रकाशते इति सर्वव्यवहारात् । तथाचात्मनोऽपि ज्योतिष्ट्वं प्रकाशस्वभावत्वादेव । तत् त्वालोकादौ भास्वरत्वं तमोविरोधिरूपमौज्ज्वल्यम् । आत्मनि तु स्वसत्तासंशयादिविरोधिस्वभावत्वं संवित्त्वमिति व्यवतिष्ठते । न चात्र ज्ञानजनकविवक्षया किं ज्योतिरित्यादि प्रक्रियते, लोकसिद्धाभिधानवैयर्थ्याद्, अपुरुषार्थत्वाच्च । किन्तु कार्यकरणसङ्घातचैतन्यनिरासेन तदनन्तर्भूतज्योतिरात्मविवक्षया । अत एव वाचश्च भषणादिसाधारणरूपेण स्वसंसृष्टव्यवहारप्रयोजकतामात्रेण वागेवास्य

---

१. 'चाज्यो', २. 'ति व्य' ख. पाठः.

ज्योतिरिति व्यवहारः । तावतैव कार्यकरणसङ्घातस्य विवक्षितस्वानन्तर्भूत-ज्योतिरधीनव्यवहारत्वसिद्ध्यविघातात् । तादृशेऽपि वागादौ लौकिकज्योति-श्शब्दाप्रयोगादमुख्यं ज्योतिष्ट्वम् । आत्मनि पुनरलौकिकेऽपि लोकसाधारण्येव व्युत्पत्तिरिति 'पुरुषः स्वयंज्योतिरि'ति मुख्यसम्प्रत्ययो युक्तः । भाष्यकृतस्तु स्वसंसृष्टव्यवहारप्रयोजकतामात्रमाश्रित्य 'यत् कस्यचिदवभासकं तद् ज्योति-श्शब्देनाभिधीयते' इत्याहुः, तावतापि तेन ब्रह्मग्रहणोपपत्तेरिति । न तु कि-ञ्चिदवभासहेतुत्वं प्रवृत्तिनिमित्तमतिप्रसङ्गात् । अत एव मिश्रा वागादिव्या-वृत्तं निरुक्तमेव ज्योतिश्शब्दवृत्तिनिमित्तं मन्यमाना आहुः — 'अथवा प्र-काशमात्रवचनो ज्योतिश्शब्दः । प्रकाशश्च ब्रह्मेति ब्रह्मणि मुख्य' इति । तस्मादयं पुरुषः स्वयञ्ज्योतिः स्वयम्प्रकाश इत्यास्तां तावत् । न चास्येदृ-शस्य पराधीनमेव सत्त्वभानमसत्त्वशङ्काविरहो वा । भावाभावापवादविकल्पि-तरूपभाने पराधीनेऽपि प्रकाशसत्तामात्रभाने परानपेक्षत्वात् । तच्च विवक्षितं दृश्यत्वमिति कानैकान्त्यम् ॥

दृश्यत्वनिरुक्तिः ।

अथवा प्रमाणाजन्यज्ञानविषयत्वं दृश्यत्वम् । परमतेन दृष्टान्ते साध-नावैकल्याय वेदान्तजन्यज्ञानविषय आत्मन्यव्यभिचाराय च प्रमाणाजन्येति । न चान्यतरासिद्धिः । परमतेऽपि तादृगीश्वरज्ञानविषयत्वाभ्युपगमात् । अस्म-न्मते च प्रमाणाजन्यचैतन्यविषयत्वाङ्गीकारात् । न चैवमपि स्मृतिविषयत्वेन व्यभिचारः, प्रमात्रव्यवहितसंविदात्मनः स्मरणानुपपत्तेः । न च भ्रान्तिविषय-त्वेन, तस्यैव बाध्यविषयभानत्वेन भ्रान्ततया तद्विषयत्वासिद्धेः ।

यत्तु — एवमपि जीवस्यापि पक्षत्वे भागासिद्धिः । जडमात्रपक्षत्वे चात्मनित्यत्वादिधर्मेष्वनैकान्त्यमित्यादि । तन्न । नहि पृथिव्यादेरिव गन्धा-दयो जीवस्य नित्यत्वादयो धर्माः साध्यन्ते । किं तर्हि । तत्तद्वादिकल्पिता-नित्यत्वादिविरोधिस्वरूपोपलक्षणभूता निर्दिश्यन्ते । न च तेषां दृश्यानामपा-रमार्थ्येऽपि तद्विरोधिस्वभावस्योपलक्ष्यस्य कश्चिद् दोषः । न खलु प्राच्योप-

लक्षितं प्रतीचीनं भवति । न वोपलक्षणसर्पादिमृषाभावेऽपि तदुपलक्ष्य-रज्ज्वादिररज्ज्वादिः । नहि नित्यत्वयोगितया नित्यं, तस्यैवानित्यत्वे वस्तुनोऽप्यनित्यत्वप्रसङ्गात् । किन्त्वनित्यत्वविरोधिस्वरूपमेव । तच्च सत्तामात्रात्मनो नित्यत्वधर्माभावेऽपि न हीयते । अपिच जीवस्य ब्रह्मसत्तैकरस्यपारमार्थ्योपगमात्, तस्य च कालातीतस्यासङ्गस्य सर्वकालसम्बन्धरूपनित्यत्वासम्भव इत्यवादिष्म[1] । एवं प्रत्यक्त्वादयोऽपि नात्मधर्माः, परागादिविरोधिस्वरूपोपलक्षणत्वादिति । अथवा स्वेतरचैतन्याधीनभानत्वमेव दृश्यत्वम् । चैतन्याधीनभानत्वं तदधीनासत्त्वशङ्काविधुरत्वं तदधीनव्यवहारत्वं वा । चैतन्यात्मनोऽपि स्वाधीनभानत्वाद्, अत उक्तं स्वेतरेति । न च स्वयम्प्रकाशचिदात्मनोऽपि पराधीनभानत्वम्, अनपेक्ष्यत्वादमानत्वाच्च ॥

आत्मनोऽवेद्यत्वम् ।

अथ 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्', 'यो वेद निहितं गुहायां', 'यो वेदाहं ब्रह्मास्मीति', 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः', 'को मोहः कः शोक एकत्वमनुपश्यतः', 'इह चेदवेदीदथ सत्यमस्ति', 'यद् भूतयोनिं परिपश्यन्ति धीराः', 'निचाय्य तं मृत्युमुखात् प्रमुच्यते', 'ब्रह्म वेद ब्रह्मैव भवति',

"ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते"

'य एवं वेत्ति पुरुषमि'त्यादिषु वेद्यत्वं ब्रह्मणो गम्यते । नन्ववेद्यत्वमपि गम्यते 'अदृश्येऽनात्म्ये', 'अगृह्यो नहि गृह्यते', 'येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयात्', 'न विज्ञातेर्विज्ञातारं विजानीयाः', 'अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यम्',

"अन्यदेव तद् विदितादथो अविदितादधि"

'यत् तदद्रेश्यमग्राह्यं', 'स वेत्ति वेद्यं न च तस्यास्ति वेत्ता', 'मां तु वेद न कश्चन',

---

१. 'धुः' ख. पाठः.

"सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्"

इत्यादिषु । अयुक्तं चान्यतराप्रामाण्यम् । तुल्यं हि साम्प्रदायिकम् । वस्तुस्वरूपं च न विकल्प्यते । कथं तर्हि व्यवस्था । बुद्धिवृत्त्या वेद्यमवेद्यं चैतन्येन । एवमुभयत्र विद्यर्थवैरूप्यकल्पना निर्मूला । बहिरन्तःकरणजज्ञानभेदेन स्यात् ।

"न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥
एषोऽणुरात्मा चेतसा वेदितव्यः"

'मनसैवेदमाप्तव्यमि'त्यादिश्रुतेरिति । नैवं स्यात् ।

"नैव वाचा न मनसा प्राप्तुं शक्यो[1] न चक्षुषा"

इत्यविशेषनिषेधात् । न चाशुद्धमनोविषयो निषेधः ।

"यन्मनसा न मनुते येनाहुर्मनो मतम्"

'मनसो मन' इत्यादौ मनोवभासकत्वेन सर्वशस्तदवेद्यत्वावगमात् । लोकेऽपि तत्प्रकाशस्य तदप्रकाशकत्वदर्शनाद् ध्यानादिद्वारा स्वरूपावभासोपयोगात् तु 'विशुद्धसत्त्वः पश्यते' इत्यादिः । अन्यथोभयत्र विषयसङ्कोचे लक्षणापातात् । श्रुतेरवेद्यत्वोपपादनप्रकारो हि परं भिद्यते । 'नैव वाचा न मनसा प्राप्तुं शक्यः', 'नायमात्मा प्रवचनेन लभ्यः', 'नायमात्मा बलहीनेन लभ्यः'

"नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥",

'नैषा तर्केण मतिरापनेया' इत्यादिः । हन्त तर्ह्याचार्योपदेशानुपदेशाभ्यां वेद्यत्वावेद्यत्वव्यवस्था स्यात् ।

"अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते"

'प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ!', 'आचार्यवान् पुरुषो वेदे'त्यादिदर्शनात् । नैवमपि स्यात् । 'पश्यते निष्कलं ध्यायमानः'

"एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्म धाम"

---

१. 'ह्यो' ख. पाठः.

'यमेवैष वृणुते तेन लभ्यः', 'धैर्येण तं विद्यादि'त्यादिसाधनाव्यवस्थानादेकरूपेण वेद्यत्वावेद्यत्वव्यवस्थाया दुष्प्रज्ञानत्वात् । अथ यथोदितसाधनसम्पन्नस्य वेद्यमन्यस्यावेद्यमित्यधिकारिभेदेन व्यवस्था स्यात् । नैवमपि स्यात् । 'न च तस्यास्ति वेत्ता', 'को अद्धा वेदे'त्याद्यविशेषनिषेधात् । अपिचैवमवेद्यत्वमवचनीयम् । साधनरहितस्य तदर्थसिद्धेः । न चेत्थं महाभागं ब्रह्म यदुत बहुसाधनं विना अवेद्यमिति स्तुतिपरत्वं स्वरूपविधिविशेषणस्यादृश्यमित्यादेरुपगन्तुं युक्तम् । अपिच क्रियोन्मुखमात्रस्य तन्निषेधो गम्यतेऽस्पृश्यमशुचीति । एवमदृश्यमिति द्रष्टृमात्रस्येति गम्यते । न पुनराक्षिप्तव्यतिरेकविशेषोपसंहारो युक्तः । मा भूद् भूतहिंसा कर्मणि त्रैवर्णिकस्य विहितेति तदहिंसाविधावत्रैवर्णिकस्योपसंहार इति । एवं तु स्याद् वरावराचार्योपदेशभेदेन वेद्यमवेद्यं चेति,

"न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः ।
अनन्यप्रोक्ते गतिरत्र नास्ति"

इत्यादिश्रुतेः । नैवमपि स्यात् । 'केन विजानीयादि'त्यविशेषतो विज्ञेयत्वसाधनाक्षेपात् । वरावार्योपदेशे चागतिर्नास्तीत्यज्ञानाभाववचनेन वेद्यत्वाप्तीतेः । 'अस्तीत्येवोपलब्धव्यः' इति श्रुतेः । स्वरूपेण वेद्यमियत्तया चावेद्यमिति व्यवस्था स्यात् । न स्यात् । इयत्ताभावादेव तथावेद्यत्वाप्तौ तद्वैयर्थ्यात्, स्वार्थवृत्तिसम्भवे लक्षणेयत्तानिषेधपरत्वकल्पनायोगाच्च । तस्माद् व्यवस्था वक्तव्येति ।

उच्यते — अवेद्यत्वं तावत् स्वरूपविधिविशेषणमेव सर्वत्रोपादीयते । नैवं वेद्यत्वम् । हेतुफलविधिशेषतया तु तद्विशेषणम् । 'यद् भूतयोनिं परिपश्यन्ति धीराः' इत्यत्रापि भूतयोनिमिति विधेयविशेषणतया दृशेः स्वरूपानन्वयात् । तथाचावेद्यत्वेन विधेयेन बलवता दुर्बलमविधेयं वेद्यत्वमुदितविशेषणस्याधिकारिणो गुर्वधीनस्य विचारितवेदान्तजन्यचरमवृत्त्यभिव्यक्त्या अविद्यादिबाधे चिदात्मा स्वरूपेणावभासत इत्यतस्तत्र दौवारिकं पुरुषस्य स्वातन्त्र्यमपेक्ष्यापचारिकमवस्थाप्यते । तथाच 'दृश्यते त्वग्र्यया बुद्ध्या'ति व्याख्यातम् ॥

अविज्ञातं विजानतामित्यादिश्रुत्यर्थः ।

एवं हि

"अविज्ञातं विजानतां विज्ञातमविजानताम्"

इत्यादि चोपपन्नम् । अन्यथा विरोधात् ।

यत्त्वाह — विजानतां विशेषेण कात्स्न्र्येन जानीम इति मन्यमानानामविज्ञातं ब्रह्म ।

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"

इति ह्याम्नातम् । अविजानतां न विशेषेण जानीम इति मन्यमानानां विज्ञातमिति । कथं पुनरत्र मन्यतिरश्रुत उपक्षिप्यते । 'यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं', 'नाहं मन्ये सुवेदे'ति च प्रक्रमे मन्यतिग्रहणादिहापि तदर्थरूपप्रत्यभिज्ञानात् । सूपसर्गेण हि वेद्यस्यैव सतः कात्स्न्र्येन वेदनायोग्यत्वं गम्यते । अन्यथा यदि मन्यसे वेदेत्येवावक्ष्यत् । न वात्मतत्त्वमुपादेक्ष्यतेति ।

अत्रोच्यते—ब्रह्मणोऽविज्ञेयत्वे कात्स्न्र्येन तदुपदेशानर्थक्यम् । वाङ्मनसाविषयत्वमपि हि कृत्स्नैकदेश एव चक्षुराद्यविषयत्ववत् । तत्र नेयत्तयेत्यधिकावापो युक्तः । व्याख्यातं च निर्विशेषपरं 'यतो वाचो निवर्तन्ते' इत्यादि । अपिच 'केनेषितं पतति प्रेषितं मनः' इत्यादाविषितमिति विशेषणात् सन्निधिमात्रेण मनःप्राणादिप्रेरकप्रश्ने, 'श्रोत्रस्य श्रोत्रं मनसो मनः' इत्यादिना तस्य तस्य स्वरूपं श्रोतव्याद्यभिव्यञ्जकभावलक्षणं चैतन्यमिति लक्षणत उत्तरिते, साक्षात् तदुपदेशापेक्षायां 'न तत्र चक्षुर्गच्छति', 'न सन्दृशे तिष्ठति रूपमस्ये'ति 'न वाग् गच्छति', 'अव्यपदेश्यं',

"नामरूपादिनिर्देशविशेषणविवर्जितः"

इति । अत एवाविशेषणत्वाद् 'नो मनः' तस्य तस्यात्मत्वादवभासकत्वाच्च । एवं सति न विद्मोऽविषयतया । तथाच न विजानीमो यथैतदनुशिष्यात्, वेद्यं हीदमीदृशमिति शक्यमाहत्यानुशासितुम् । नैवमात्मेत्यतो मा भूदत्यन्तासिद्ध इति

---

१. 'तिश्रु' ख. पाठः.

"अन्यदेव तद् विदितादथो अविदितादधि"

इत्यतन्निरसनोपदेशमुखेन स्वयम्प्रकाशत्वमुपक्षिप्तम् । न धर्मादिवदलौकिकप्रमाणगम्यत्वमशब्दत्वादनुपपादनाच्च । तच्च स्वयम्प्रकाशत्वं

"यद् वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि"

इत्यादिना वागादिभासकत्वेन व्यक्तीकृत्य, बोध्यस्य वागादिसम्बन्धनिर्देशेन वक्त्रादिरूपात्मनि बुद्धिर्मा पर्यवसासीदिति विचाल्यते 'यदि मन्यसे सुवेदे'ति वेद्यादिभेदेन । तद्धि तस्य सौष्ठवं लोके दृष्टम् । इयत्ताया अप्रसङ्गात् । सविषयं हि वेदनमात्मन्यपि वेद मामहमित्यभिमानावहमिति 'यदि मन्यसे'. इत्युच्यते । 'दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं', यदस्य त्वं वेत्थ । 'यत्रान्यत् पश्यती'त्यादि 'तदल्पमि'ति श्रुत्यन्तरात् । यदनु देवेष्वस्य रूपमात्मभूतं यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति तद् भूमाख्यं सत्ताप्रकाशमात्रम् । अथनु ते अविदितं मीमांस्यमेव मन्ये । अथ वा अथनु मीमांस्यमेव मन्ये इत्याचार्येणोक्ते विदितमिति मीमांसितवतः शिष्यस्य वचनं कथं नाहं मन्ये सुवेदेति । अन्यदेव तद् विदितादिति ह्युपदिष्टम् । नो न वेदेति च मन्ये, अथो अविदितादधीति ह्युपदिष्टम् । कथं तर्हि वेद च । निवृत्तावरणस्वरूपावभासमात्रेऽपि सकर्मकर्तृवद्वचनं प्रकारान्तरासम्भवादहमनुवृत्त्युपाधिकृतं, 'यदि मन्यसे सुवेदे'ति 'नाहं मन्ये सुवेदे'ति च मन्यतिग्रहणात् सकर्मकर्तृकवेदनप्रतिक्षेपावगमात् । तदेव दृढीक्रियते । यो नोऽस्माकं सब्रह्मचारिणां मध्ये तद् विदिताविदितान्यत्वं वेद, कथं, नो न वेदेति । वेद च, चकारादितिरनुकृष्यते नो वेदेति चेति । स तद् ब्रह्म वेद तस्यैवैतस्य विदिताविदितान्यस्वरूपस्य गुरुशिष्याख्यायिकारूपाद् व्युत्थाय श्रुतेः स्ववृत्त्योपसंहारोऽयं

"यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानताम्"

इत्यादिः । तत्र विशब्दो यद्यवश्यमैकार्थ्यासम्भवेऽपि विषयविशेषपरः, तदा वेद्यादिभेदविशेषपर एव स्यात् । तथाच सूपसर्गो व्याख्यातः । न चात्र

---

१. 'यनमु', २. 'स्वप्र', ३. 'तो' ख. पाठः.

क्वचिदपि वेद्यत्वमात्मनः सङ्गम्यते । प्रत्युत 'न विद्म' इति च 'अन्यदेव तद् विदितादि'ति च 'न वेदे'ति चावेद्यत्वमेवाभ्यस्यते । अपिच

"चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति"

इत्यत्र विदित्वेत्यपेक्षितमपि नोच्यते वेद्यतां माधिगमन्निति । यत्त्वेवं यदि मन्यसे वेदेतीत्येवावक्ष्यदित्यादि । तन्न । विदिताविदितान्यस्वरूपावभासस्यापि वेदेत्येव व्यपदेशेन श्रोतुराकुलीभावप्रसङ्गात् । आत्मोपदेशश्च स्वरूपावभासपरिशेषार्थ इत्यनन्तरमावेदितम् ॥

ब्रह्मणोऽदृश्यत्वे आक्षेपपरिहाराः ।

अथापि स्याद् वस्तुवृत्तमेव तादृशं यदात्मनोऽपि वेद्यत्वम् । न । जडवृत्तं हि तत् । अथ परोक्षत्वे सति भानमन्यचैतन्याधीनं, स्वप्रकाशस्यापि संवेदनस्यातीतादेरन्यदीयस्य चानुमेयत्वात् । यदि चाभेदादविषयत्वमपेतस्वपरविवेकं सर्वं सर्वस्य सर्वदा भासेतेति सर्वप्रमाणानर्थक्यमापद्येत । अथैकमपि चैतन्यमुपाधिभेदभिन्नं व्यवतिष्ठेत, जीवः प्रमाता, ब्रह्म चान्यच्च व्यवहितं प्रमेयमित्यापन्नम् । अथ यथास्वभावं भावस्य चैतन्यविषयत्वमपारमार्थ्यहेतुः, तथा च घटरजतादिः स्वभावेन चिदात्मव्यवधानात् । ब्रह्मात्मचैतन्यं तु परोपाधिभेदभिन्नं व्यवहितमपि स्वभावेनाभिन्नमव्यवहितं चेति कस्यान्यस्य चैतन्यविषयो भासेतेति चेद्, एवं हि स्वयमेव नित्यावभासं ब्रह्मेति किमागमिकविज्ञानेन । अनादिविभ्रमव्यवधानादागमिकज्ञानविषयत्वे ब्रह्मणोऽपि दृश्यत्वं दुष्परिहरमिति ।

उच्यते—सत्तामात्रब्रह्मचैतन्यमेकमेकरसमेव नित्याव्यवहितावभासमपि स्वाभाविकाविद्याविकल्पकालुष्येण तथ तथा व्यवधीयते । मानाधीनविज्ञाने सति तु उज्झितव्यवधिकमवभासते सा च बुद्धिवृत्तिः । बुद्धिस्तु येनाहङ्कृतो[2], यद्वृत्त्या बोद्धा एष्टा द्वेष्टा वर्ता सुखी दुःखी भवति, येन च स्वमँङ् नानाभावाननुभवति, यद्विलये च स्वमपीतैः सता सम्पद्यते, येन च समान एकात्मा सन्नुभौ लोकावनुसञ्चरति तत् सत्त्वं[5] न त्वात्मनो धर्मः

---

१. 'तौ वि' २. 'ते', ३. 'प्नन्दानाभावमनु', ४. 'ति'' ५. 'त्यं' ख. पाठः.

प्रमेव । दीपस्य अग्रे ज्ञातृत्वनिरासात् । न चैवं घटादिविकल्पो बुद्धिवृत्त्युपरागे सत्येव स्वयमवभासते, येन चिदात्मवदृदृश्यः स्यात् । जाड्येन तस्य भानं हि वृत्तिस्फुटितचैतन्याधीनमेव । न च वृत्तिरेव तद्भानं, सत्याश्रये भवन्त्या अप्रकाशत्वाद् ज्ञानत्ववत् । एवमपि ज्ञानपदवाच्यत्वोपपत्तेश्च । नन्वेवमपि वृत्तेरुत्पत्त्यैव चैतन्याविविक्तवृत्तितया तद्विषयत्वनान्तरीयकं चैतन्यविषयत्वमात्मनोऽप्यवर्जनीयम् । न । वृत्तिविषयत्वं हि तदविनाभावित्वं, तदाकारत्वं, भासमानरूपेण तन्निरूपकत्वम् । ईदृशं च विशेषनिषेधविकल्पितरूपेणात्मनो वृत्तिस्फुटितचैतन्यविषयत्वमपि न नो वारणीयम् । नहि तावता तस्य स्वरूपेण तदधीनं भानमसत्त्वाशङ्काविरहो वा । अतद्रूपबाधे स्वयमेवभानाद्, भानमात्रेऽसत्त्वशङ्कायोगाच्च । अथ प्रमातृव्यवहितेषु तदाकारवृत्तौ तदनुगतचैतन्यप्रतिफलनमेव हि चैतन्यविषयत्वमभिमतम् । तदधीनघटादिस्फुरणस्यान्यस्याभावात् । तच्च ब्रह्मण्यपि समानम् । इदमेव हि सैद्धान्तिकं वृत्तिव्याप्यत्वं यदुत वृत्तिप्रतिफलनात्मकं भानम् । अन्यथा तदज्ञानानिवृत्तेः ।

"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्ष्यते"

इति हि सम्प्रदाय इति । नैवम् । वृत्तिव्याप्यत्वं हि वस्तुनः स्वाकारतापादनम् । तेन च प्रमातुरव्यवधानादपेताविद्यमन्यदन्यत्र चैतन्यप्रतिफलनादवभासते । स्वत एव प्रमातृसंविदव्यवहिते चाविद्याहङ्कारादौ न वृत्तिविषयत्वं तद्व्याप्यत्वमपेक्षते । स्वत एव स्वानुगतचैतन्यप्रतिफलनेनावभासोपपत्तेः । अन्यथा ज्ञानसुखादिवृत्तीनामपि वृत्त्यन्तरापेक्षायामनवस्थानात् । तत्रैवं सति सत्तामात्रसंविदात्मनि नैगमिकनिर्विशेषाकारवृत्त्या प्रमातृसंविदव्यवहिते तत्प्रतिफलनमशेषविशेषबाध एव, न त्ववभासः । उपशान्तसर्वभेदस्य तस्य स्वमहिमावभासत्वात् । येऽपि विशेषनिषेधतात्पर्येण तत्त्वमादिसामानाधिकरण्यात् संविदेकरसानन्दसत्तामात्रालम्बनामखण्डाकारामेव चरमवृत्तिमिच्छन्ति, तेषामपि तत्प्रतिफलनं न स्वरूपावभासः, वृत्त्यैवोपस्थितत्वात् । किन्तु कतकरजोन्यायेन तन्निवृत्तौ स्वयमेव । घटादिस्तु वृत्त्युपसर्गाभावे नावभासत एव, व्यवधानाद्चैतन्याच्चेति ॥

---

१. 'त्व', २. 'त्रं' स. पाठः.

सत्तासंविदोरेकत्वमात्मत्वं च ।

न चातश्चिदात्मनोऽतिरिक्ता सत्ता संवेद्यस्य संविद् वा, येन सत्तामात्रब्रह्मणि दृश्यत्वानैकान्त्यं स्यात् । स एव तु सा, लाघवाद्, विषयसंविदोऽपि सत्तयैवावभासाच्च । ननु तुच्छव्यावृत्तरूपं प्रमाणसम्बन्धार्हत्वमर्थक्रियासामर्थ्यं वा[1] सत्त्वं भावेषु भवतामपि सम्प्रतिपन्नं संविदोऽपि स्यात् । विषयभूतसत्तारूपिता वा सा सत्तयावभासताम् । गवादिज्ञानस्यापि विषयविविक्तावभासित्वात् । अन्यथा कथमिवानुभवविरुद्धो विषयोपलापो विज्ञानवादिनास्थीयेत । अपिच अस्ति घटोऽस्ति चैतन्यमस्ति ब्रह्मेत्यपर्यायेण सत्तावैशिष्ट्यमेवावबोध्यते । तथाच

स्वरूपसत्सु भावेषु सत्ता यद्यनुयायिनी ।
परमार्थोऽपि दृश्येति नानैकान्त्यमतीयते ॥

उच्यते — व्यावृत्तारोपविच्छिन्नसत्तैव सन्तो भावा उपगम्यन्ते ।

सत्ता हि सर्वभावानां सामान्यात्मेति साधितम् ।
स्वात्मना सत्तयैवातः संवित्तिरवभासते ॥

संविद्रूपं तु न व्यावर्तत इति वक्ष्यते । अपिच

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
गिरां स्वयम्प्रकाशं तज्ज्ञानं ब्रह्मेति हि स्मृतिः ॥
अस्तीत्येवोपलब्धव्य इत्येषा याजुषी श्रुतिः ।
इत्येवेति चिदात्मानं सत्तैकरसमाह नः ॥
सा[2] चानुवृत्तव्यावृत्तरूपभेदविकल्पिता ।
गौरस्तीत्याद्यपर्यायनिर्देशमभिपद्यते ॥
बुद्धिवृत्त्यविवेकेन संविद्यावृत्तिविभ्रमात् ।
संविदस्तीति सामान्यविशेषात्मविकल्पना ॥
तद्भावान्तरताभ्रान्त्या ब्रह्मास्तीति च कल्पना ।
अस्ति गौरस्ति संवित्तिरस्ति ब्रह्मेति चेदिति ॥

---

१. 'या', २. 'याला', ३. 'स' ख. पाठः.

सामानाधिकरण्यात् तु सत्तामात्रमवस्यति ।
विषयैरुपसृष्टा च सा सत्तानुगता सती ॥
तत्तत्प्रमाणवृत्तीद्धा व्यज्यते व्यञ्जयत्यपि ।
विषयोपाधिविच्छिन्ना व्यङ्ग्यत्वेन विवर्तते ॥
प्रमावृत्तिपरिच्छिन्ना व्यञ्जकत्वेन भासते ।
विषयास्कन्दिताकारा सत्ता तद्रूपवर्तिनी ॥
चैतन्यानन्यरूपापि बुद्धिवृत्त्यावभासते ।
तस्मात् संविदभिन्ना सा न दृश्या नः कथञ्चन ॥

प्रयोगश्च — सत्संवित्तिपदे अभिन्नार्थवृत्तिनी तुल्यार्थवृत्तित्वाद् घटकलशादिवत् । न चासिद्धिः । घटः सन् पटः सन् संवित् सती घटो भासते पटो भासते संविद् भासते इत्यनुभवात् । एवमपि प्रवृत्तिनिमित्तभेदेन सत्यज्ञानपदापर्यायत्वमवोचाम । अन्यथा विषयप्रकाशसंविदन्यान्यत्वे गौरवाद् भेदमाननिरासाच्च । एवञ्च सर्वात्मसत्तैकरसचैतन्यात्मनो विकल्पितविशेषांशे चैतन्यविषयत्वेऽपि न दृश्यत्वं, स्वयंभानात् । अन्यथा संवेद्यत्वे संविदो घटादिवदसंवित्त्वादिप्रसङ्गात् ॥

संवित्स्वयम्प्रकाशत्वनिर्वचनम् ।

ननु स्वसत्तयैव विषयप्रकाशत्वं संवित्त्वं, स्वाश्रयं प्रति प्रकाशमानत्वं च स्वयम्प्रकाशत्वम् । अतद्रूपत्वाच्च घटादेरसंवित्त्वादि नानुभाव्यत्वादित्युक्तम् । दुरुक्तं तु तत्, तदभावात् तदभाव इ शक्यावगमत्वात् । वेद्यत्वस्याप्यसंवित्त्वादिव्याप्तेश्च । अपिचावेद्यप्रकाशत्वमेवाज्ञानविरोधिरूपसंवित्त्वं, स्वप्रकाशत्वं चापराधीनभानत्वमात्रं लाघवात् ।

परस्यात्मनो निराश्रयविषयचिद्रूपत्वस्वयम्प्रकाशत्वोपगमेन विशेषणायोगाच्च । यथाह तान्त्रिकः — 'न चाहमर्थोऽन्याधीनप्रकाशः, स्वयम्प्रकाशत्वात् । चैतन्यस्वभावता हि स्वयम्प्रकाशते'ति । 'चिद्रूपता हि स्वयम्प्रकाशते'ति च । 'ज्ञानत्वमेव हि ज्ञानस्य स्वयम्प्रकाशत्वमि'ति श्रुतप्रकाशिकाकारश्च ।

---

१. 'नु स' ख. पाठः

न च विषयसंविदोऽन्यत् संवित्त्वादि अन्यच्च चिदात्मन इति युक्तम्। स्वभावाविशेषात्। अहं संवेद्मीत्यवभासश्च परोपाधिक इति विभावयिष्यते। तच्च वेद्यत्वे विरुध्येत। यत्तु अवेद्यत्वेऽपि खपुष्पवदसत्त्वादि प्रसज्येतेति, तत् तान्त्रिकस्य वाचाटताव्यसनमुपक्रोष्टव्यम्। भानमात्रं हि सत्त्वनिबन्धनं न पराधीनमेव, गौरवात्। न च वेद्यत्वमेव संवित्त्वादि। नापि तद्व्याप्यं, घटादावपि प्रसङ्गात्। तवापि स्वसत्तायामवेद्यत्वेऽपि संवित्त्वाद्युपगमाच्च। न च संवित्त्वादिव्यापकता वेद्यत्वस्य क्वचिदवधारिता, येन व्यापकनिवृत्त्या तन्निवर्तेत। न च संविदो वेद्यत्वे मानमस्ति। येन तत्रासंवित्त्वादिप्रसञ्जनमाभास्येत। स्वत एव हि भानमसत्त्वशङ्काविरहो वा॥

अतीतादिसंविदोऽनुमेयत्वनिरासः।

अतीतादेरनुमेयत्वमिति चेद्, न। नहि संवित्सत्तैवानुमीयते अहमन्वभूवं, स्मृतिमत्त्वात्। प्राक्कालोऽनुभवकालः स्मृतिमदुत्तरकालावधित्वात्। अयमुपलब्धिमान् हानादिमत्त्वादित्येवं परोपाधिवैशिष्ट्यांशेनैवानुमेयत्वात्। सर्वमेव हि सिद्धसत्ताकमाश्रयसम्बन्धांशेनैवानुमेयम्। अत एव न्यायिनोऽपि पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिमनुमानफलं ब्रुवते। परं तु तत्र सिद्धोऽपि साध्यधर्मो विषयीक्रियते नानुभवस्वरूपम्। अनुमितिवृत्तेरपि निर्भासकतया स्वयमवभासात्। स्मृतेरनुभवपूर्वकत्वानुमानेऽन्यत्र वा तद्घटितसाध्यके[1] प्रागनुमितेरनुभवानवभासे चानुमानस्यैवानुदयात्। न च स्मृतेर्व्यवहारस्य वा सकारणकत्वमनुमेयमर्थान्तरत्वात्। तदनुभवावभासश्च स्वत एव, हेत्वन्तरानिरूपणात्। इदानीमसन्ननुभवः कथं स्वतो भासतामिति चेद्, ननु स्मृतिवृत्त्याद्यनुभव एवास्ति तद्धेतुरन्योऽनुभव इति चेत्। तथापि यतोऽयमवभासते, तत एवान्योऽपीति वक्तव्यम्। तदा साधकान्तराभावात्, स्मृत्यनुभवतदनुभवानामन्यान्यत्वे सत्येककालत्वासम्भवाद्, भिन्नकालत्वे च साध्याधिगमकाले पक्षाद्यसिद्धेरनुमानायोगात्। साम्प्रतिकः स्मृत्यनुभवस्तदुपनीतं च स्मरणमेकज्ञाने भासेते इति चेत्, तथापि घटानुभवानुमाने कथम्।

---

[1] 'के' क. पाठः

न खलु घटस्मृत्यनुभव एव घटानुभवः, घटस्याप्यपरोक्षत्वापत्तेः । भ्रान्त-भ्रान्तिज्ञसङ्करापत्त्या परस्य तदसम्प्रतिपत्तेश्च । अतः स्मृतिसंविदेव स्वावभासा स्मृत्यनुभवः तदनुभवानुभवो वेति कथमन्यत्वे पूर्वानुभवस्य स्मृत्यनुभवैकानुभवत्वं स्यात् । अनुभवस्य स्वस्वविषयावभासकतया तदाहितसंस्कारेण स्मृत्यैव विषयवदुपस्थितौ विषयस्मृत्या तदनुमानवैयर्थ्यात् । न च स्मृतिसंविद्रूप एव स्मृत्यनुभवे स्वयमुपतिष्ठमानेऽनुभवजात्यान्यस्यैव पूर्वानुभवस्योपस्थितेरनुमानाविरोध इति वाच्यम् । संस्कारजन्यवृत्त्युपाधौ संविदः स्मृतित्वे सत्यसदनुभवत्वावभासायोगात् । न च वेद्यांशे स्मृतित्वेऽपि स्वात्मनि सर्वापि संविदनुभव एवेति वाच्यम् । नहि विषयोपाधिकं संविदः स्मृतित्वम्, अनुभवस्यापि तद्विषयत्वात् । किन्तु कारणाधीनोपजनस्वरूपमेव । संविच्च स्वस्वधर्मावभासेति स्वीकृता तव स्मृतिरूपैव भासताम् । किमंशविकल्पनया । अस्माकं तु मानवृत्त्युपाधिकानुभवत्वावभासविषयसंविदाहितसंस्कारसाधारण्येन विषयस्मृत्यैवोपस्थितानुभवस्य वैकल्पिकांशेनैवानुमितिविषयत्वोपगमादपर्यनुयोगः । नन्वेवं स्मृतिविषयत्वमेव वेद्यत्वमनुभवस्यापन्नम् । न । स्वावभासंविद एव विषयवृत्तिभेदविच्छेदमात्रावभासित्वाद्, वृत्तिभेदाविषयत्वस्यानिवार्यत्वाच्च । अनुभवस्वरूपं तु स्वयमवभासते । प्रकाशतावन्मात्रस्य तस्याभेदेनातीतत्वाद्यसिद्धेः । अतीतादिभेदस्य दृष्टिश्रुत्यादिभेदस्यान्यस्य च करणभेदाधीनवृत्तिभेदोपाधिनिबन्धनत्वोपपत्तेः ।

परस्यापि प्रकाशायुतसिद्धज्ञानवृत्तिभेदसम्प्रतिपत्तेः । परन्तु स्वतन्त्रनित्यप्रकाशाविवेकादेव तदयुतसिद्ध्युपपत्तौ तस्य पृथक् प्रकाशगुणत्वकल्पनागौरवमधिकम् । न चान्याय्योऽपि यथानुभवमर्थोऽभ्युपेयः, येन प्रकाशस्यैव स्वतो निरुक्तभेदोऽवस्थाप्येत । अतिप्रसङ्गो हि स्यात् । एवमुभयसम्प्रतिपन्नस्य स्वावसितावभासस्वभावस्याप्यात्मचैतन्यस्यैव विषयाज्ञानेन तदवभासत्वोपपत्तावतिरिक्तविषयसंविदभ्युपगमे गौरवात् । 'तमेव भान्तमनुभाति सर्वमि'त्यादिविरोधाच्च । विषयसंविदमपि भान्तीमनुभानेन तमेवेत्यवधारणासामञ्जस्यात् । अत एव प्राथमिकानुपजातविरोधावधारणविरोधात् 'तस्य भासा सर्वमिदं विभाती'ति न तद्धर्मभूतज्ञानेनेत्येवम्परम् । किन्त्ववधारणस्थितये विकल्पमात्रम् ॥

---

१. 'क' ख. पाठः.

आत्मनोऽणुपरिमाणत्वम् ।

ननु नात्मस्वभावसंविदेव विषयावभासा, असम्बद्धावभासेऽतिप्रसङ्गात् । 'एषोऽणुरात्मे'त्यादिश्रुतेरणुमात्रात्मनः शरीरादनपसृतस्याक्षद्वारा विषयसम्बन्धायोगात् । अन्यथा प्रतिविषयज्ञानमजीवनप्रसङ्गात् ॥

ज्ञानस्य जन्यत्ववादिमतनिरासः ।

अत एवात्मगुणो ज्ञानं प्रमाणादुपजायते तदेव विषयावभासीति निरस्तम् । मनस्संयोगाद्यसमवायिदेशोपजनस्य तस्य बहिर्विषयासंश्लेषात् । गुण्यात्मविभुतया तद्वारसंबन्धस्य साधारण्येन विषयानियमात् । न च तत्र जातिभेदाः कल्प्यन्ते, येन घटपटादिजातीया इव द्रवधारणमूर्तप्रावरणादिषु गोघटादिषु व्यवतिष्ठेरन् , परोक्षत्वापरोक्षत्वादिसाङ्कर्यात् । न च विषयेषु , येन वर्षादिविषयश्चर्म न वियदित्यादिवद् व्यवतिष्ठेरन् । उपन्यासे विषयशक्तिव्यवस्थानाद् , ज्ञानस्यै चावभासशक्तिसाधारण्यात् । न च तदुद्देश्योपजनत्वं व्यवस्थाहेतुः, ज्ञानोद्देश्यत्वानिरूपणात् । नहि ज्ञानमविद्यमानं स्वसाध्यतया किञ्चिदुल्लिख्य पश्चादुत्पद्यत इति सुवचम् । उद्दिष्टानुद्दिष्टसर्वसाधारणालोकेषु व्यापारादौ व्यभिचाराच्च । न च दृष्टे नियामके सम्भवत्यदृष्टात् स्वभावाद् वा विषयनियमो युक्तः । तद्विषयव्यवहारजनकतया तत्प्रमाणजन्यतया वा ज्ञानस्य तद्विषयत्वनियम इति चेद् , न । तद्विषयत्वातिरिक्तनिरुक्तजन्यजनकतावच्छेदकापरिचयात् । अथ स्वरूपसतैवोदीरितजन्यत्वादिना धीविषयनियमो न ज्ञातेन, येन तदवच्छेदकपरिचयापेक्षायां तद्विषयत्वातिरिक्तानिरूपणादन्योन्याश्रयः स्यात् । अनन्तरं च स सत्रेव यथायोगं परिच्छिद्येतेति चेत् । एवमपि साधनादिव्यवहारजनकफलादिज्ञानस्य तद्विषयत्वप्रसङ्गः । ज्ञानाद्वारकव्यवहारजनकत्वमिति चेत् । हानादिधीद्वारा तज्जनकघटादिसविकल्पस्यातद्विषयत्वप्रसङ्गः । गङ्गायां घोष इत्यादौ च शब्दस्य

---

१. 'रा', २. 'त्रि', ३. 'स्याव', ४. 'ष्ट', ५. 'दौ श', ख. पाठः.

तीरमात्रवृत्ततया शाब्दबोधो गङ्गासम्बन्धादिविषयो न स्यात्, तत्प्रमाणाजन्यत्वात् । अपिचैवं विशेषणतासम्बन्धस्याभावप्रमाणतोपगमात् तज्जन्यज्ञानस्य प्रतियोग्याद्यविषयत्वप्रसङ्गः । अपिच तत्प्रमाणत्वं तद्विषयप्रमाकरणतातिरिक्तं ज्ञानाज्ञानसाधारणं दुर्वचमिति तज्जन्यत्वेन ज्ञानस्य तद्विषयत्वनियमपरिच्छेदमपीच्छत इतरेतराश्रयत्वम् । तदिन्द्रियसंयोगेत्यादिविवक्षायामननुगमात् ॥

नित्यात्मसंविदो विषयावभासकत्वाक्षेपः ।

नित्यात्मसंविदा च विषयस्य सहजसम्भेदे नित्यावभासप्रसङ्गः । विषयोपाधिव्यवहितसंविद आवृतत्वान्नैवमिति चेद्, नित्यानवभासप्रसङ्गः । बुद्धिवृत्त्या तदावरणभङ्गे च बुध्यते जानाति संवेत्तीत्यनर्थान्तरत्वाद् विषयावभासात्मना बुद्धिसंविद्विकासावस्थयैवोपपत्तावितरवैयर्थ्यात् । अपिच, कयापि बुद्धिवृत्त्यावरणभङ्गे सर्वविषयावभासः स्यात् । तद्विषयवृत्त्या तदावरणभङ्ग इति चेत् । किं पुनस्तद्विषयत्वं वृत्तेरिति वक्तव्यम् । तदवभासत्वं तवानिष्टम्, असंवित्त्वात् । विषयसम्भिन्नसंविदभिव्यञ्जकत्वमिति चेत् । न । आवरणभङ्गातिरिक्ताभिव्यक्त्यनिरूपणात्, तेनैव तन्नियमे चात्माश्रयात् । किंविषयसंविदं का वृत्तिरभिव्यनक्त्वित्यनियमाच्च । तदाकारत्वमिति चेत् । न । किमाकारा का वृत्तिरित्यनिरूपणात् । किञ्च नालोकादेरेव विषयतुल्यसन्निवेशविभाव्यत्वं तदाकारत्वं, गन्धरसादौ सन्निवेशविशेषाभावात् । गोर्गोत्वं शुक्लस्य शुक्लत्वमित्यादिराकारश्च न स्वतोऽन्यतो वा बुद्धिवृत्तेरुपपद्यते, वैजात्यात् । आहुश्च —'अनाकारामेव बुद्धिमनुमिमीमहे' इति । तत्प्रकाशकचैतन्यप्रतिबिम्बोपाधित्वं तदाकारत्वमिति चेद्, न । किंवृत्तिप्रतिबिम्बितचैतन्यं कस्यावभासकमित्यनियमात् । तदाकारवृत्तिप्रतिबिम्बितं चेद्, अन्योन्याश्रयात् । तद्वृषितावभासत्वं तदिति चेद्, किंरूपिता कावभासतामिति नियमाभावात्, प्रमाणस्य वृत्तिस्वरूपोपजनोपक्षयात् ॥

---

१. 'तृ, प्र' मा, २. 'व्यक्तिर' ख. पाठः.

धर्मभूतज्ञानस्य विषयावभासकत्वम् ।

तस्मात् प्रभेव दीपस्यात्मनो धर्मो ज्ञानं सङ्कोचविकासशीलमुपेतव्यम् । न चाणुत्वे विभुत्वे वा तस्य तदनुपपत्तिः । मध्यमपरिमाणस्य च सोपादानत्वे सत्यण्वात्मोपादेयत्वायोगाद् अन्योपादेयं तदनात्मधर्मः स्यादिति वाच्यम् । सर्वगतस्यैव ज्ञानस्य विषयावभासतातदभावावस्थाभेदोपपत्तेः । न च विभुत्वे धर्मत्वानुपपत्तिः, 'अहं संवेद्मि', 'सर्वं ह सर्वः पश्यति', 'विज्ञातारमि'ति चानुभवादिना अपृथक्सिद्धविशेषणतयैवात्मधर्मत्वे विभुत्वादेरतन्त्रत्वात् । अन्यस्य च द्रव्यगुणादिसाधारणधर्मत्वप्रयोजकस्य दुर्वचत्वात् । तत् तु संसारे करणाधीनविषयावभासविकासं भवति । मुक्तौ च यावत्कर्मावरणभङ्गे परमात्मयोगधर्मेण सर्वविषयावभासविकासमिति विशेषः । नहि विषयावभासतातिरिक्तो ज्ञानस्य विकासो नाम, येन तत्स्वरूपोपजनोपक्षीणे माने कस्य को विषयः स्यादिति परं नियामकमपेक्ष्येत । सा च ज्ञानस्यावस्थान्तरमिति ज्ञानस्य मानजन्यत्वव्यवहारः । अत एव 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुतिरुपपन्ना, सङ्कोचविकासावस्थानामन्यान्यत्वेऽपि ज्ञानस्वरूपनित्यत्वानपायादिति ॥

धर्मभूतज्ञानस्य संकोचविकासानुपपत्तिः ।

अत्राभिधीयते — कोऽर्थो नित्यस्यैव ज्ञानस्य विषयावभासतादिकास इति । नहि तस्य धर्मो विषयप्रकाशो जायते, स्वाश्रयोपाधौ प्रकाशगुणस्याजन्यत्वात् । आलोकादिना सहैव शुक्लभास्वररूपमयस्यापि प्रकाशस्योदयोपगमात् । 'उत्पन्नं द्रव्यं क्षणमगुणमि'ति परिभाषामात्रत्वात् । नापि विषयव्यापिता, ज्ञानजन्माद्यनुभवानाञ्जस्यात् । आन्ध्यसावयवत्वानित्यत्वपरिहाराय स्वत एव व्यापित्वस्योपेयत्वाच्च । अतीतादिपरोक्षविषयव्याप्त्यनुपपत्तेश्च । ज्ञानस्यावस्थान्तरपरिणामो विषयावभासतेति चेत् । न । मुक्तावपि सर्वविषयावस्थान्तरपरिणामोपजने परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते नागन्तुनेति न्यायविरोधात् । परिणामिनो नित्यत्वव्याघातादवस्तुत्वाच्च ।

"यच्चान्यथात्वं द्विज! याति भूयो न तत् तथा तस्य कुतो हि तत्त्वम्"

इत्यादिस्मृतेः । ततश्च नित्यत्वाभ्युपगमविरोधः । तथाच सूत्रं 'न च पर्यायाद-प्यविरोधो विकारादिभ्यः' (ब्र० २. २. ३९) इति । अथ सर्वविषयावभास-स्वभावस्य कर्माविद्यावरणं संङ्कोचः । तद्वरणभङ्गश्च विषयावभासविकास इत्यु-च्येत, विद्यादेरिवाक्षसन्निकर्षादेरपि तत्र शक्तिरमाना कल्प्येत । अपिचैवमा-त्मस्वरूपज्ञानमेव सङ्कोचविकासशीलमस्तु, तवावस्थाभेदपरिवृत्तावपि नित्य-त्वानपवादात् । 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इत्यादि च शक्त्यवशे-षाभावनिषेधपरमस्तु अभ्युपगमला वात् । तत एव ज्ञातृत्वाद्युपदेशोपप-त्तेश्च । मुक्तावप्यात्मन एव सर्वावभासताविकासावस्थोपपत्तेरिति ॥

V.S. GOPALASWAMI
VIRAVANA

आत्माणुत्वभङ्गः ।

यत्तु पर आह — अङ्गारादर्चिष इव नवनीतपिण्डाद् घृतमिवाणो-रेवात्मनो विभज्यमानाः संविदो विषयावभासाः कारकाधीना इति न नित्यो-पलब्ध्यादिप्रसङ्ग इति । तन्न । अङ्गारो हि सावयवोऽंशेन विभज्यते । नव-नीतं चांशेन विलीनं विभज्येत । आत्मा तु निरवयवोऽणुमात्रः कथमंशेन विभज्येत । विभज्यमानो वांशो यदि खण्डेतं इन्दुमुपसर्पेत्, त्रिचतुरपर्या-यैरात्मापचितोऽभावमापद्येत, विषयश्चात्मनो न भासेत । अथाखण्डितः स चेन्न सङ्कुचति, आत्मा बहिरपकृष्येत, विषयान्तरं च न भासेत । अथ विशिष्टस्यैकदेशोंऽशः स च सङ्कोचविकासशीलो धर्म आत्मन इत्युच्येत, पूर्व-पक्षादविशेष इति ।

वयं तु पश्यामः — न तावदणुरात्मा 'स वा एष महानज आत्मे'-त्यादिश्रुतेः । यथा 'बुद्धेरात्मा महान् परः' इत्यात्मसामानाधिकरण्यान्न साङ्ख्यीयं महत्तत्त्वं गृह्यते, एवं 'महतः परमव्यक्तमि'ति न प्रधानमिति तवापि 'महद्वच्च' (ब्र० १. ४. ७) इति सूत्रे विवक्षितत्वात् । न च मह-त्त्वमिह प्राधान्यमुच्यते, पर इत्येव तदुत्कर्षस्यापि लाभात् । अणुत्वविरो-धिस्वरूपपरत्वे महच्छब्दमुख्यार्थविशेषलाभोपपत्तेः । यद्यपि रथिरूपकविन्य-स्तो जीव इहावभृश्यते 'बुद्धेरात्मे'ति, तथापि स्वरूपविशेषणमस्य महानि-

१. 'त्मा', २. 'तं दन्दम्' ख. पाठः.

त्यध्वपौरातिरेको मा शङ्कीति । नहि जीवो नाम ब्रह्मणोऽतिरिच्यते । 'तत् त्वमसी'त्यादिश्रुतेः, सत्तात्मकत्वाच्च । तथाच गुणमुख्यव्यतिक्रमे तदर्थत्वाद् एषोऽणुरात्मान्याय्यकल्पनया नेतव्यः, यथा ज्यायानेभ्यो लोकेभ्यः परमात्मा अर्णीयान् व्रीहेर्वा यवाद् वा निचाय्यतया परोपाधिना नीयते, तद्वत् । अन्यथा 'एषोऽणुरात्मा', 'आराग्रमात्रो ह्यवरोऽपि दृष्टः',

"वालाग्रशतभागस्य शतधा कल्पितस्य यः ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥"

'अङ्गुष्ठमात्रो रवितुल्यरूपः', 'स एष इह प्रविष्ट आनखाग्रेभ्यः', 'एष प्राज्ञ आत्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यः', 'अस्य सोम्य! महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेत् ..... स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठत्यस्य यदैकां शाखां जीवो जहाती'त्यादिपरिमाणविप्रतिषेधस्यासमाधेयत्वात् । नहि स्वाभाविकेऽणुत्वे महत्त्वादि शक्योपपादम् । नं च सर्वस्याप्यात्मोपग्रहाविशेषे स्वरूपेणाणुत्वं, हृदयद्वारकमङ्गुष्ठमात्रत्वं, स्वधर्मद्वारकमपरमिति व्यवस्थापयितुं शक्यं, स्वारस्यहानात् । हृदयस्यात्मापृथक्सिद्धविशेषणत्वं मानाभावेन ज्ञानधर्मत्वे च तद्वाराङ्गुष्ठमात्रत्वाद्ययोगाच्च । महत्त्वे तु स्वाभाविके कयाचित् कल्पनया सर्वं सूपपादम् । महत्त्वं ह्यात्मनस्त्रिविधपरिच्छेदविरोधिस्वरूपं सर्वव्याप्त्यनुरूपं, न परिमाणभेदः । 'अस्थूलमनण्वि'त्यादिनिषेधात् ॥

अणुत्वश्रुत्युपपत्तिः ।

तदस्य 'यदणुभ्योऽणु च', 'अणीयान् ह्यतर्क्यमणुप्रमाणादि'त्यादौ निरवधिपरमाणोरप्यणुपरिमाणावगमायोगादणुत्वमनन्तरावाह्यत्वे सति सर्वान्तरतारूपमुच्यते । सलिलानलानिलनभसां सौक्ष्म्येतारतम्येन व्यासितारतम्योपलम्भात् । आत्मा तु सर्वात्मा परमसूक्ष्म इति 'एषोऽणुरात्मा चेतसा वेदितव्यः' इति । एवमाराग्रशब्दिततोत्रप्रोतलोहशलाकाग्रोपमितत्वं वाला-

---

१. 'प' क. पाठः. २. 'ननु च' ख. पाठः.

अशततमभागशततमभागोपमितत्वं च न परिमाणतः, परस्परविरोधात्, तत्रैवाङ्गुष्ठमात्रत्वविरोधाच्च । किन्त्वौपाधिकाल्पत्वमात्रोपलक्षणम् । एकत्र 'बुद्धेर्गुणेने'ति परत्र 'जीव' इत्येवान्यत्र 'सङ्कल्पाहङ्कारसमन्वितो यः' इति चोपाधेरुपादानात् ॥

स चानन्त्याय कल्पते इतिश्रुत्यर्थः ।

अत एव विरोधादणुत्वेऽनवस्थिते स चाविद्यया प्रागल्पीभूतः सन्नानन्त्याय 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतानन्तब्रह्मभावाय 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुताय कल्पते विद्ययेत्युच्यते । एतेनानन्तब्रह्मैक्यमशब्दार्थः आरोग्याय कल्पत इत्यत्रान्यारोगैक्यवत् । नित्यस्य च विलयनेन घृतादिवत् प्रसर्पणमयुक्तम् । सङ्कुचितपटस्येव वितायनं चाप्रामाणिकमित्यनन्यगत्या ज्ञानद्वारकमानन्त्यमिति तान्त्रिकस्य प्रलापः । आनन्त्यमात्मनः स्वभाव इत्युक्तगत्यानन्त्याय कल्पत इत्यनन्तरायोपपत्तौ व्यवधिकूँसेरन्याय्यत्वात् ॥

अङ्गुष्ठमात्रत्वाद्युपपत्तिः ।

स चायं जीवोपाधिर्बुद्धिसत्त्वं सङ्कोचविकासशीलमवस्थाभेदेनाग्निरिवायःपिण्डमखिलमङ्गमभिव्याप्नुवदविद्यास्कन्दितमात्मानमवगृह्णातीति स लिङ्गमयो जीवः प्राणानां धारको बोद्धादिरूपः शरीरमात्रो भवति । हृदयायतनावच्छिन्नबुद्धिपरिच्छेदेनाङ्गुष्ठमात्र उच्यते । 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' (ब्र० १. ३. २५) इति च सूत्रम् । केशसहस्रतमभागसम्मितसिरासरणार्हातिसङ्कुचितबुद्धिसंवलनेन चाराग्रमात्र इति । अविद्या तु जीवस्य परम उपाधिरिति तदनुवृत्त्या सर्वानुगतोऽपि स शक्तिवृत्तिभ्यामापीतेरनुवर्तमानबुद्धिसत्त्वादविविक्तवृत्तितया विच्छिद्यत इत्यबुद्धं बुभुत्सतेऽलब्धं च लिप्सते । न च 'एष आत्मा निष्क्रामती'ति केवलात्मनो निष्क्रमणमुच्यते

---

१. 'ब्रौं', २. 'चायवि', ३. 'करसे' ४. 'त्त्वावि' ख. पाठः.

येन तेन स्वाभाविकमणुत्वमाक्षिप्येत । 'एकीभवति न पश्यतीत्याहुरि'त्यादिप्रकृतसम्पिण्डितकरणैक्यापन्नमेव ह्यवमृशत्येष इति । न च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'ति व्यतिरेकवचनमपि 'स समानः सन्नुभौ लोकावनुसञ्चरती'ति प्रकृतविज्ञानोपाधिकात्मनोऽवमर्शमुपरुन्धे, अनन्तरप्रकृतकरणैक्यापन्नस्यैव वा 'कस्मिन् न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामी'ति परोपाधिकत्वश्रुतिविरोधात् । किन्त्वभिषेणयन्तं राजानं परिजनोऽन्वभिषेणयतीतिवत् प्राधान्यविवक्षाभेदेनावयुत्यानुवादमात्रं 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामती'ति । लक्षणार्थो वा शता भविष्यति । तेन सकृत् सलिङ्गस्यैवोत्क्रमणं गंस्यते । एतेन गत्यागती च व्याख्याते ।

अन्यथा 'सर्वमाप्नोति सर्वशः', 'स इदं सर्वं भवती'ति मुक्तौ सर्वात्मत्ववचनं, 'येन सर्वमिदं ततमि'ति स्वरूपेण सर्वव्याप्तिवचनं,

"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः"

"पुमान् सर्वगतो व्यापी आकाशवदसंयुतः ।
कुतः कुत्र क्व गन्तासीत्येतत् स्यादर्थवत् कथम् ॥
सोऽहं न गन्ता नागन्ता नैकदेशनिकेतनः ।"

(विष्णुपु० अं० २. अ० १५. श्लो० २४, २५)

इत्यादिचलनगत्यागतिविरहवचनं च वञ्चनपरमापद्येत । अल्पत्वेनात्मा घटादिवदनित्यश्च प्रसज्येत, 'अथ यदल्पं तन्मर्त्यमि'ति श्रुतेः ।

अपिचैवं मुक्तव्यूढकाया निरात्मानः प्रसज्येरन् । तत्र च 'प्रदीपवदावेशस्तथाहि दर्शयति' (ब्र०. ४. ४. १५) इति विरुध्येत । अथ प्रभयेव दीपस्य विषयेषु ज्ञानेनात्मनोऽपि कायेष्वहमभिमानानुगुणस्वसङ्कल्पादावेशः स्यात्, किमतः । नह्येवं तस्य तत् । कुतो भोगः स्यात् । मित्रस्याहमभिमानानुगुणज्ञानव्याप्तावपि मित्रके हिताहितातिहानार्थस्पन्दादृष्टेः । प्रदीपदृष्टान्तवैरूप्याच्च । न च स्वरूपस्यैकदेशस्थत्वेऽपि धर्मस्य प्रदेशान्तरे कार्यकर-

त्वमात्रं दृष्टान्तोपजीव्यमिति युक्तम् । एवं[1] हि कथमनेकशरीरेष्वेकस्याणोरात्मनोऽहमित्यनुभव इति चोद्यपरिहारे यत्नान्तरमन्विष्येत । तस्मादस्मितालक्षणाहमात्मन एवैकस्याविद्यकस्यानुगतस्य *निर्माणचित्तभेदानुषङ्गेण नानादेहेष्वहमित्यावेशः प्रदीपस्यैकस्यैव स्नेहदशाभेदेष्विव स्वरूपावेश इति युक्तम् ।

अपिचैवं सर्वाङ्गीणशैत्याद्यनुपलम्भप्रसङ्गः । न च आ नखाग्राद् आ च केशान्तादात्मधर्मो ज्ञानमहमभिमानात्मकविकासमुपेतमपि विषयविकासावस्थान्तरमापद्यत इति क्षममुत्प्रेक्षितुम् । पिण्डघटादिषु प्रागवस्थाविरोधिनो हि परावस्था दृश्यत इति आत्मधर्मस्य ज्ञानस्य नानावस्थाभेदिनोऽसम्भवाच्च । अपिचैवमात्मनो न विषयः प्रकाशेत, व्यवधानात् । ननु विषयप्रकाशं ज्ञानमात्मनो धर्मः । ततः किं, सम्पश्योऽपि हि जात्यन्धस्य बन्धुः । सम्बन्धि च तद् विषयस्यापीति स्वस्यापि विषयः प्रकाशेत । आत्मापि हि तव स्वद्योतवदात्मावसितद्योत उपेयते । कथं चासावणुमात्र एव सन् विपुलविषयप्रकाशं विचक्षीत । लक्षिते वा तेनैव सविषयविज्ञानवृत्तिभेदे किं तत्त्वयम्प्रकाशत्वोपगमेन ।

तस्मात् प्रकाशसत्तामात्रात्मसंविदविद्यादेरान्त्यात् कार्यात् तादात्म्येन सर्वविषयानुगतापि न विषयप्रकाशात्मा प्रमातुरवभासते । तत्र यद्यपि न प्रकाशः स्वं प्रत्येवावृतः, जगदान्ध्यप्रसङ्गात् । नहि व्यवहितालोकेन गवादिसिद्धिः । नापि विषयं प्रति । किं हि तदनावरणेऽपि विषयस्य जडस्य स्यात् । नापि चेतनं प्रति । तस्यैव प्रकाशसत्तामात्रसंविदेकरसत्वोपगमात् । तस्यैव तं प्रत्यावरणे चात्मानमपि न चेतयेत । तथाप्यविद्यकानेकविधविषयोपधानभेदेन भिद्यमानात्मसंवित् 'तन्मनोऽकुरुतात्मन्वी स्यामि'ति श्रुतमनोबुद्धिपर्यायान्तःकरणोपाधिसम्भेदापादितप्रमातृभावा बुद्धिवृत्त्यनास्कन्दितविषयसंविदो व्यवधत्त इवेति प्रमातुरात्मनो विषयो न प्रकाशीभवति, निर्विशेषसत्तामात्रसंविदात्मकं च स्वरूपमविद्यादिनानोपाधिकलुषावभासत्वात् । यद्यपि विषयात्मसंविदो विषय इव निर्विशेषस्वरूपसंविदो न प्रमातृविच्छेदोपाधिरतिरिच्यते, तथापि प्रमात्रुपाधिरेव स्वसः

१. 'वं क' ख. पाठः.

* 'निर्माणचित्तान्यस्मितामात्रात् । प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्' (पा० ४. सू० ४. ५) इति पातञ्जलयोगसूत्रम् ।

म्भिन्नवृत्तिसंविदो विच्छेदावभासनिमित्तं भवतीति संविदात्मानमपि विच्छिन्त इव वर्तमानत्वाद्युपाधिभेद इव कालमित्युपपन्नम्। तस्य च देहेन्द्रियादिष्वहम्ममाभिमानवतः प्रमातुः प्रत्यक्षादिप्रवृत्तौ विषयाकारा प्रमावृत्तिरुपजायते, यत्रेदमाम्नायते 'दर्शनाय चक्षुः', 'गन्धाय घ्राणमि'त्यादि। न च मानाधीनोपजनन्य प्रमावृत्तिपरिणामस्य सतो विषयाकारता, येन तन्नियामकमपरमपेक्ष्येत। सत्येव तु बुद्धिर्मानतो विषयाकारविकारा सम्पद्यते। तदाकारत्वं च निरूप्यतायां तदविनाभाविरूपभेद इति नोक्तदोषः। इच्छादेरपि तदाकारतातिरिक्ततद्विषयत्वानिरूपणात्। तदुपाधिकश्च दृगात्मा 'ध्यायतीवे'त्यादिश्रुतेः प्रत्ययानुपश्यतया विषयाकारवृत्त्यवभासस्तदाकारतयैव विषयमवभासयति। तमिमं दौवारिकविषयसामान्यावभासमभिप्रेत्य प्राचां परोक्षे सुप्तिव्यावृत्तिमात्रं क्रियत इति व्यवहारः। अपरोक्षे तु बुद्धिसत्त्वस्य जालकालोकवदक्षद्वारा विषयव्याप्तौ तदेकोपाधितया विषयात्मसंविदपि प्रमातृसंविदे वेति तत्तादात्म्याद् वृत्तिरिव विषयोऽपि सामान्यतो विशेषतश्चावभासते। तथाच श्रुतिः 'प्रज्ञया वाचं समारुह्य सर्वाणि नामान्याप्नोति', 'प्रज्ञया चक्षुः समारुह्य सर्वाणि रूपाण्याप्नोती'त्याद्या। अत एव बुद्धिसुखादीनां स्वभावादेव प्रमातृसंविदव्यवधाने योग्यत्वे च तदाकारवृत्तिमनपेक्ष्यावभासात् परस्य स्वप्रकाशज्ञानरूपत्वविभ्रमः। न चैवं घटवृत्तौ गन्धादेरपरोक्षत्वप्रसङ्गः, तत एव प्रमातृसंविदभिन्नघटसंविदव्यवधानात्। तदाकारवृत्त्युपधानापेक्षायां बुद्धिसुखाकारवृत्त्यन्तरापेक्षयानवस्थेति वाच्यम्। प्रमात्रव्यवहितसत्ताकस्य सर्वस्यैव तत्तदाकारवृत्त्यपेक्षयैवापरोक्षत्वाद्, बुद्ध्यादेस्तु सत्तयैव प्रमातृसंविदव्यवधानात् तेनैव सामान्यप्रयोजकेनापरोक्षत्वम्। आकाशश्च नीरूपोऽपि स्वाकारचाक्षुषवृत्त्यैवापरोक्ष इत्युपलब्धिव्यवस्थाप्यम्। अथवा स नापरोक्षः। **अप्रत्यक्षेऽपि ह्याकाशे**' इति ह्युक्तं भाष्ये। अपरोक्षालोकाद्यभेदवृत्तितया त्वपरोक्षावभासत्वविभ्रम इति।

यत्तु — बुद्ध्यादेरपि तदाकारवृत्त्युपधानादेवापरोक्षता। न चानवस्था, अवश्यज्ञेयत्वाभावात्। न चैवं ज्ञानधाराद्यननुसन्धानप्रसङ्गः, अर्थस्मरणादिना तदनुमानात्। यथाहुः —

"वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः।
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्॥"

इति।

तन्न । यदि हि विषयमात्रं स्मर्येत, प्रहरादिकालाकलितज्ञानधारा नानुसन्धीयेत । न च ज्ञानधारामनन्तर्भाव्य विषयस्य तावत्कालावच्छिन्नत्वं शक्यस्मरणं, येन तावत्कालावच्छिन्नज्ञानमनुमीयेत । अत एवानुभवकालादौ स्मृतिकालावधिकातीतत्ववद् विषयसंस्कारसामर्थ्यादेव धारायां अनुसन्धानं स्यादिति निरस्तम् । प्रकारान्तरसम्भवेऽनुभवेऽसत्यनवभातबहुविषयशक्ति-कल्पनायोगात् । तस्मात् प्रागनुभूतैव ज्ञानधारानुसन्धीयत इति युक्तम् । वृत्तयस्त्विति तु *समाधौ ध्यानमर्थमात्रनिर्भासन्यग्भूतं स्वरूपशून्यमिव भवतीति प्रागनुभूताया अपि ध्यानरूपवृत्तिसन्ततेः प्राधान्येन स्वरूपानुमा-नपरं व्याख्येयम् । तावदनुभूतध्येयेतराज्ञानस्मरणलिङ्गात् । तदनुभवश्च न धाराविरामसमये । नहि पक्ष्मपरिस्पन्दादिरक्षसान्निकर्षसमयापवर्गी सन्ननन्तर-मध्यक्ष्यत इत्येतावता यामादिव्यवहितकालातीतधाराद्यादिवृत्तिप्रत्यक्षं शक्यो-त्प्रेक्षम् । न वा लवादिकालोपाधिक्रियाभेदोऽध्यक्ष्यते, अध्यक्षस्य स्वपरिचि-तसमयसम्बन्धिरूपवर्तमानविषयत्वात् । सहैव वा प्रमावृत्तिरिन्द्रियरश्मिभिः प्रवृत्ता विषयेण सम्बध्यताम् । तद्धेतुरिन्द्रियसान्निकर्षस्तु तदव्यवधानेन यो-ग्यविषयमात्रमेवेन्द्रियरश्मिसम्बन्धेऽपि, तस्य नियामकत्वात् । ततश्च क्रि-याभेदोऽपि तत्काल एवाध्यक्ष्यताम् । अथैवं तत्तत्स्थितिसमयभवानुव्यवसा-यवृत्तिधाराप्यनुवर्ततां । विनश्यन्तीं च पूर्वपूर्वव्यवसायवृत्तिमन्वारभ्यैवोत्त-रोत्तरोत्पादेन तद्धारानन्तरायादिति । नैवम् । बुभुत्सितग्राह्यत्वे विजातीयबुभु-त्सान्तरायाद्, अन्यथा चाप्रामाणिकानन्ततद्वृत्तिधारावलिकल्पनाप्रसङ्गात् । तस्मात् स्वोपधेयसंविदवभास्या एव वृत्तयः । एवं सति परोक्षार्थसिद्धिरुप-पन्ना । स हि वृत्त्याकारतया तदुपधेयसंविदवभास्य इति । अत एवेतावन्तं कालमुपाध्यायनिकटमध्यासीन उच्चैरधीयानस्तन्मुखमवलोकयन्नेवासीति च तत्तद्विषयरूपितज्ञानानामनुगतसाक्षिणानुभूतत्वात् तत्तत्संस्कारमेलकेन जाय-मानं स्मरणं तावद्विषयमेकमुत्पद्यते । न चामी प्रागननुभूता विषयाः परतो-ऽनुमीयन्ते मानाभावादित्यास्तां तावत् ।

एवं विषयप्रकाशोपाधिवृत्तिकादाचित्कतया तदुपजनापायावभासा संवि-दपि तथा विभाव्यते । प्रकाशस्य ह्येष स्वभावो यत् प्रकाश्यरूपावभास-

* 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' (पा० ३. सू० ३) इति पातञ्जलयोगसूत्रम् ।

त्वम् । यथा रक्तमवभासयन्नालोको रक्तो भासते, शुक्लं शुक्लो, वृत्तं वृत्तो, वक्रं वक्र इत्यनुभवात् । परस्य तु संविदुत्पादविनाशानुभवो न तावत् तयैव, पूर्वापरावध्योः स्वरूपविषयबाह्यत्वात् । संविदन्तरं च नात्मैव, तस्य स्वावसितावभासत्वोपगमात् । आत्मधर्मज्ञानस्य च विषयाकारविकासे सति तदैव तदुदयाद्याकारविकासायोगात् । अन्यदा च तदाद्यक्षणसम्बन्धरूपोदयस्यासत्त्वात् । योग्यानुपलब्ध्यापि ह्यभावमात्रं सिध्यति, साधारण्यात् । नोदयादिः प्रागभावादिर्वा । स्वरूपसामग्रीसमवहितानुपलब्धिः प्रागभावं साधयति, उपलब्धोपलब्धिसामग्रीसमवहिता च प्रध्वंसमिति चेद्, न । तव लिङ्गत्वमतानुपलब्धौ तत्सामग्रीसमवधानस्य दुर्ज्ञानत्वात् ।

अपिच सा यदि संविन्मात्रस्य प्रागभावादि साधयेत्, का पुनः प्रागभावादेरपि सिद्धिः स्यात् । अथ विषयसंविदः, नहि संविदो विषयोपरागविच्छेदादृते विषयसंविदिति काचिदेका संविदस्ति । एकयैवोपपत्तावतिरेके मानाभावात् । इतरथा तयैव ज्ञातृत्वान्यथासिद्धेरात्मनो नित्यज्ञानाभ्युपगमविरोधात् । एवञ्च संविद्रूपानुवृत्तौ विषयसंश्लेषाभावेनार्थान्तरत्वम् । स च क्वचिद् विषयस्यैवाभावात्, तदुपरञ्जकवृत्त्यभावाद् वा । तथाच श्रुतिः 'यद् वतन्न पश्यति पश्यन् वैतन्न पश्यति', 'नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति दर्शनादिवृत्त्यनुगतसंविन्नित्यत्वमाम्नाय विषयानवभासस्तु तद्भावनिबन्धन इत्याह 'नतु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येदि'त्याद्या । तथा वृत्त्यभावेऽपि विषयावभासाभावं दर्शयति 'अन्यत्र मे मनोऽभूदित्याह', 'नाहमेतन्नाम प्राज्ञासिषमि'त्याद्या । नह्यत्रात्मधर्मो ज्ञानं मनश्शब्दमप्रसिद्धेः । 'मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' इत्यत्रापि ब्राह्मलौकिकस्य त्वालिङ्गत्वोपगमात् । मनसोऽन्यत्र भावश्च प्रकृतविषयवृत्त्यभावोऽन्यविषयवृत्तिर्वेति । अन्यथा प्रागभावादिसाधकसंविदन्तरविषयत्वे संविदः स्वयम्प्रकाशत्वव्याघातः । अस्माकं तु स्वसिद्धामेव संविदमालम्ब्य प्रागभावादिनिरासो विकल्प्यत इति वैषम्यम् । स्वसत्तायामेव स्वप्रकाशत्वमिति तु न विशेषयितुं शक्यम्, अद्यापि संविदनित्यत्वासिद्धेरव्यावर्तकत्वात्, संवित्त्वेन व्यतिरेकिणा नित्यत्वानुमानाच्च ।

---

१. 'स्य-म' ख. पाठः,

अपिच गजादिज्ञानस्य योग्यानुपलब्ध्या कथमभावोऽनुभीयेत । यावद्विषयविज्ञानाभावरूपस्वापप्रतिसन्धानात्मा हि सा परस्य न सम्भवतीत्यनन्तरमेव वक्ष्यते । तत्कालघटादिज्ञानप्रतिसन्धानमात्रात्मा च सा न तदभावप्रयोजिका । प्रागुभयानुभवेऽप्यन्यतरप्रतिसन्धानोपपत्तेः, संस्कारोद्बोधस्य नियामकत्वात् । अत एव न प्रतिसन्धीयमानघटादिज्ञानमपि लिङ्गम्, अहं प्रागज्ञातगजः, तत्काले घटादिज्ञानत्वादिति । अप्रयोजकत्वाद्, घटादिमात्रानुभववत्त्वं वा तदनुभवमात्रवत्त्वं वा दुर्ज्ञानं, प्रकृतसाध्यगर्भत्वात् । अस्माकं तु तत्कालगजाज्ञानादिप्रतिसन्धानात् तदात्मैव तज्ज्ञानाभावानुभवो नानुपपन्न इति ।

यत्तु — सैव संवित् तत्कालपरिच्छिन्नावभासा स्वाभावं गमयति, अन्यथा घटाद्यवभासादिकादाचित्कत्वानुपपत्तिरित्यादि । तच्च । संविदः स्वैस्वविषयबहिर्भूतकालपरिच्छेदानवभासित्वाद्, अन्यथा घटादेरपि तदवभासे प्रत्यक्षत एव क्षणिकत्वापत्तेः । अपिच कालपरिच्छेदावभासो यदि तत्कालसत्त्वमात्रावभासः । नान्यदा तदभावसिद्धिः । कालान्तरसत्त्वेऽप्ययं घट इत्यवभासवदविरोधात् । तत्कालमात्रसत्त्वावभासत्वं तु न सम्भवति कालान्तरासत्त्वस्य ज्ञानावस्थाभेदस्यान्यस्य वा स्वरूपविषयबहिर्भावादित्युक्तम् । तथाभूतस्यापि विषयत्वेऽतिप्रसङ्गात् । अन्यदा स्वस्वविषयानवभासानुपपत्त्या तदभावासिद्धिरिति चेत् । तदनवभासो हि तव तत्तत्संविदभाव एव । तत्सिद्धौ तदसिद्धौ च किं तदनुपपत्त्या । तत्सिद्धिश्च न स्वतोऽन्यतो वेत्युक्तम् । इदानीमेवेदमहं वेदेति चानुभूतानुसंहिताज्ञानानुविद्धावभासमात्रं, न तु सैव संवित् प्रागज्ञानमवभासयति । भावरूपाज्ञानं हि सविषयं तदुपहितसंविदैवानुभूतमनुसन्धीयते । यद्युच्येत — घटादिसंवित् स्वयं सिध्यन्ती पटादिसंविदमपेक्ष्य तदभावः सिध्यतीति, तर्हि तदा पटसंविदेवास्तीति कथं तदभावः सिध्यतु, विना विषयोपाधि संविद्रूपभेदानाकलनाच्च । एवं सति प्रत्यक्षसंवेदनस्य नित्यत्वे विषयनित्यत्वप्रसङ्गेन तान्त्रिकस्य निर्मूलस्वसमयाचाराडम्बरं विडम्बयति, संविद्भेदविषयत्वादिविभ्रममूलत्वात् । नहि घटसंवित् पटसंविदः स्वतो भिद्यते संवित्त्वाद्, अनुपाधिपरामर्शमविभाव्यमान-

---

१. 'नोपपन्नोप', २. 'स्वीय', ३. 'पि का', ४. 'लस', ५. 'दवि', ६. 'प' ख. पाठः.

भेदत्वाद् वा पटसंविदिव । सामान्यतो घटमणिकाद्याकाशवद्वा । इच्छादेरुदयास्तमयानुभवे भेदस्य स्वाभाविकत्वे तत्रोपाधिपरामर्शस्य तन्निरूपणार्थत्वात् । परोक्षत्वापरोक्षत्वादिभेदश्च संविदो जनिविनाशानुभवोपाधिकृत एव । तदुपाधिबुद्धिवृत्तेरपरोक्षत्वं च स्वाकारविषयव्याप्तित्वं, स्वव्याप्त्या विषयस्य प्रमातृसंविद्व्यवधानोपाधित्वं वा । परोक्षत्वं च स्वाव्याप्यविषयाकारत्वं, स्वाकारेणैव विषयस्य प्रमातृसंविद्व्यवधानोपाधित्वं वा । तदवभासा च संवित् तथा विकल्प्यत इति । एवमन्येऽपि दृष्टिश्रुत्यादिभेदा ऊहनीयाः ।

यत्तु — स्वप्रकाशत्वाभिमता विषयसंविन्न निर्विषयसत्त्वावभासमर्हति, सविषयस्वभावत्वादिच्छादिवत् अज्ञानत्वस्य पक्षमात्रव्यावर्तकत्वेनानियामकत्वादित्यादि । तन्न, असिद्धेः । नहि विषयप्रकाशत्वोपाधिकमेव स्वप्रकाशत्वम् । 'चैतन्यस्वभावत्वा हि स्वयम्प्रकाशते'त्यादिस्ववचनविरोधात् । किन्तु संवित्त्वादेव । तच्चाजडप्रकाशत्वमित्युक्तम् । न च प्रकाशमाना संवित् सविषयैव भासेत, तदाप्यात्मसंविदो निर्विषयप्रकाशत्वोपगमात् । न च सदैव प्रत्यक्त्वादिः स्वधर्मोऽस्य विषयः, संविद्विषयस्य तद्धर्मत्वानुपपत्तेरनन्तरमेव वक्ष्यमाणत्वात् । संविदस्वयम्प्रकाशत्वे च तिमिरस्येव विषयोपरागेऽपि स्वयम्प्रकाशत्वायोगात् । नह्यन्तरिआलोकोऽपि स्वयं न प्रकाशते । तमोविरोधिस्वरूपौज्ज्वल्यस्य स्वाभाविकत्वात् । किन्तु विषयोपरागेण संवेद्यते, संवित् तु संवेदनमेव, स्वतो न संवेद्येति विशेषः । सा च स्वापादावबभासत एव । किन्तूपसंहृताखिलकरणविषयसंस्कारमात्रपरिशेषनसोमात्रविषया, अहमर्थसंश्लेषाभावादविशदमवभासते । अन्यथा न किञ्चिदवेदिषमिति प्रतिबुद्धप्रत्यवमर्शानुपपत्तेः । यत्तु — अत एव प्रतिसन्धानात् सर्वसंविदभावसिद्धिरिति । तन्न, विरोधात् । न खलु सावनुमितिर्लिङ्गाभावादित्यविद्यानिरूपणे निपुणतरमुपपादयिष्यते । न च सुप्तौ स्मृतिहेत्वनुभवे सति सर्वसंविदभावः शक्योऽधिगन्तुम् । यद्यप्येव सुप्तौ सविषयावभासैव संवित्, तथापि विषयव्यभिचारेऽपि स्वरूपानुवृत्त्या निर्विषयस्वभावैव सा । विषयाज्ञानेन तु प्रभेव सविषयावभासेति शक्यं निरूपयितुम्, एवं सति लाघवात् । परस्य तु चिद्रूप आत्मा नियतं च तस्य स्फुरणं धर्मः । धर्मभूतं च ज्ञानमन्यत् । तस्य चानन्ता विषयप्रकाशावस्थाभेदा इत्यप्रामाणिकं गौरवमिति । एतेनेदानीमिवान्यदापि निरहमाश्रय-

१. 'न', २. 'धिक' ख. पाठः.

विषयसंविदवभासासम्भव इति निरस्तम्, उदितन्यायविरोधात् । सुप्तादावहङ्काराभावश्च वक्ष्यते ।

यत्तु — अहमर्थातिरिक्ता संवित् स्वापादौ सत्येव केवलं जागरादौ विषयसम्बन्धादेव स्फुरतीति । तत् तु निरस्तम् । सत्याश्रये प्रकाशगुणानुत्पत्तेः । स्वतःप्रकाशगुणत्वे च तदप्रकाशायोगात् । अन्यथा तिमिरस्येव विषयसम्बन्धेऽपि प्रकाशायोगादिति । 'पुंस्त्वादिवत् —' (ब्र० २. ३. ३१) इति च न सुप्तावनभिव्यक्तसतो ज्ञानस्य जागरादावभिव्यक्तिपरमनुपपत्तेरेव । किन्तु 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रः' इति * स्वशब्दोन्मानसूत्रविषयसन्निहिता या बुद्धिः तद्गुणसारत्वाद् विज्ञानमयस्यात्मनोऽल्पत्वोत्क्रान्त्यादिसंसारेऽभिहिते, सुप्तौ बुद्धिसत्त्वविलये सति कैवल्याशङ्कायां, 'यावदात्मभावित्वात् —' (ब्र० २. ३. ३०) इति सूत्रितम् । न चेहात्मशब्दः केवलात्मपरः, येन तद्धर्मभूतज्ञानातिरिक्तबुद्धिसत्त्वस्य यावदात्मभावित्वं विरुध्येत । संसार्यात्मा हि[1] प्रकृतो जीवः । तथाच यावत् संसार्यात्मा आ मोक्षात् तावदस्य बुद्ध्यवियोग इत्युक्ते, कथं तर्हि सुप्तादौ तदप्रबोध इत्यत इदमुच्यते पुंस्त्वादिवच्छक्तिरूपेण स्थित्वा पुनरुद्भवतीति । तस्मात् सदैव स्वप्रकाशैव संवित् सुप्तादावज्ञानादिसंश्लेषात् तदवभासा प्रकाशत इत्यतो नित्यप्रकाशा निरवधिरनुदितानस्तमिता न स्वतो भेदमर्हति, प्रतिप्रमातृविषयं भेदावभासस्य परोपाधित्वात् । नहि संविदात्मलब्धिरेव पराधीना, येन संयोगादिवत् स्वतो भिद्येत । परेणापि हि नित्यावभासा संविदुपगम्यते । सैव तु विषयावभासेत्यप्यस्माकमुपगमः ।

न चास्याः संवित्त्वादिरज्ञानादिविरोधिस्वभावातिरिक्तः स्वगतो भेदः, दृशेर्दृश्यधर्मत्वायोगात् । को दोषः । घटादिवददृशिः स्यात् । ननु विप्रतिषिद्धमिदं दृशित्वादृशिः स्यादिति । न विप्रतिषिद्धं, दृश्यधर्मा हि स्वयमपि दृश्या स्यादृशिश्च । ननु दृशिरेव स्वस्वधर्मावभासा स्यात् । स्वस्वविषयावभासा ह्युपगम्यते । दृश्यते चालोकः स्वस्य प्रकाशः स्वधर्मसंयोगादेरिति । नन्वत एव विषयवदतद्धर्मः संवित्त्वादिः । नहि स्वधर्मतया भास्येत । निरू-

---

१. 'हि कृ', २. 'भ्यु' ख. पाठः.

---

* 'स्वशब्दोन्मानाभ्यां च' (ब्र० २. ३. २२)

पकतया तदन्तर्भावे स्वस्य स्वविषयत्वापत्तेः । तच्च स्वस्कन्धारोहनर्तनमशक्यमुपगन्तुम् । संयोगस्त्वालोकस्य धर्मोऽन्यतः संवेद्येतेत्यनुपन्यासः । अत एव न स्वसम्बन्धितया विषयतया वा विषयोऽवभास्यते, विषयतायाः स्वस्वविषयबहिर्भावात्, सम्बन्धावभासस्य सम्बन्धिभानहेतुकत्वेन द्विर्व्यापारप्रसङ्गाच्च । किन्तु स्वसम्बन्धसत्तयैव स्वरूपेण । कथमेवमनुभवावच्छिन्नो[1] विषयो विषयावच्छिन्नोऽनुभवो वा स्मर्येत, विषयप्रकाशाहितसंस्कारसामर्थ्यादेव । संस्कारजन्यत्वबलेन हि स्मृतिरननुभूतामपि तत्तां स्वकालावधिकातीतकालसम्बन्धरूपामवगाहते । एवं संविद्विषयवैशिष्ट्यमप्यवगाहताम् । हेतुसामर्थ्यस्यानियाम्यत्वात् । घटं जानामीति विषयताव्यवहारश्च घटसंविदैव स्याद्, दण्डसम्बन्धसंविदैव दण्डी पुमानिति तत्सम्बन्धवैशिष्ट्यव्यवहारवादिति ।

यत्तु —

"न वेद्यं वित्तिधर्मः स्यादिति यत् प्रागुदीरितम् ।
तेनापि साधितं किञ्चित् संविदोऽस्ति न वा त्वया ॥
अस्ति चेत् पक्षपातः स्यान्न चेत् ते विफलः श्रमः । "

इति । तन्न । तत्तद्विकल्पेन तत्तद्वादिविकल्पितविरोधिस्वरूपमात्रोपलक्षणात् । संवित्स्वप्रकाशादिशब्दपर्यायता तु नापद्यते पदार्थभेदादित्यवादिष्म । संवित्तादात्म्येनैव च संवेद्यते वेद्यमिति निर्भेदा संविदेव न आत्मा । एवञ्च यत् कादाचित्कत्वादिना विषयप्रकाशसंविदोऽनात्मत्वमनुमीयते, तद् यदि तद्रूपेणैव, सिद्धसाधनम् । अथ स्वरूपेण, हेत्वसिद्धिः । अत एव तदात्मत्वे प्रत्यभिज्ञाभज्येतेति परस्य व्यामोहः । न च प्रतिसन्धातृत्वं ज्ञातृत्वं वात्मत्वे तन्त्रम् । किन्तु ज्ञानत्वमजडप्रकाशत्वमेव लाघवात् । अजडत्वं च सत्तयैव स्वासत्तां[2]ज्ञानविरोधिस्वरूपमवेद्यत्वं वा । अहङ्कारश्च नाजडप्रकाश इति नानैकान्त्यम् । अनात्मा हि स इति वक्ष्यते ।

एतेन न तावदजडत्वं स्वसत्ताप्रकाशकत्वं, तव प्रकाशसत्तामात्रत्वेनासिद्धेः । अन्यथा निर्विशेषत्वविरोधाद्, अनैकान्त्याच्च । दीपादेरपि भासमानत्वेन साक्षात् परम्परया वार्थान्तरापरोक्षव्यवहारानुगुण्यापादकत्वात् । अत एव नाव्यभिचरितप्रकाशसत्ताकत्वम् । सुखादौ व्यभिचारात् । स्वस्मै प्रका-

---

१. 'न्नोऽनुभवो', २. 'त्वा' ख. पाठः.

शमानत्वं चीासद्धम् । सुखादिवदहमर्थस्य ज्ञातुरवभासात् । अत एव न स्वस्मै स्वयम्प्रकाशमानत्वमपि, आश्रयाय विषयसम्बन्धेन प्रकाशमानत्वादहमिदं जानामीति । स्वयम्प्रकाशत्वं च यदि वेद्यत्वमन्तरेण व्यवहारानुगुण्यं, तदहमर्थे ज्ञातरि तवानात्मनि व्यभिचरितम् । ज्ञानान्तरनिरपेक्षप्रकाशत्वं चासिद्धम् । अहमात्मस्वरूपज्ञानसम्बन्धायत्तप्रकाशत्वादित्यादिविकल्पास्तान्त्रिकस्य मुग्धदासजनसबहुमानावलोकनलालसोल्लासा उपहास्याः । परोपाधिकं च संविदात्मनोऽपि ज्ञातृत्वादिकमुपगम्यते । प्रतिसन्धानं च शक्तिवृत्त्यनुवृत्ताहङ्कारसङ्कलितस्वपरावभासाहितसंस्कारसहकारादुपपन्नम् । स्वात्मनो विषयस्य चानुभवितुरेकत्वात् । न च संविदेव सकर्मकर्तृकानुभूयते, स्वरूपमात्रावभासित्वात् । घटमहं जानामीत्याद्यनुभवस्य परोपाधिकतयान्यथासिद्धेः । न च क्रियात्वेनच्छेदनादिवत् स्वतः सकर्मकर्तृकत्वमनुमेयम् । परस्याप्यात्मासंविदोऽक्रियात्वात् । सैव तु विषयसंविदित्यणुत्वभङ्गेनास्माकमुपगमात् । न चैवं सविषयत्वेनैव यावत् सत्त्वं तदनुमीयेत, इच्छादिवत् । तथाचात्मनोऽतिरिच्यते विषयसंविदिति वाच्यम् । संविन्मात्रस्य सविषयत्वासिद्धेः । विषयसंवित्त्वोपाधौ च स्वतस्तदनुमाने सिद्धसाधनात् । नहि विषयसंविदः सत्याः पुनरौपाधिकं सकर्मकर्तृकत्वमुपेयते । किन्तु तदेवौपाधिकमिति । शाब्दी तु व्यवहाराधीना जानात्यादिसकर्मत्वादिव्युत्पत्तिः । दृश्यते हि पच्यन्ते तण्डुला विक्लिद्यन्ते तण्डुला इति । न च विक्लित्तिरुभयत्र सकर्मिकाकर्मिका वा । एवं करोतियतत्यादिरुदाहार्यः । अथवा क्रियाभावि ज्ञानं सकर्मकर्तृकमस्तु । तच्च मम बुद्धिवृत्तिः । परस्य त्वात्मधर्मभूतज्ञानवृत्तिरित्यन्यदेतत् । तदवभासा त्वात्मसंविदेव तथानुभूयमाना स्वप्रकाशा साध्यतेऽस्माभिरित्यतः संविदात्मा चेदात्मधर्मो न स्यादित्यादिराभासः । यत्तु—प्रकाशत्वादेव कस्यचिदेव स्याद् दीपप्रकाशवदिति । तन्न । अज्ञानतमोविरोधिस्वरूपस्यातल्लक्षणत्वात्, प्रकाशेतरकर्मकत्वाच्च । आत्मसंवित्प्रकाशस्य परेणापि विषयेण साक्षात् सम्बध्य साक्षात् परम्परया वा ज्ञायमानत्वेनापरोक्षव्यवहारानुगुण्यहेतुत्वानुपगमात् । स्वसम्बन्धिन्यपरोक्षावभासपरिपन्थिविरोधिरूपस्यानुगममात्रत्वात् ॥

प्रत्यक्त्वपराक्त्वे ।

न च संविदप्रत्यक्त्वादनात्मा । प्रत्यक्त्वं हि न तावदहन्त्वमेव, परा-क्त्वं चेदन्त्वम् । प्रकृतिपरिणामभेदस्यापि तत्प्रसङ्गात् । अत एव नाहमिदं-धीविषयत्वे ते देहादेरपि प्रत्यक्त्वप्रसङ्गाद्, अयमहमस्मीत्यात्मनोऽपि परा-क्त्वप्रसङ्गाच्च । नहि 'युष्मदस्मत्प्रत्ययगोचरयोरि'ति भाष्येऽस्मत्प्रत्ययविषयत्वं प्रत्यक्त्वं विवक्षितमिति वक्ष्यते । नापि ज्ञातृत्वं प्रत्यक्त्वमज्ञातृत्वं च परा-क्त्वम् । किन्तु ज्ञानत्वमज्ञानत्वं च लाघवात् । स्वस्मै प्रकाशमानत्वं तु स्वावसितप्रकाशत्वं संविदो न नास्ति । परोपाधिना तु परस्मै भासमानत्वविभ्रम इति । अथैवमहमर्थो ज्ञातैवात्मास्तु । एवं हि संवेदनस्य साश्रयत्वं सकर्मकत्वं जातिभेदः कादाचित्कत्वमन्यस्मै भासमानत्वमित्यादि सर्वमनुभवसिद्धमाञ्जसमुप-पद्येत । औपाधिकत्वकल्पने गौरवाद् मानाभावाच्च । मैवम् । आत्मनो वा तद्धर्मस्य वा ज्ञानस्य विषयावभासपरिणामे विकारिणो नित्यत्वादिविरोधादा-त्मधर्मनित्यज्ञानासिद्धिप्रसङ्गाद्, ज्ञानोदयाद्यनुभवायोगादात्मनो विषयासिद्धि-प्रसङ्गाच्चेत्युक्तम् । ज्ञातृत्वानुभवागमयोश्चान्यथासिद्धिरग्रे वक्ष्यते ।

तत्र यद्यपि नित्यज्ञानाश्रयत्वमात्मानमविकुर्वदेव भवति । तत् तु सुप्तौ सदपि न सिध्यति । विषयावभासपरिणामश्च धर्मभूतज्ञानस्यैवेति तदीयपराक्त्व-मिव नात्मधर्मतामर्हति । विषयावभासतया विकसन्ती सङ्कुचन्ती वा संविदा-त्मन एव प्रभेव दीपस्येति चेत्, तथापि व्यवधानानुद्धारात् । तदवस्थसंविदाश्र-यत्वमेव ज्ञातृत्वमवभासते संवेद्मीति चेद्, अवस्थातद्वदभेदे क्रियाभाविज्ञाना-श्रयत्वं कादाचित्कमात्मनो विकारः स्यात् । न चायं प्रामाणिकः[1] । अनुभवाद्यन्य-थासिद्धेः । तद्भेदे चावस्थाभेदोऽपि संविच्चेत्, तदाश्रयतैवानुभूयेत, संवेद्मीति सम्बन्धावभासस्योत्सर्गतः साक्षात्सम्बन्धविषयत्वात् । अथ न संवित्, संविच्च न स्वरूपेण प्रथत इति संवेद्मीत्यनुभवविरोधः । यत्तु — प्रसृतज्ञानकर्तृत्वं कर्मनि-मित्तं, स्वाभाविकविकारस्त्वात्मनि निषिध्यत इति, तत्रास्तां तावन्निषेधोप-पत्तिः । आत्मनः स्वरूपविक्रिया पुनरनित्यत्वहेतुः प्रसज्यत एव । नह्यनन्य-निमित्तो विकारोऽनात्मनोऽपि, स्वभाववादप्रसङ्गात् । नाप्यकर्मनिमित्तः, सर्वस्यैव विकारस्य प्राणिकर्मनिमित्तत्वात् । अत एव कर्तृत्वरूपविकल्पेन तदनात्मत्वप्रयोजकत्वनिरासो निष्फलः । क्रियाश्रयत्वरूपेऽपि कर्तृत्वे विका-

१. 'क्त्वं न', २. 'कमनु' ख. पाठः.

रित्वादिप्रसङ्गनात्। नन्वात्मनि नित्यत्वागमबाधः कादाचित्कत्वं चानित्यत्वप्रयोजकम्। न। नह्यागमो विकारित्वमा(त्मनो) गमयित्वा नित्यत्वमामनति। नित्यत्वमात्रं पुनरामनन्न प्रसङ्गं विरुन्धीत। कादाचित्कत्वमपि तु विकारित्वादेवापद्येत, पक्षादन्यत्र व्याप्त्यविशेषात्। मृषाधात्वर्थाश्रयता पुनरसदात्मनो न विकारित्वादि प्रसञ्जयति। यद्यपि सा सर्वस्यैव मृषा किन्त्वन्यत्र धर्मिसमस्वभावा तदविद्यानुपादेया तदवधिबाधाविषयो वेति विशेषः। अकर्तृत्वं चात्मनः प्रपञ्चयिष्यते। एवञ्चाविकारित्वागमो न विशेषयितव्यः। अस्माकमाविद्यकविकारित्वस्य निषेधाविरोधित्वादिति। न च स्वतः परतो वा ज्ञातृत्वमात्मनः सिध्यति।

यत्तु — संविदात्मानौ स्वयं भासमानौ स्वभावादेव विशेषणविशेष्यभावेन भासेते इति। तदयुक्तम्। विशेषणविशेष्यभावो हि न स्वरूपमेव संविदात्मनोः। पृथगवसितावभासत्वेन ज्ञातृत्वासिद्धिप्रसङ्गात्। अथान्योन्यनिरूप्यो धर्मभेदः, न स तर्हि स्वभावादवभासेत, अजाङ्यनित्यत्वादिवत्। अथापि प्रतियोगिभानमात्रमपेक्ष्य तत्तदंशावभासौ संविदात्मानौ स्याताम्। तथापि संविदात्मसंसर्गानुभवानिर्वाहः। अपिच यदि सम्बन्धादेव स्वयमात्मने संविदवभासेत, विषयायापि किं नावभासेत, सम्बन्धमात्राविशेषात्। ज्ञानगोचरज्ञानत्वाभावस्य तद्गोचरज्ञानवत्त्वाभावस्य च विषयात्मनोस्तुल्यत्वात्, सम्बन्धभेदमन्तरा गुणगुणिभावाद्यनिर्वाहाच्च। अपृथक्सिद्धिश्चासिद्धा, संविदहमित्यप्रतीतेः। अपिचानुपादानोपादेयद्रव्ययोराश्रयाश्रयिभावे संयोगो निबन्धनं दृष्टम्। न च तव द्रव्याभिमतज्ञानात्मनोः संयोगो युज्यते, अनवयवत्वेनापरिच्छिन्नज्ञानसंयोगव्याप्तावात्मनोऽनणुत्वप्रसङ्गात्। पञ्चीकरणशास्त्रादशेषभूतभौतिकस्य सावयवत्वेन घटाकाशादिसंयोगाव्याप्तेः। ज्ञानस्य सावयवत्वे च नित्यत्वोपगमविरोधः। आत्मा च विक्रियेत।

"उपयन्नपयन् धर्मो वि(का?क)रोति हि धर्मिणम्"

इति 'अविकार्योऽयमुच्यते' इत्यादि च विरुध्येत। अणुरात्मैव ज्ञानमवच्छिन्दन्नेव संयुङ्क्ते इति चेत्। एवं विषयस्याणुमात्रमपि न प्रकाशेत। आत्मस-

---

१. 'त्मनित्य', २. 'रागम', ३. 'त्रै', ४. 'त्र', ५. 'यापि', ६. 'क्रमिति' ख. पाठः.

म्बन्धपरिच्छिन्नस्य विषयासम्बन्धात् । अपिचात्मानुपादेयत्वे सति ज्ञानद्रव्यस्य नियततद्धर्मत्वानुपपत्तिः, आत्मान्तरवत् । न च प्रभाया दीपोपादेयत्वे तदतिवृत्त्ययोगादतदुपादेयत्वेऽपि तद्धर्मनियमो दृष्ट इति वाच्यम् । दीपसम्बन्धसहभावानियमेऽपि तस्यास्तद्धर्मत्वासिद्धेः । उभयोरपि पृथगुपादानोपादेयतया नियतधर्मधर्मिभावानुपपत्तेः । दीपावष्टम्भतया तु दीपप्रभेति व्यपदेशो न तद्धर्मत्वमाक्षिपति । न हि पार्थिवस्य मणेस्तेजोद्रव्यं प्रभा धर्मः । अथ च व्यपदिश्यते मणिप्रभेति, तदवष्टम्भत्वात् । एवं घृतदीप इत्यादिव्यपदेशा उदाहार्याः । न चापृथक्सिद्धविशेषणत्वेन ज्ञानमात्मधर्मः, तदसिद्धेः ।

अपिच नात्मा ज्ञानाश्रयः, ज्ञानत्वाद् विषयज्ञानवत् । न च बाधः, जानामीत्याद्यनुभवस्यौपाधिकविषयत्वात् । ज्ञातृत्वश्रुतौ तु वक्ष्यामः । न चाप्रयोजकत्वम् । उक्ततर्कानुगृहीतव्याप्तिविरोधाद्, धर्मभूतज्ञानत्वस्य गौरवेणाप्रयोजकत्वाच्च । अपिचात्मा यदि ज्ञातृत्वस्वभावः स्यात् सुप्तावपि ज्ञातैवानुभूयेत । न च ज्ञानस्य सतो विषयासम्बन्धापराधेनाप्रकाशता । नहि विषयसम्बन्धेन सतो ज्ञानस्य प्रकाशो जनितुमर्हतीत्युक्तम् । न च तदवस्थाभेदोऽपि सप्रकाशः स्यात् । न खलु मेघादेरवस्थाभेदो विद्युदादिः । किन्तु तत्सम्भिन्नतेजस एव, परिणामेषु परिणामिसालक्षण्यस्य सर्वसिद्धत्वात् ॥

सङ्कोचासम्भवनिरूपणम् ।

यद्युच्येत — सुप्तौ कर्माविद्यासङ्कुचितं ज्ञानं न प्रकाशत इति । कोऽयं सङ्कोचः । यदि शक्तिमात्रावस्था, तर्ह्यात्मन एव स्यादिति स ज्ञानवृत्तिपरिणामी विक्रियेत । अथ दिवा दीपालोकस्येवाभिभवमात्रं, सदैव तर्ह्यपरिच्छिन्नं तत् सर्वविषयसम्बद्धमिति किमिन्द्रियादिद्वारेण । नहि मानार्थसम्बन्ध एव कर्माविद्यापावरणहेतुरुपगम्यते, मानाभावात् । अथ यावदात्मपरिमण्डलता सङ्कोचः, तावन्मात्रस्यापि स्वतो भानापेक्षया कथं न ज्ञातृतावभासः । दीपपरिमण्डलापि हि प्रातः प्रभा प्रकाशत एव । तत् सुप्तौवात्मनोऽननुभूयमानं ज्ञातृत्वं न स्वभावः । अपिच ज्ञेयसम्बन्धोपाधिकमात्मनो ज्ञातृत्वमनुभूयते ।

---

१. 'तृस्व', २. 'ते' ख. पाठः,

तदभावे सुप्तौ मुक्तौ च 'न तु द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येत्', 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदि'त्यादिज्ञातृत्वाभावाज्ज्ञानात् । न च ज्ञानस्य ज्ञेयसम्बन्धनियमः, तवाप्यात्मनि व्यभिचारात् । न चास्यापि प्रत्यक्त्वादिरात्मधर्मो नित्यज्ञेयः, ज्ञानस्य ज्ञेयधर्मानुपपत्तेरुक्तत्वात् । स्थिते च कालापरिच्छेदे ज्ञानस्य घटादिविषयव्यभिचारवत् सर्वविषयव्यभिचारस्याप्यनुमातुं शक्यत्वाच्च । न च ज्ञेयं किञ्चिन्नित्यमस्ति, 'अतोऽन्यदार्तमि'त्यादिश्रुतेश्च ॥

जडाहङ्कारानात्मत्वम् ।

एवमहङ्कारोपाधौ ज्ञातृत्वमनुभूयमानमात्मनो न स्वभावः । न चाहङ्कार आत्मा, दृश्यत्वेन पराक्त्वात् । नह्यहन्त्वमहमित्यवभासमानत्वं वा प्रत्यक्त्वमित्युक्तम् । न चाहंबुद्धिरित्येव तया प्रत्यगर्थविवेकः, तवापि प्रकृतिपरिणामस्याप्यहमित्येव भानात् । किन्तु दृश्यव्यतिरेचिकेति । एवञ्चाहङ्कारादिसर्वदृश्यावभासा दृशिरेव प्रतीची व्युदपादीति न तदभावप्रसङ्गः । अत एव च नैकत्र प्रत्यगर्थद्वयापत्तिः । अपिच,

व्यतिरेकी विकारी च नाहङ्कारः स्वयं दृशिः ।
येनात्मानं तदाभासं प्रत्यगर्थमपह्नुवे ॥

प्रत्यक्चितिरहङ्कारतद्वृत्तिविषयाज्ञना ।
साश्रयेव परार्थेव विपर्यस्तावभासते ॥

येनैषानिदमाभासाप्यप्रतीचीति ते मतिः ।
परागर्थव्यपेक्षा च प्रतीचीति विकल्पना ॥

निरस्तोपाधिकालुष्या सैवात्मा नः स्वयं दृशिः ॥
न च स्वस्मै स्वयम्भानमहमित्येव नीयते ।

तद्धि स्वावसिताभासभावान्नान्यान्निरूप्यते ।
स चाहङ्कारतादात्म्यादहम्भावाभिमानवान् ॥

अहमित्येव मोक्षीयञ्छास्त्रेऽधिक्रियते न किम् ।
नित्यानन्दानुभूरस्तसमस्ताधिरसान्यहम् ॥
इति कामयमानोऽपि साहम्मानः स एव नः ।
नायं प्रागहमर्थस्य नाशं मोक्षमवस्यति ॥
येनात्मनाशशङ्की सन् बिभीयान्मोक्षसंस्तवात् ।
नाहमस्मि न मे किञ्चिदित्यहंममतानुदि ॥
अहङ्काराश्रये बोधे केवलात्मावशिष्यते ।
अहं ब्रह्मेति विज्ञानमप्यहङ्कारसंश्रयम् ॥
परोक्षत्वपरिच्छेदौ व्युदस्यति दृगात्मनि ।
परिणामपरिच्छेदपरितापैरुपप्लुतात् ॥
प्रकाशसत्तानन्दात्मा सोऽहङ्काराद् विवेचितः ।
स्वयम्भानोऽनहम्भूतः केवलः परिशिष्यते ॥
सर्वानुबन्धबाधेऽपि संविन्निर्विषयाश्रया ।
सत्तानन्दस्वभावात्मा स्वप्रकाशावतिष्ठते ॥
विषयाश्रयसंश्लेषाद्दते ज्ञानं न सिध्यति ।
इतीदं दुर्भणं नित्यं[1]चिद्रूपात्मानमिच्छताम् ॥
अहम्भावविमुक्तत्वे घटादिवदनात्मता ।
न चितो यदसंवित्त्वप्रयुक्ता तदनात्मता ॥
नासंवित्त्वमहम्भावविमुक्तस्य घटादिवत् ।
शक्यशङ्कमतद्रूपविषयज्ञानवादिनाम् ॥
स्वप्रकाशोऽयमालोकः संविदात्मापि ते तथा ।
अविशेषोऽनहंभावादात्मनः प्रसजेद् यदि ॥
आलोकश्चाहमात्मा च प्रकाशगुणकौ तव ।
अविशेषादहम्भावः केन वा विनिगम्यते ॥
स्वभावभेदोपगमे कथमालोकसंविदोः ।
अविशेषत्वशङ्का ते यतः स्यादहमात्मता ॥

---

१. 'त्यं' ख. पाठः.

विज्ञातृत्वागमादीनामुपपत्तिस्तु वक्ष्यते ।
नातः स्यादहमात्मा ते विज्ञात्रात्मत्ववर्त्मना ॥

कोऽहमित्येव निपुण इत्यादि यदुदाहृतम् ।
न तदप्यहमात्मत्वमुपपादयितुं क्षमम् ॥

अदूरविप्रकर्षेण चिदात्मानं दिदिक्षताम् ।
अहङ्कारमनादाय नात्मादेशो हि सिध्यति ॥

आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज! ।
इति किं दोषमाशङ्क्य प्रत्यपेधद् रहूगणः ॥

शब्दोऽहमिति दोषाय नात्मन्येष तथैव तत् ।
इति वा भरतः कस्य दोषस्याभावमन्ववक् ॥

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥

इति दोषो हि मा ज्ञायि राज्ञानात्मविदा तदा ।
येन ते प्रत्यगात्मैव तन्निषेधादहं भवेत् ॥

स्वनामग्रहवद् दोषः प्राप्तोऽहमिति शब्दने ।
अबोधकत्वदोषो वा निषिद्धानूदितो यदि ॥

नैतावताहमात्मा ते कथञ्चिदपि सिध्यति ।
अहंशब्दो ह्यबुद्धस्य बुद्धस्य च चिदात्मनः ॥

शक्त्या लक्षणया वापि बोधको मम सम्मतः ।
तत्त्वं चात्मानहन्त्वेऽपि युज्यतेऽहमुपाधिना ॥

अपिच,

पिण्डः पृथग् यतः पुंसः शिरःपाण्यादिलक्षणः ।
तदाहमिति कुत्रैतां संज्ञां राजन्! करोम्यहम् ॥

इत्यूचे कार्यकरणसम्पिण्डात् पृथगात्मनः ।
अनहन्त्वमहंशब्दविषयत्वं क्षिपन्मुनिः ॥

युष्मदस्मदित्यादिभाष्यार्थः ।

न च युष्मदस्मत्प्रत्ययगोचरयोरिति भाष्यस्यायमर्थः — युष्मत्प्रत्ययगोचरोऽनात्मा अस्मत्प्रत्ययगोचरस्त्वात्मेति, बुद्ध्यादेरात्मत्वप्रसङ्गात् । युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वमुपेत्यैव **'न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वाद्'** इत्यहंव्यक्तावभासत्वमात्राभिधानात् । अन्यथा इदमहम्प्रत्ययगोचरयोरित्यवक्ष्यत् । युष्मदस्मत्प्रत्ययगोचरयोरिति तु ब्रवीति । तदयमर्थः — युष्मदस्मदिति प्रत्यक्परागर्थावुपलक्षयति । तौ च प्रत्ययश्च गोचरश्च प्रत्ययगौचरौ । व्युत्क्रमेण सामर्थ्यात् पाठक्रमबाधाद् 'उपहूतोपह्वयस्वे'त्यादिवत् । तदेव विवृतं परेण **'विषयविषयिणोरि'**ति । अथवा युष्मदस्मदी एव प्रत्ययौ गौचरौ च । एकः प्रतीयते गोचर्यते चेति प्रत्ययगोचरः । अपरः प्रत्यय एव गोचरयति । तेन दृश्यत्वं पराक्त्वं दृशित्वमेव प्रत्यक्त्वमिति लक्षणविवक्षा लक्षितेति न विरोधः । अत एवास्मद्धीसिद्धोऽहङ्कारो युष्मदर्थ इति जननीवन्ध्यावचनवदिति निरस्तम् । तादृश एव दृश्यस्य देहादेरप्रत्यक्त्वात् । न चाबाधिताहन्धीविषयत्वं हेतुः, असिद्धेः । इदम्प्रत्ययाविषयत्वं च तवाप्यनात्मनि विषयसंविदि व्यभिचारि । न चास्याभ्युपगतमज्ञातृत्वं प्रसञ्जनीयम् । न च ज्ञातृत्वादिर्दृगात्मनो धर्मः, दृश्यत्वात् । अन्यथात्मनोऽपि दृश्यत्वेऽदृशित्वापत्तेः । अहङ्कारोपरागेण ज्ञातृत्वकल्पनोपपत्तिश्च वक्ष्यते । तस्मादहम्भावबाधानवधिरहमर्थो नात्मा, दृश्यत्वाद्, अदृशित्वादप्रत्यक्त्वात् । किन्तु केवलसंविदेव, लाघवेन घटादावदृशित्वस्यैवाप्रत्यक्त्वप्रयोजकत्वाद्, व्यतिरेकाच्च ॥

सुप्तावहमभावः ।

नह्यहमर्थः सुप्तादावस्ति, उपलभ्यानुपलब्धेः । न च तदाप्यहमित्येवाविशदमवभासते । गाढं सुप्तोऽहमित्येव नावेदिषमिति ब्राह्मणत्वश्रमणत्वसुखदुःखादिविशेषमनन्तर्भाव्यैव पृथगहमज्ञानपरामर्शात् । 'न बाह्यं किञ्चन वेद नान्तरमि'ति चाविशेषेण सहाहन्त्वेनान्तराज्ञानानुवादात् । प्रियासम्परिष्वङ्गेऽपि सुखमूर्छनयाहमित्यप्यनवभासोपपत्त्या दृष्टान्तानाञ्जस्याभावात् । एवञ्च श्रुतौ 'अयमहमस्मी'ति 'न जानाती'ति यावदन्यानुभूताज्ञानानुवाद

एव, ब्राह्मणत्वादितदेकदेशविषयव्यवस्थाहेत्वभावात् सुप्तावहमज्ञाने बाधकाभावात् । न च प्रत्यभिज्ञाविरोधः, अहमः शक्तिवृत्तिभ्यामापीतेरनुवृत्युपगमात् । अवस्थाभेदे व्यावर्तमानेऽपि तव ज्ञाननित्यत्वसम्प्रतिपत्तेः । न च प्रतिबुद्धस्याहमनुविद्धप्रत्यवमर्शविरोधः, अवमर्शदशायामहम्भावात् । न ह्यहमस्वाप्सामिति स्वापकालसम्बन्धोऽहमि प्रतीयते, किन्तु स्वाप एव, आख्यातबोध्यकालभेदस्य सर्वत्र धात्वर्थसम्बन्धावगमात् । मन्दमगममित्यादौ हि गत्यादिक्रियाविशेषणं मान्द्यादि तत्कालतयानुभूतमनुसन्धीयेत । न त्वहन्त्वमस्वापक्रियाविशेषणं तत्कालतयाननुभूतं च । स्वापे तु कथञ्चिदतीतकाले गम्यमानेऽहमः सन्निधानादहमस्वाप्समित्यवगमः । न तु गजाभावे गम्यमानेऽनुभूतचत्वरस्येवाहमोऽवमर्शः, सौप्तिकाहमज्ञानावमर्शविरोधात् । अन्यथाहमिति जानन्नेवास्वाप्सामित्यवमर्शापत्तेः । अहन्त्ववत् तदवभासस्यापि स्वधर्मतयात्मनः स्वधर्मावभासत्वोपगमात् । न च तव स्वस्वविषयावभासत्वेऽपि न किञ्चिदवेदिषमित्येवावमर्शो नाज्ञानं जानन्नस्वाप्समिति । एवमस्माकमहमित्येव स्यादवमर्श इति वाच्यम् । ज्ञातृत्वाभिमानस्यास्माभिरहमुपाधिकत्वोपगमेनाहमभावे सुप्तौ तदभावोपपत्तेः । आलोकवदात्मा स्वभावादेव स्वस्वधर्मावभासो न विषयविषयिभावात् । अतो न विषयज्ञानवदवमर्श इति चेद्, न । अप्रकाशस्य ज्ञानविषयतयैव भाननियमाद्, जागरेऽप्यहमिति जानन्नेवासमित्यननुभवप्रसङ्गाच्च । अथापि कथमतीतकालस्वापसम्बन्धानुभवोऽहमस्वाप्समिति, न चासौ विना बाधं विभ्रम इति युक्तम् । नैवम् । स्वापो हि निश्शेषविशेषविज्ञानोपरमात्मा शक्तिसंस्थोऽहङ्कारावस्थाभेद एव । तदनुगतस्य चाविद्याशक्त्युपधेयस्यात्मनोऽहंवृत्त्युपधानेऽहमस्वाप्समिति प्रतिबोधाविरोधात् । बालस्थविरशरीरभेदेऽपि कस्याप्यनुगतस्य स्थविरोऽहं, बालोऽभूवमित्यनुसन्धानदर्शनात् । न चैवमपि ह्यस्तनाहङ्काराभेदप्रतिसन्धानविरोधः, विनष्टघटाया मृदः पुनस्तदुत्पत्तौ स एवायं घट इत्यप्रतिसन्धानादिति वाच्यम् । कार्यज्ञेयशेषप्रतिघटनानुकूलप्रतिसन्धानबीजसंस्कारसम्भिन्नशक्तिरूपानुवृत्त्याहङ्कारवृत्तिभेदाप्रत्यक्षतया च घटादिवैषम्यात् । योऽहमासं सोऽहमस्मीति सतोऽप्यभेदज्ञानस्य यो बालोऽभूवं स स्थविरोऽस्मीतिवत् तदुपधेयात्मानुगतिनेयत्वाच्च । अत एव सौप्तिकाज्ञानानुभवसंस्कारोऽप्यहङ्कार-

शक्तिसम्भेदेनैवाधीयत इत्यहं नावेदिषमित्याद्यनुसन्धानमुपपन्नम् । यस्यानुभवसंस्कारस्तस्यैव स्मृत्युपपत्तेः ।

यत्तु — सुप्तौ स्वयञ्ज्योतिः पुरुषशब्दोऽहमात्मेति । तन्न । नहि 'बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति पुरुषस्य बोद्धृत्वादिकं विधीयते, 'एष हि द्रष्टे'ति सिद्धवदुपन्यासादनुभवसिद्धत्वाच्च । तस्य च परोपाधिकत्वेऽप्युपपत्तेः । अहमभावेऽपि तदनुविद्धानुसन्धाने घटिते च सुप्तावहमवभासाभावे संविन्मात्रावभासोऽपि मा भूद्, न किञ्चिदवेदिषमित्यवमर्शाविशेषादिति निरस्तम् । अवमर्शहेतुतयैव संविन्मात्रावभासोपगमात् । न च स एवाहमवभासः, तस्याहन्त्वविकल्पताकल्पने मानाभावात् । न चाहमाश्रयमज्ञानमिति वक्ष्यते । तदाश्रयतानुसन्धानं चोपपादितम् । न चाज्ञानसाक्षी द्रष्टा अहमेव, अनहम एव स्वाश्रयदृश्योपाधिविभक्तदृष्ट्याश्रयतयैव साक्षित्वादिव्यपदेशोपपत्तेः । अत एव दृष्टेर्द्रष्टा श्रुतेः श्रोतेत्याद्याम्नायते मा भूदात्मनः स्वाभाविकं द्रष्टृत्वादि । नहि दृष्टिगोचरा दृष्टिरपरा श्रुतिगोचरा च श्रुतिरात्मधर्मो जायते, चाक्षुषादिवृत्तिभेदो हि स इति तदवभासिचैतन्यस्य तदविविक्तवृत्तितया तदाश्रयतोपाधिकमेव स्यादिति । यत्तु — स्वस्मै स्वयम्प्रकाशत्वादात्मनः सुप्तावहमित्यवभासः साध्यते । तन्न । अप्रयोजकत्वात् । तेन विनापि ह्यात्मनोऽनन्यदीयप्रकाशत्वेन तदुपपन्नम् । देहादिवदहमवभासस्यात्मनि परोपाधिकत्वतर्कसम्भवाच्च ।

अपिच सुप्तावहम्भावे 'सता सोम्य! तदा सम्पन्नो भवती'ति विरुध्येत । नह्यत्र 'कन्यां कनकसम्पन्नां', 'बुद्धिविज्ञानसम्पन्न' इत्यादिवदुपश्लेषमात्रं सम्पत्तिः, तस्य सदंशे जीवे सदातनत्वेन तदेति विशेषानर्थक्यात् । किन्त्वभेदगमनम् । 'समभेदे च सम्यक्त्वे' इति समर्थानुगमात् । स्वप्नादौ ह्यहङ्काराद्यविविक्तवृत्तिरसम्पन्न इव सता भवति । तद्विलये तु घटादर्शादिविलये घटाकाशप्रतिबिम्बाविव महाकाशबिम्बाभ्यामात्मा सता सम्पद्यते । परन्तु तत्राविद्याशक्त्युपाधिसंस्कारानुवृत्त्या, नात्यन्तं यथा कैवल्ये । 'सति सम्पद्य न विदुः', 'सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' इति सुप्तावविद्याशक्तिसद्भावश्रुतेः । अत एव सुषुप्तयुत्क्रान्त्योर्भेदेन

१. 'निव' ख. पाठः.

व्यपदेशः 'प्राज्ञेनात्मना संपरिष्वक्तः', प्राज्ञेनात्मनान्वारूढ' इति च । अविद्याशक्त्युपाधिकजीवपरविभागस्यामोक्षमनुवृत्त्युपगमात् । अत एव पुनरपरिमुषितसंस्कारास्तया तया वासनया तथा तथैव प्रतिबुध्यन्ते पृथिव्या इव मण्डूकवासनया मण्डूकाः, 'त इह व्याघ्रो वा सिंहो वा वृको वे'त्यारभ्य 'यद् यद् भवन्ति तदा भवन्ती'ति श्रुतेः । 'स एव तु कर्मानुस्मृतिशब्दविधिभ्यः' (ब्र०. ३. २. ९) इति च न्यायः । तथा 'स्वमपीतो भवती'त्यतोऽपि सुप्तावहङ्काराभावो गम्यते । न च स्वं स्वीयं सदात्मानमपीत उपगतो भवतीतीयदेवोच्यते, नित्योपगतत्वेन तदेति विशेषणानर्थक्यादेव । एवं सतः स्वाप्ययादचेतनव्यावृत्त्यासिद्धेश्च । 'भवाप्ययौ हि भूतानामि'त्यादावपीतेर्लयार्थत्वप्रसिद्धेश्च । 'यज्ञो ब्रह्मण्वाम् अप्येतु देवानि'त्यादौ च क्रियावस्थाविलयेन यज्ञस्य देवप्रीत्यवस्थादिपरिणामविवक्षोपपत्तेरव्यभिचारात् । सोऽयमप्ययो विलयः स्वरूपेण पुरुषस्यासम्भवन्नुपाधितन्त्रः । विलीयमानोपाधिश्च स्वमानुगतोऽहङ्कार एव । तथा 'सर्व एते आत्मानो व्युच्चरन्ती'ति प्रबोधे जीवसर्गवचनं स्वरूपेणासम्भवदहङ्कारोपाधिकमाश्रयितव्यम्, अहमित्येव प्रथमत्वात् करणकलेबराहम्भावस्य चरमत्वात् । अथ सुप्तौ जीवस्य बहिर्मुखज्ञानविरहावस्था स्वाप्ययो नाम, 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि'ति लिङ्गात् । व्युच्चरणं च बहिर्मुखज्ञानप्रसरावस्थैवेति नाहङ्कारविलय इति चेत् । एवं हि तद्धर्मज्ञानस्योदयाप्ययावात्मन्युपचर्येते इत्यापन्नम्, दौवारिकौ वाऽऽत्मान्वितौ च तावाम्नायेते । न च शब्दस्य स्वार्थे सम्भवत्युपचारः पारम्पर्यं वा युज्यते । अस्माकं तु परोपाधिकोऽपि विलयो वोदयो वा अविद्यात्मान्वित एवेष्यते । एवं सति 'चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्' (ब्र०२. ३. १९) इति सूत्रविरोधः । न । जातेष्ट्यादिसंस्कारकर्मविधयो हि जन्मान्तरीयफलसाधनकर्मसम्बन्धयोग्यताफला नित्यमात्मानं संस्कार्यमाक्षिपन्तीति प्रतीतभेदतया तत्र जन्मादिव्यपदेशस्य भाक्तत्वाभिधानोपपत्तेः । न त्वात्यन्तिकी भक्तिः, परोक्षविवेकस्यापरोक्षतादात्म्यविभ्रमाविरोधित्वात् । पुत्रे जाते 'वैश्वानरं द्वादशकपालं निर्वपेदि'त्यादिषु पुत्रादिशब्दस्य देहाविविक्तालम्बनत्वाच्च । नित्यत्वाज्ञानं तु तस्य स्वरूपेणेत्य, वादिष्म । स्वरूपेण ब्रह्ममात्रोऽपि जीवः पृथङ्नित्य आम्नायते चिदानन्दात्मा

च तदनित्यत्वादिशङ्कया ब्रह्मात्मताप्रतिपत्तिर्मा विरोधीति । न चैवं जीवरूपेणोत्पादविनाशे कृतनाशादिप्रसङ्गः, अनाद्यविद्यामायाशक्तिवृत्त्यवस्थानुवृत्ताहङ्कारोपाधिकस्य कर्तुर्भोक्तुरनादित्वोपगमात् । तदेवमहङ्कारोपाधिनैवात्मन्यहम्भावोपपत्तौ पृथगहन्त्वकल्पना न मानवतीति ॥

कामादिमनोधर्मता ।

अपिच परस्य कामादयोऽहमात्मधर्मा उपगम्यन्ते । ते तु मनोधर्मा आम्नायन्ते 'कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत सर्वं मन एवे'त्यादौ । मृद् घट इत्यादाविव वृत्तिवृत्तिमदभेदेन सामानाधिकरण्यमुख्यत्वोपपत्तावायुर्घृतमित्यादिवदभेदोपचारत्वकल्पनायोगात् ॥

उपादानोपादेयाभेदः ।

ननु नोपादानोपादेयाभेदो युक्तः, द्रव्ययोर्द्रव्यगुणयोर्वा पौर्वापर्येण विरुद्धधर्मत्वात्। अपिच मृन्मयी मृदिति न प्रयुज्यते। किं कारणम्, अभेदात्। एवं मृन्मयो घट इति न प्रयुज्येत। अथ कुण्डं बदरमिति न प्रयुज्यते, कस्य हेतोः। भेदात्। एवं मृद् घट इति न प्रयुज्येत शुक्लः पट इति च। न। मृज्जातीयत्वेन घटेऽपि मृत्पदवृत्तेः, गुणवचनेभ्यो मतुपो लुगनुशासनेन द्रव्येऽपि शुक्लपदवृत्तेश्च । अथवा सिंहमाणवादिवदभेदोपचारो वा इदंरजतादिवद् अभेदभ्रमो वा निबन्धनं मृद् घट इत्यादिसामानाधिकरण्य इति ।

उच्यते —

विवर्तः परिणामो वा विकारः कारणस्य नः ।
आरम्भस्तु न सम्भाव्यो विकारस्य कथञ्चन ॥

अन्यथोपादानोपादेयद्रव्यभेदे रूपरसगुरुत्वादिभेदस्तदुपलम्भप्रतिबन्धश्च कल्प्येत । पौर्वापर्यं चावस्थाभेदोपाधिकं नानुगतवस्तुस्वभावं भेत्तुमुत्सहते । तदालम्बनं च मृद्घटादिसामानाधिकरण्यं युक्तम् । यदि हि मृज्जातीयो घटः, शरावोऽन्यश्च मृदेवेति घटत्वशरावत्वादिव्यवस्था न स्यात् । अपिच

---

१. 'ब', २. 'प' ख. पाठः.

मृन्मयी मृदिति न प्रयुज्यते । किं कारणं, मृत्त्वादेव । एवं मृन्मयो घट इति न प्रयुज्येत । ननु तवापि न प्रयुज्येताभेदादित्युक्तम् । दुरुक्तं तत् । नहि मृदिति च घट इति चाभेदं ब्रूमः । किं तर्हि, तदुभयानुगतस्य सत्तामात्रस्येत्यवोचाम । तस्य चायं विशेषो मृदिति घट इति चेति । एवं शुक्लपटादिसामानाधिकरण्यमपि ।

एकस्यैव हि वस्तुनः शुक्ल इति पट इति च विशेष इति । एवं सामानाधिकरण्यमुख्यत्वोपपत्तावौपचारिकत्वमकल्प्यं भ्रममूलत्वं वा । लौकिकानां मृदो घटो जायत इति कुतर्करसिकानां चोपादानोपादेयभेदस्यैवावगमाद्, 'एतत् सर्वं मन एव' इत्युपदेशे तदसम्भवाच्च । कुतस्तर्हि मनः काम इत्यादिशब्दप्रत्ययौ लौकिकौ न[1] स्याताम् । अहमित्येवात्मतादात्म्येन आत्मधर्मत्वविभ्रमात् । अथाप्यहं कामः सङ्कल्पः आकाशः शब्दः पृथिवी गन्धः इत्येवं कस्मान्न भवति । लोकव्युत्पत्त्यैव तेषां निष्कृष्टविषयत्वविज्ञानात्, स्वरूपासम्भेदग्रहस्य तद्रूपोपस्थितसामानाधिकरण्यप्रत्ययपरिपन्थित्वात् । अत एव न मनुष्योऽहं गौरोऽहमित्यादिवद् देहोऽहं गौरिमाहमित्यादिसामानाधिकरण्यप्रत्ययः, देहादिशब्दस्य निष्कृष्टवृत्तित्वविज्ञानात् । अत एव च तावन्मात्रेऽपि शिलापुत्रकस्य शरीरमित्येव व्यपदेशो न तु शिलापुत्रकः शरीरमिति । वस्तुवृत्तेन तु वृत्तिवृत्तिमदभेदाद् 'एतत् सर्वं मन एवे'ति श्रौतं सामानाधिकरण्यम् ।

यत्तु अपर आह—'मनसा ह्येष पश्यति मनसा शृणोति मनसा विजानाति' 'मनसा हि कामान् कामयते', 'तानहं कामये हृदा', 'ते मां कामयन्तां हृदे'त्यादितृतीयाश्रुत्यान्तःकरणत्वप्रसिद्ध्या च न कामाद्युपादानं मन इति । तन्न । मृदा घटं कटमेरकाभिः करोतीति व्यपदेशात् साधकतमत्वप्रसिद्धेश्च मृदादेरपि घटाद्यनुपादानत्वप्रसङ्गात् । हेतुतामात्रेण तदन्तरङ्गतया च तदन्यथासिद्धिस्तु मनस्यपि स्यात् । अपिच कषायेण रज्यति पट इति व्यपदिश्यते । न च कषायकरणकः पटधर्मो रक्तिमा जायते, मानाभावात् । अथ च

कषायाभेदविभ्रान्ते रक्तद्रव्यात्मना पटे ।
रक्तिमाश्रयताबुद्धिर्लोकसिद्धोपपाद्यते ॥

---

१. 'नमस्या' ख. पाठः.

मनस्तादात्म्यविभ्रान्ते कामयित्रात्मनात्मनि ।
कामाद्याश्रयतावुद्धिस्तद्वदेवोपपाद्यते ॥

न खल्वात्मनि प्राणादिकरणकोऽन्यः प्राणनादिव्यापारः । अथ च निर्दिश्यते 'यः प्राणेन प्राणिति', 'योऽपानेनापानिती'त्यादि । तत्रापि प्राणाद्यभेदाध्यासात् प्राणितीत्यादिविभ्रमः । एवञ्च,

रक्तिमप्राणनादीनामाश्रयत्वे पटात्मनोः ।
उपाधित्वात् कषायेण प्राणेनेति च भण्यते ॥

एवं मानसकामादिसम्भेदे नश्चिदात्मनः ।
उपाधिभावान्मनसो मनसेति निगद्यते ॥

इयानेव तु विशेषः — यदात्मतादात्म्येनैव मनसः कामादयो विकाराः । कषायादौ तु स्वत एव रक्तिमादिरिति ।

अथवा

बुद्धिसत्त्वं च तद्वृत्तिभेदश्च मन उच्यते ।
आद्यं कामाद्युपादानं द्वितीयं करणं तु नः ॥
एवं चैतन्मनः सर्वं मनसेति च युज्यते ।
मनो महान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः ॥
प्रज्ञा संविच्चितिश्चैव स्मृतिश्चेति स्मृतौ स्मृतम् ।
अव्यक्तात् पूर्वमुत्पन्नो महानात्मा महामतिः ॥

इति प्रकृत्य —

य उत्पन्नो महान् पूर्वमहङ्कारः स उच्यते ।
इत्युक्ता मनसो बुद्धेर्महतोऽहङ्क्रियैकता ॥
उद्भवर्हात्मनश्चैव मनः सदसदात्मकम् ।
मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥
इति भेदविकल्पश्च वृत्तिभेदे विनीयताम् ।
अहङ्कारगताः कामसङ्कल्पाद्याः स्वसाक्षिकाः ॥
महतो बुद्धिसत्त्वस्य वृत्तिभेदाः पृथक्क्रियाः ।
मनो बुद्धिरहङ्कारश्चित्तं चेति श्रुतौ श्रुताः ॥

'मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च चित्तं च चेतयितव्यं चे'त्यादौ । न चैवं कर्तृकरणभेदे शब्दभेदेन मतानुज्ञा, अभ्युपगमभेदात् । अग्निसंयोगेन सुवर्णादौ द्रवत्वादिवदात्मनि मनोयोगेन कामसङ्कल्पादिविक्रिया लौकिकप्रज्ञेन 'अज आत्मा महान् ध्रुवः' इत्यादिशास्त्रबाध्येन परेणोपगम्यन्ते । अस्माभिस्तु कषायोपाधिक इव रक्तिमसम्भेदः पटे स्वभावविशदे चिदात्मनि कूटस्थे बुद्ध्युपाधिकः कामादिसम्भेद इति । तदेवं तृतीयानिर्देशाविरोधात् । अग्रे च 'प्राणोऽपान' इत्याद्यनुक्रम्य 'एतत् सर्वं प्राण एवे'त्यभेदवृत्तिसामानाधिकरण्यसमभिव्याहारात् । प्राणादीनां तत्त्वैकत्वे सति वृत्तिभेदमात्रत्वान्मनसोऽपि वृत्तिभेदा एव कामादयो भवितुमर्हन्ति । 'पञ्चवृत्तिर्मनोवद् व्यपदिश्यते' (ब्र०. २. ४. १२) इति च सूत्रम् । वृत्तिभेदवत्त्वे चायं दृष्टान्तो मनोवदिति । न च 'यः कश्च शब्दो वागेवे'ति कामादिवाक्यानन्तरवाक्ये वागिन्द्रियशब्दसामानाधिकरण्यवद् निमित्तनैमित्तिकत्वेन 'एतत् सर्वं मन एवे'त्यपि स्यादिति शङ्कयम् । मुख्यसम्भवे सत्युपचारायोगेन प्रत्युक्तत्वात् । अथवा नेह वागिति वागिन्द्रियमुच्यते, 'वाक् तन्तिर्नामानि दामानी'ति श्रुतशब्दसामान्यग्रहणोपपत्तेः । 'सैषा वाग् वनस्पतिषु वदति, या दुन्दुभौ, या तृणवे, या वीणायामि'ति दीक्षितदण्डदानार्थवादे च वाक्छब्दस्य शब्दसामान्यपरत्वात् । नहि वागिन्द्रियं दुन्दुभ्यादेरिति । अत एव 'वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ती'ति नाम्नां प्रकृत्यादिरूपा वाङ् निर्दिश्यते । अथापि कथञ्चिद् 'अतो हि नामान्युत्तिष्ठन्ती'ति च 'एतद्धि नामानि बिभर्ती'ति च निमित्तेऽपि वागिन्द्रिये नीयेत, 'एतद्धि नामभिः सममि'ति तु दुर्नयम् । नहि सममिति साधारणमित्यर्थः, सर्वैर्नामभिरिति तृतीयानाज्ञस्यात् । समं तुल्यमन्यूनाधिकमभिन्नमेकमित्यर्थतोऽपि सामज्ञस्यसम्भवे दारादिबहुवचनादिवच्छब्दस्वभावायत्तत्वाश्रयणायोगात् । न चैवमत्र प्रकरणे वाचस्तादर्थ्ये सति 'वाङ्मयो मनोमयः प्राणमय' इति निर्देशविरोधः, वागिन्द्रियग्रहणेऽपि 'यः कश्च शब्दो वागेवे'ति निर्देशविरोधात् । वेणुवीणादिशब्दस्यावागिन्द्रियनिमित्तत्वेन सामानाधिकरण्योपचारस्याप्यसम्भवात्, शब्दगोचरवृत्त्युपाधौ वाङ्मयत्वोपचारोपपत्तेश्च । वस्तु

तम्तु 'यः कश्च शब्दो वागेवे'ति वागिन्द्रियमेवोच्यताम्। वाक्पदवृत्तिनिमित्तं च शब्दकरणेन्द्रियत्वम्, अन्यानिरूपणात्। तथाच विशिष्टोपस्थितौ सामर्थ्यात् 'सविशेषणे हीति' न्यायेन वागिन्द्रियविशेषणीभूतशब्दसामान्याभेदालम्बनं तद्वृत्तिभूतयावद्विशेषशब्दसामानाधिकरण्यं सङ्घटिष्यते। अन्ये तु — शब्दसमष्टिरेव वागिन्द्रियमिति सामानाधिकरण्यमुख्यतामाहुः। तस्माद् वृत्तिवृत्तिमदभेदेन सामानाधिकरण्यान्मनउपादानाः कामादय इति युक्तमुत्पश्यामः। एवञ्च 'कामा येऽस्य हृदि श्रिताः', 'मनसि मे सुखं' 'तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य', व्येतु ते मनसो व्यथेत्यादिव्यपदेशाः पादे मे वेदनेत्यादिवद् न गौणा नेतव्याः। न चात्मधर्मो ज्ञानं मनः क्वचिदुच्यते, येन तान्त्रिकमत्या ज्ञानवृत्तिभेदा एव कामादयः स्युरात्मधर्माः। तद्धर्मकाहङ्कारस्य मनोबुद्ध्यादिसामानाधिकरण्यं च दर्शितम्।

कथं पुनरीश्वरस्यामनसः कामादि[1] सङ्गच्छेत। मा सङ्गत, अस्यैव एतानि सर्वाणि निःश्वसितानीति कामसङ्कल्पाद्यनपेक्षमेव सृष्टिश्रवणात्। तथाच श्रुतिः 'देवस्यैष स्वभावो ही'ति। 'सोऽकामयत', 'सत्यकामः सत्यसङ्कल्पः' इत्यादेश्च लोकदृष्ट्या कार्यसिद्धिमपेक्ष्य ज्ञानस्यैव कामादित्वोपचारोपपत्तेः। 'यस्य ज्ञानमयं तपः' इत्यादिलिङ्गात्। अथवा अन्तःकरणसमष्टिशक्तिमयमायोपाधिकः स भविष्यति। तस्या एव तदवच्छेदेन मनश्शब्दत्वाविरोधात्। न चैवं कामसङ्कल्पादिमूलकार्यस्य स्वप्रयोजनाभिसन्धिपूर्वकत्वनियमाद् 'लोकवत्तु लीलाकैवल्यम्' (ब्र० २. १. ३३) इति न्यायविरोधः। प्रेक्षापूर्वक[2]कार्यस्यैव तथात्वनियमात्। प्रयोजनाभिसन्धिमात्रापेक्षा तत्रेति चेत्। अन्यत्रापि स्याद्, भूतानुग्रहस्य प्रयोजनत्वात्। यथाहुः साङ्ख्याः 'तस्य स्वप्रयोजनाभावेऽपि भूतानुग्रहः प्रयोजनमि'ति।

यद्येवमात्मनो न कामादिः, कस्य तिरोधानं 'पराभिध्यानात् तु तिरोहितम्—'(ब्र० ३. २. ५) इति सूत्र्येत। सतो हि तिरोधानं नामेति। उच्यते—मायोपाधिकस्तावदीश्वरस्य सत्यकामसङ्कल्पादिरुपेयते। अस्याश्च सत्यकामादिशक्तिमय्या खिलो घनो बुद्धिरङ्गारकण इवाग्निना तदुपहितात्मना अविभक्त-


---

१. 'दिः', २. 'र्वका' ख. पाठः.

वृत्तिरेव भवति । तथाचेश्वरांशस्य जीवस्य सैन्धवखिल्यस्य तद्रसाभिव्यक्तिवत् सत्यकामाद्यभिव्यक्तिशङ्कायामिदमुच्यते तिरोहितमविद्ययेति । परमेश्वराभिध्यानात् तु तिरोधानापनये सत्यकामत्वाद्याविर्भवति , यत्रेदमाम्नायते 'स यदि पितृलोककामो भवती'त्यारभ्य 'यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठती'ति । अथवात्माभेदादेव मायोपाधिकमपि ज्ञातैश्वर्यादि जीवस्याशङ्क्याविद्ययाहमभिमानलक्षणया तिरोहितं पराभिध्यानादाविर्भवतीत्युच्यते । यत्रेदमाम्नायते—

"तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः"

इति । तस्मात् स्वावधिबाधाविषयकामादिधर्म्यहमनात्मा । कादाचित्कधर्मबाधानवधिभूतस्य विकारिणोऽप्यात्मत्वे 'अविकार्योऽयमुच्यते' इत्यादिविरोधात् , परिच्छेदाच्च घटादिवत् । न चाज्ञानत्वमनहन्त्वं वोपाधिः , स्वतः परिच्छिन्नस्याज्ञानत्वनियमाद् अहन्त्वेऽपि प्रकृतिपरिणामभेदस्यानात्मत्वाच्च ॥



मुक्तावहमभावः ।

अत एव न मुक्तावहम्भावोऽनुवर्तते , अविद्ययाहम्भूतस्यात्मनो विद्यया तद्बाधे केवलस्वरूपपरिशेषात् । स्वस्मै स्वयं भानं चानन्यदीयप्रकाशत्वादित्युक्तम् । अहमित्येव मोक्षीयतः स्वरूपानुगमेन मोक्षस्य पुमर्थत्वोपपत्तेः । अहङ्कारानुगमेऽपि चाधिकारिसिद्ध्या शास्त्रप्रामाण्यं चोपपादितम् । न च ज्ञानादिधर्म्यहमित्येव स्वरूपं , तस्यानर्थोपादानतया मुक्तस्यापि कदापि तदुन्मेषप्रसङ्गात् । 'न पश्यो मृत्युं पश्यती'त्यादिशास्त्रस्य प्रसङ्गापरिपन्थित्वात् । केवलसंविदात्मवादे तु नायं प्रसङ्गः । अविद्याहङ्काराद्यनर्थोपादानबाधात् । परस्य पुनरहमित्येव ह्याविद्यानुवर्तेत । 'अहं ममेत्यविद्येयम्', 'अविद्याहम्मतिः स्त्रियाम्' इत्यादिदर्शनात् , अतद्रूपप्रतिष्ठत्वाच्च । अहमित्येवात्मेति हि नाद्यापि निर्व्यूढं मानानिरूपणात् । यत्त्वन्यार्थं दर्शनमुक्तं तत्र ब्रूमः — वामदेवादीनां हि प्रागहङ्कारसम्भेदेनैवात्मव्यवहाराद् विद्याविषयेऽपि तेनैवोपलक्ष्यव्यवहारोऽहं मनुरभवमित्यादिः, केवलप्रत्यगात्मविषयशब्दान्तराभावात् । तथाच स्मृतिः—

"ममेति यन्मया चोक्तं न सदेतन्न चान्यथा ।
नरेन्द्र! गदितुं शक्यमपि विज्ञेयवेदिभिः ॥"

इति । कारणात्मनश्चाहङ्कारसमष्टिशक्तिमयमायोपाधिक एव तद्व्यवहारो हन्ताहमित्यादिः ।

यद्वा योऽयमहंवादो दर्शितः परमात्मनः ।
लोकदृष्ट्यनुरोधेन श्रुतेर्वचनमेव तत् ॥
अहं पतेयमित्येषा शिला पतति पर्वतात् ।
इत्यन्ययत्नानपेक्ष्याज्जडमप्युपचर्यते ॥
एवं परात्मा मायावी जगदात्मा विवर्तते ।
स्वयं कर्तेति नः प्राह श्रुतिर्लोकानुवर्तिनी ॥
अवतारेष्वहंवादस्त्वहङ्कारोपसङ्ग्रहात् ।
तत्त्वविद्भामदेवादेरिवानहमि युज्यते ॥

न च मुख्यसम्भवः । 'ममेत्युक्तं न सदि'त्यात्मन्यस्मत्प्रयोगस्यासाधुत्वस्मरणात् । अत एव 'अनात्मन्यात्मबुद्धिर्या' इत्यविद्यास्थाने 'पञ्चभूतात्मके देहेऽहमिति मतिं कुरुते' इति निवेशाद्

"आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कलेबरे ॥"

इति व्यतिरेकवचने चात्मग्रहणादहमेवात्मेति निरस्तम् । किं देहे केवलात्मभावाभिनायकशब्दान्तराभावादहमिति मतिरित्याहेत्येवमर्थमात्मग्रहणं व्यतिरेकवचने, किं वा अहमित्येवात्मेत्येवमर्थमिति नियामकापेक्षायां, 'ममेत्युक्तं न सत्', 'न चान्यथा गदितुं शक्यमि'त्यतः प्रथमकल्पव्यवस्थानादिति ।

केचित्तु — हिरण्यगर्भादीनामेवायं ब्रह्मात्मना सर्वकारणत्वाभिनयरूपः श्रुतिस्मृतिप्रपञ्च इति तदुपाधिकः परमात्मन्यहंव्यवहारः

"ओं नमोऽहंपदार्थाय पराहन्तास्वरूपिणे ।
नमो हिरण्यगर्भाय हरये शङ्कराय च ॥"

इति पाद्मोक्तेरिति वदन्ति ।

---

१. 'परमात्मोक्ते' ख. पाठः.

एवञ्च नह्यहङ्कारो नामरूपव्याकर्ता, न वा क्षराक्षरातीतः, नापि जगत्प्रभवः, न वा चिदचिदन्तरात्मा, न वा मुक्तिप्रद इत्युपालम्भो डिम्भदासजनविस्रम्भणसम्भ्रम एवेत्युपहास्यः ।

यत्तु — प्रकृतिपरिणामभेदोऽन्यो वाहङ्कारः क्षेत्रान्तर्भूतोऽन्यथा वास्मदर्थ एव तु नात्मेति । तत्र ब्रूमः । प्रत्यगात्मनोऽपि तावदहङ्कारशब्दत्वमिष्टम् 'अथातोऽहङ्कारादेशः' इत्यादौ । किमसावहमिति कारोऽस्मिन्निति योगकल्पनयात्मनि वर्तताम्, उत स एवाहङ्कारशब्दः कथमपि वर्तताम् । वयं तु पश्यामः — योगकल्पनातो वरं रूढिपूर्विका लक्षणा, प्रथमप्रत्ययाविघातात् । दृष्टा च कालविशेषवाचिदर्शादिशब्दस्य तत्सम्बन्धनिमित्ता कर्मविशेषवृत्तिः । एवमिहाप्यहङ्कारोपधाननिमित्ता तत्पदवृत्तिरात्मनि स्यात् । सम्भवाद्, 'अहङ्कारोऽध्यात्ममहङ्कर्तव्यमधिभूतम्', 'अहङ्कारश्चाहङ्कर्तव्यं च'

"मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्",
"अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा"

'महाभूतान्यहङ्कारः', 'अहङ्कारे तथा मनः', 'अहङ्कारं तथा बुद्धौ',

"अहमित्येव सम्भूतो द्वितीयः सर्ग उच्यते"

इत्यादिषु प्रयोगप्राचुर्येणाहङ्कारशब्दस्याव्यक्तपरिणामभेदे रूढत्वाच्च । यदिकामं च्विप्रत्ययमन्तर्भाव्यान्यथा वा तत्रैवायं व्युत्पाद्येत, प्रवृत्तिनिमित्तवैशद्यफलत्वात् । न त्वन्यत्र वृत्तिभेदकल्पना, गौरवात् । अत एवाहङ्कारपर्याया विज्ञानादिशब्दा अप्यात्मनि प्रयुज्यन्ते 'विज्ञानं यज्ञं तनुते', 'प्राणबन्धनं हि सोम्य ! मनः' इत्यादौ । एवमात्मनोऽहम्भावोऽपि तदुपाधिक एव स्याद्, न स्वतः । अहङ्कारान्यत्वे सत्यहंशब्दप्रत्ययविषयत्वाद् देहादिवत् । त्वयैव तस्यानहम्यहम्भावकरणत्वेनाहङ्कारशब्दत्वोपपादनात् । अत एव

"अहं ममेत्यविद्येयं व्यवहारस्तथानया"

इत्यात्मन्यहम्बुद्धेरविद्यात्वमुक्त्वा,

"परमार्थस्त्वसंलाप्यो गोचरे वचसां न सः"

---

१ 'रः' ख. पाठः,

इति विशुद्धचिदात्मनोऽहंशब्दाद्यविषयत्वं दर्शयति। अहम्भावस्य स्वाभाविकत्वे च तदयोगः। 'परमार्थस्तु संलाभः' इति पाठे तु परमार्थं सत्तानन्दप्रकाशात्मानं सम्यक् फलतया व्यवहाराद् विशिष्यते तत्राहमिति व्यवहारहेत्वविद्याभावं दर्शयतीति गमयितव्यम्। कौर्मे च —

"एक एव महानात्मा सोऽहङ्कारोऽभिधीयते।
स जीवः सोऽन्तरात्मेति गीयते तत्त्वचिन्तकैः॥"

इति। प्राणधारणोपाधित्वाज् जीव इत्युपचारादात्मनोऽहम्भावादिरपि तदुपाधिक इति गम्यते।

"तेनाविवेकजस्तस्य संसारः पुरुषस्य तु"

इति वाक्यशेषे संसारस्य तदुपाधिकत्वाभिधानाच्च। "अहमित्येव सम्भूतः" इत्यादिदर्शनात् तस्मिन्नेवास्मदर्थेऽनुगमादात्माप्यस्मदर्थ उच्यते॥

अहङ्कारादेशवाक्यार्थः।

अन्यथा 'अथातोऽहङ्कारादेश' इत्युक्त्वा 'अथात आत्मादेश' इति पृथङ् नाम्नायेत। अहङ्कारस्यैव तवात्मत्वात्। 'स एवाधस्ताद्' इत्यादिना परमात्मनोऽपि पृथगुपदेशात्। तथोपदिष्ट एवासौ केन रूपेण ग्रहणीय इत्यपेक्षितेऽहमित्येव ग्रहणीय इत्यहङ्ग्रहविधिपरम् 'अथातोऽहङ्कारादेशः' इत्यादि,

"मत्तः सर्वमहं सर्वं मयि सर्वं सनातने।
सर्वगत्वादनन्तस्य स एवाहमिव स्थितः॥"

इत्यादिदर्शनात्। तदुपयोगितया च 'अथात आत्मादेशः' इति तस्यैवान्तर्यामित्वेनोपदेश इति त्रिविधोऽप्युपदेशः परमात्मविषय एवेति चेत्। न। अहमिति कारः करणमिति सामानाधिकरण्ये करोतेः 'उदरमन्तरं कुरुते' इत्यादौ तव ज्ञानार्थत्वमनिच्छत इह तदुपगमविरोधात्। कारशब्दस्य कर्मवृत्तावहमिति विकल्पस्य क्रियमाणत्वविशेषणेन ध्यानरूपत्वलाभेऽप्यहङ्ग्रहस्याधुनैव विधेयत्वेनाहमिति क्रियमाणस्यादेश इति सिद्धवद्वचनानुपपत्तेः।

---

१. 'ष्टमेवा' ख. पाठः.

अहीमत्यस्य प्रत्ययस्य कारः करणमादिश्यत इति प्रकृत्य 'अहमेवाधस्तादहमुपरिष्टादहं पुरस्तादहं पश्चादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्' इति स्वरूपोपदेशोपसंहारविरोधात्। न खल्विदं 'मत्तः सर्वमि'त्यादिवदुपासकस्याभिनयरूपं, येन शास्त्रीया दृष्टिरेषेति स्वत एव प्रतीयेत। आत्मतत्त्वं जिज्ञासमानाय हि नारदाय सनत्कुमारोपदेशरूपं प्रकरणम्। तत्राहमेवेदं सर्वमिति धारयेदिति गौरवाय परं निमित्तं कल्प्येत। न च 'तरति शोकमात्मवित्', 'भूमा त्वेव विजिज्ञासितव्यः', 'स वा एष एवं पश्यन्नेवं मन्वानः' इत्याद्युपक्रमोपसंहारादिना ज्ञानविधिपरत्वं प्रकरणस्यावगन्तव्यम्। अत्र प्रकरणे ह्युपासने विधिलिङो नाम ब्रह्मत्युपास्स्वेत्यादिवद् भूमानमुपास्स्वेति श्रूयेत। 'तरति शोकमात्मविदि'ति तु 'स एवाधस्तादि'त्याद्युपदेशे प्रधाने स्वरूपमात्रावसायिनि फलार्थवादः। 'भूमा त्वेव विजिज्ञासितव्य' इति च न विधिः, भूमस्वरूपोपदेशश्रद्दधानमात्रफलत्वात्। 'भूमानं भगवो विजिज्ञासे' इत्युत्तरे तदाविष्करणात्। समभिव्याहृतस्य च फलावचनादविधिलिङेतेऽपि ज्ञाने विज्ञानं त्वेव विजिज्ञासितव्यं, मतिस्त्वेव विजिज्ञासितव्या'इत्यादेरनन्यफलत्वाच्च। न च 'एवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणः' इत्यादिना विधेयाद्भूतफलं जीवस्य प्राणादिहेतुत्वं प्रतिपाद्यते। उपासकस्य मुक्तस्य जगद्व्यापारवर्जं भोगमात्रसाम्याभ्युपगमाद्, ब्रह्मणश्चापश्यतोऽप्यात्मनः प्राणादिहेतुत्वेन 'एवं पश्यत' इति विशेषणानर्थक्यात्। किन्त्वात्माभेदे विवक्षिते मा जगत्कारणत्वादि वैधर्म्यमाशङ्कीति तदात्मन एव विजानत इति केवलमपदिश्यते, न तु तत् प्रतिपिपादयिषितमित्यसकृदावेदितम्॥

भूमवाक्यार्थः।

अपिच 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' इति प्रतिषिद्धाशेषभेदे न शक्यमुपासनं विधातुं, विधेरधिकारिविषयादिभेदसापेक्षत्वात्। न चात्र यत्र सकलविभूतिविशिष्टे विपुलतमे ब्रह्मण्यनुभूयमाने नान्यत् पृथग्भूतं स्वतन्त्रं पश्यतीत्यार्थ्यकल्पनावकल्पते, अयथाश्रुतेरधिकाभावाच्च। विशिष्टाभेददर्शनं च सर्वभेदापवादेन प्रत्यवोचाम।

---

१. 'विज्ञा' ख. पाठः.

यत्तु अत्र केनचिदुत्प्रेक्षितं — यथा लोके किञ्चिद्विषयसुखमनुभवन्नप्यधिकसुखलिप्सया नृत्तगीतादिविषयान्तरदर्शनाकर्णनादिषु व्यासजति, एवं यत्रास्वाद्यमानेऽन्यन्नृत्तगीतादि न पश्यति न शृणोति न विजानातीति भूम्नः सुखस्य विगलितवेद्यान्तरमास्वादनीयत्वप्रतिपादनमुखेन निरतिशयोत्कर्षः प्रतिपाद्यते । 'नाल्पे सुखमस्ती'ति कीटादिहिरण्यगर्भान्ते सुखमात्रनिषेधायोगेन निरतिशयसुखे निषेध्ये 'भूमैव सुखमि'ति निरतिशयसुखत्वविधिलाभात् । अथवा यत्र दृष्टे नान्यत् प्रकृतसुखविरोधि दुःखं पश्यतीत्याद्युच्यते । तथाचोपसंहारः—

"न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्"

इति । सर्वथैव न भेदप्रतिषेधः, प्रकृतार्थानुगुणत्वादिति ।

तदसारम् । 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदि'ति 'सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु' इत्युपसन्नाय नारदाय 'आनन्दं ब्रह्मणो विद्वान् न बिभेती'ति श्रुत्यन्तरात् 'सुखं त्वेव विजिज्ञासितव्यम्' इत्यवतारिते तज्जिज्ञासमानाय 'यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखमि'त्यादिक्षत् सनत्कुमारः । यद् बहु तत् सुखमित्युक्ते मा सविशेषं बोधीति बहोर्भावः सत्तामात्रं भूमा निर्दिश्यते । 'धातुः प्रसादान्महिमानमीशं', 'स य एषोऽणिमैतदात्म्यमि'त्यादावपि तुल्योऽयं चर्चः । एवं प्रत्ययार्थवत्त्वे सम्भवति बह्वन्नं पच्यते यत्राल्पं वा बहु वा यस्य श्रुतस्योपकरोति य इत्यादिवदल्पप्रतिद्वन्द्वितया निर्देशलिङ्गमात्रादधिकवचनो बहुरेव भुमेति न भावभवित्रभेदोपचारकल्पना युक्ता । न खलु 'नाल्पे सुखमस्ती'ति जीववर्गे निरतिशयसुखं प्रतिषिध्यते, येन भूमैव सुखमिति निरतिशयसुखत्वविवक्षा लक्ष्येत । अल्पं परिमितं परिच्छिन्नमिति ह्यनर्थान्तरम् । सप्तमी च नाधारे, भूमा सुखमिति सामानाधिकरण्यप्रक्रमात् । किन्तु निर्धारणे । तथाच नाल्पे परिच्छिन्ने प्रपञ्चे किञ्चिदपि सुखमस्ति । सर्वस्य दुःखान्तत्वादापेक्षिकं तु तत् । भूमैव सुखं, स्वभावानन्त्यादिति सर्वदुःखहेतूपशमापेक्षयावधारिते, तदुपपादनाय भूमजिज्ञासामवतार्य तस्येदं लक्षणमुच्यते 'यत्र नान्यत् पश्यती'त्यादि । कथं चैवं, नारदः शोकपारं तार्येत, यदि सदन्यदशक्यं द्रष्टुं श्रोतुं विज्ञातुं चेति

भेदमात्रापवादोऽभिप्रेयेत । द्वैतदर्शनमूलो हि सकलः शोकः । तदभावे तीर्णो हि तदा सुतौ सर्वान् शोकान् हृदयस्य भवति । श्रुतिश्च द्वैतदर्शनादिमूलं भयादि दर्शयति 'द्वितीयाद् वै भयं भवति', 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति',

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"

इत्याद्या । एवञ्च यत्रास्याद्यमान इत्यधिकारापेन नान्यदिति सामान्यशब्दस्य नृत्तादिविषयविशेषसङ्कोचेन च क्लिश्यन्तो दुर्वृत्ताः शोचितव्याः । 'यत्र त्वस्य सर्वमात्मैवाभूदि'ति श्रुत्यन्तरैकार्थ्येन यत्र सत्यन्यस्मिन् विद्याविषये नान्यत् पश्यतीति दुःखहेतुद्वैतमात्रनिषेधेऽपि निरतिशयसुखत्वलाभात् । एवञ्च 'न-पश्यो मृत्युं पश्यती'त्यायुपसंहारोऽपि घटते, द्वैताबाधे तदयोगात् । ननु स्वानुकूलतमभगवल्लीलोपकरणतया तदंशतया वा सदेव जगदनुभूयमानं सुखमेवेति दुःखादर्शनमुपपन्नम् । स्वप्रियतमस्वामिलीलोपकरणत्वेन तदंशतया वानुभूयमानोद्यानतदङ्गगुणादेः सुखत्वदर्शनात् । नहि किञ्चित् स्वभावतः सुखमेव दुःखमेव वा ।

"वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च ।
कोपाय च यतस्तस्माद् वस्तु वस्त्वात्मकं कुतः ॥
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय पुनः प्रसादाय च जायते ॥
तस्माद् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम् ।"

इत्यव्यवस्थास्मरणाच्चेति चेत् । न । व्यभिचारात् । प्रियतमात्मलीलोपकरणतया तदंशतया चानुभूयमानदुःकृत्तशरीरादेर्दुःखत्वदर्शनाद्, दुःखत्वेऽप्यव्यवस्थास्मृतेरविशेषात् । कर्मणा परिमितरूपानुभवनिमित्तं तद्दुःखत्वमिति चेद्, अलं तदंशत्वाद्यनुभवबलमाश्रित्य । कर्माभावे पृथगनुभूयमानस्याप्यदुःखत्वोपपत्तेः । भयशोकादि च भेददर्शनमात्रतन्त्रमित्यावेदितमिति भेदबाधादेव दुःखादर्शनमिति युक्तमिति ।

१, 'खल', २. 'या स' ख. पाठः.

एवमशेषभेदनिषेधेन सुखामृतात्मनि भूम्न्युपदिष्टे 'स भगवः कस्मिन् प्रतिष्ठितः' इति नारदस्य प्रश्न उपपद्यते । भावो हि भवितृप्रतिष्ठितो गोत्वादिर्लोकदृष्टः, सुखं च विषयप्रतिष्ठितं तदधीनमिति । तत्राद्यस्योत्तरं 'स्वे महिम्नी'ति । स्वशब्द आत्मवचनः । ङेः स्मिन्नभाव आर्षः । महतीत्युक्ते सविशेषं मावगामीति महिम्नीति भावो निर्दिश्यते । अत्र 'स्वयंदासास्तपस्विनः' इत्यादौ दासान्तरादिवदाश्रयान्तरस्य व्यावृत्तिर्विवक्षिता । भावो हि सत्तात्मा भवितृप्रतिष्ठित इति विभ्रमः । भाव एव त्वनुगतात्मनि महति भवितारो विशेषा अल्पे प्रतितिष्ठेयुरिति 'यदि वा न महिम्नी'ति । द्वितीयस्य कथं 'गोऽश्वमिह महिमेत्याचक्षते', 'नाहमेवं ब्रवीमि' न विषयसुखमिवामुष्मिन् प्रतिष्ठितं भूममुखं ब्रवीमि नित्यत्वादिति । अपिच 'अन्यो ह्यस्मिन् प्रतिष्ठितः' भूमानन्दस्तु निरस्तनिखिलभेदत्वाद् न क्वचित् प्रतिष्ठितः, सर्वात्मा हि स इत्युपपादनाय 'स एवाधस्तादि'त्यादिः प्रबन्ध इति नात्र शक्यमुपासनाविधानमवगन्तुम् । प्रकरणस्य निर्विशेषात्मपरत्वात् । किन्तु 'स एवेदं सर्वमि'त्युक्त्या मा भूदुपदेश्यस्य भूम्नि पारोक्ष्यभ्रमः आत्मनोऽपि मिथ्यात्वसंशयो वेति 'अथात आत्मादेश' इति वक्तव्ये, तस्य प्रत्यगात्मनः स्वरसतः सर्वैरहङ्कारगृहीतत्वात् कथं सर्वात्मा भूमेति मा शङ्कीत्यहङ्कारादेशेनैव पारोक्ष्यभ्रममाक्षिप्य[1] तैव पुनराशङ्का मानुवृतदिति अहङ्कारादात्मानं विवेचयितुं पृथगादेशः 'अथात आत्मादेश' इति श्लिष्टतरम् ।

केचित्तु — 'स एवाधस्तादि'ति बिम्बस्य तत्पदार्थस्य 'अहमेवाधस्तादि'ति प्रतिबिम्बस्य त्वम्पदार्थस्य चोपदिष्टे सार्वात्म्ये, तुल्यलक्षणतया तयोरभेदोपपत्तौ शुद्धस्य लक्ष्यस्य वाक्यार्थस्य सार्वात्म्यमुपदिश्यते 'अथात आत्मादेश' इत्यादिनेति व्याचक्षते । तदयुक्तमिव । 'यत्र नान्यत् पश्यती'त्यादिप्रतिषिद्धाशेषभेदस्यैव भूम्नः प्रकृतस्य 'स एवाधस्तादि'त्यवमर्शात् । पारोक्ष्यविभ्रमस्तु तच्छब्दप्रसञ्जितो निरसनीयः । भूमैवाधस्तादित्यादिनिर्देशोऽपि शब्दगत्या प्रमात्रव्यवधानाप्रत्ययात् । तज्ज्यापरोक्ष्यं वस्तूनाम् । यद्यपि देहोऽहङ्कारगृहीतः, तथापि नियमहेतुविरहादहङ्कारगृहीतमात्रादेव विविक्तस्यात्मनोऽहम्भावो न शक्यसम्पादः । नापि तस्याहमात्मत्वे परिमितस्य

---

१. 'मपाक्षि' ख. पाठः.

सार्वात्म्यमिति । यद्यपि चाहङ्कारादेशो हिरण्यगर्भविषयेऽपि शक्यः परिणेतुम्, 'आत्मैवेदमग्र आसीत् पुरुषविधः सोऽहमस्मीत्यग्रे व्याहरदि'ति श्रुतेरहङ्कारपदस्याभिमानवाचिनोऽजन्ततया वा तद्वदभेदोपचारेण वा अहमिति कृतिरभिमानो यस्येति व्युत्पत्त्या वा तत्र कथञ्चिद् वृत्तिसम्भवात्, तथापि न प्रकृतोपयोगः[1]। नहि बोध्यस्य हिरण्यगर्भो हि सर्वात्मा न भूमेति शङ्का समुन्मिषति, तस्य तदप्रसिद्धेः । अथवा समुन्मिषति तस्य पुनः सार्वात्म्योपदेशे किमुक्तं स्यात् । प्रत्युत स एव भूमेति मतिपर्यवसानं वा स्यात्, 'तरति शोकमात्मविदि'ति प्रकृतात्मवेदनाय तत्रैव भूम्नि वात्मादेशवृत्त्युपपत्तेः । तस्मादापरोक्ष्याय भूमानमहङ्कारविविक्तं प्रत्यगात्मानमवसाययितुमेवायं पृथगुपदेश इति नाहमात्मेति ॥

आत्मानहन्त्वानुमानम् ।

तथाचायं प्रयोगः — आत्मा न स्वाभाविकाहम्भावः सत्यपि सामग्र्ये तद्व्यभिचरितावभासत्वाद् व्यतिरेकेणाहङ्कारवत् । चिदात्मैव तदवभासे सामग्र्यमुभयसम्प्रतिपन्नम् । सुप्तादौ च तद्व्यभिचारं निरचैष्म । 'यस्य नाहङ्कृतो भावः' इति च स्मृतिः । अथवा यज्ञदत्तान्याहम्भावो न तस्यानौपाधिकधर्मः, अहम्भावत्वाद् यज्ञदत्ताहम्भाववत् । अन्यथा सुप्तादावपि तदवभासप्रसङ्गः । अथवा आत्माहम्भावबाधानवधिभिन्नस्वभावः, तद्भेदे बाधकाभावे सत्यबोधनीयतदभेदत्वे सति वा, पृथङ्निर्दिश्यमानत्वात्, फलान्तरवैधुर्ये सति पृथक्तुल्योपदेशत्वाद् वा, खण्डा कुण्डोध्नी बहूधस्या सुदोहा गौर्मुण्डा कुण्डोध्नीत्यादिव्यपदेशवत् । सामान्यव्याप्तौ भूम्नोऽप्यात्मनः पृथङ्निर्देशाद् मा भूद् व्यभिचार इति सर्वत्र सत्यन्तम् । तद्भेदे हि द्वयोः सार्वात्म्यविरोधः ॥

स एवाधस्तादित्यादिश्रुत्यर्थः ।

यत्तु — 'स एवाधस्तात् स उपरिष्टात्', 'आत्मैवाधस्तादात्मोपरिष्टात्' इत्यादिना सर्वगतत्वमुपदिश्यते, न सार्वात्म्यमिति । तत्र । उक्तानुक्तो-

---

१. 'तो यो', २. 'वनत', ३. 'शविषयव' ख. पाठः.

पसङ्ग्रहेण 'स एवेदं सर्वम्', 'आत्मैवेदं सर्वमि'ति सार्वात्म्योपसंहारविरोधात्। अथानुपजातविरोधसर्वगतत्वोपक्रमेण *वेदोपक्रमन्यायादुपजातविरोधसार्वात्म्योपसंहारः कथञ्चिन्नीयेत। न च '—सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५. ३. २७) इत्यविशेषस्मरणादुपक्रमे सन्दिग्धे 'सन्दिग्धे तु वाक्यशेषात्' (जै० १. ४. २९) इति न्यायादसन्दिग्धाभेदपरसामानाधिकरण्योपसंहारेण सार्वात्म्यपरत्वावधारणमिति वाच्यम्। व्यवहारप्राचुर्येण 'अधस्तादि'त्यादौ सप्तम्यर्थोपस्थितिप्राशुभावेन तदर्थसन्देहाभावादिति। नैवम्। अर्थान्तरेऽपि सत्यधोदेशे 'स एवे'त्याद्यवधारणविरोधेन किं नियन्तृतासम्बन्धेनेत्यध्याहृत्य नियन्त्रन्तरनिषेधार्थमवधारणमस्तु, उत यथाश्रुति सामानाधिकरण्यावगतस्वरूपाभेदे नीलमुत्पलमित्यादाविव पदोपस्थापितरूपभेदवैशिष्ट्यबाधार्थमवस्थाप्यतामिति तदर्थसन्देहोन्मेषात्। एवं च यदा 'त्रिवृद् बहिष्पवमानम् आदित्यः प्रायणीयः पयसि चरुः आश्वबालः प्रस्तरः' इत्यादौ त्रिवृत्त्वबर्बाश्ववालादेस्त्रैगुण्यस्थालीवाजिवालादावेव सिद्धामपि लौकिकप्रतिपत्तिमपह्नुत्य स्तोत्रीयानवकौदनकाशादावप्रसिद्धापि वाक्यशेषस्था प्रतिपत्तिराद्रियते 'शास्त्रस्था वा तन्निमित्तत्वात्' (जै० १. ३. ९) इति। तत एव तदर्थो व्युत्पत्स्यत इति। तदा किमङ्ग! पुनर्व्याकरणानुशिष्टलोकानुगता प्रातिपदिकार्थमात्रप्रतिपत्तिरिति। तस्माद् भेदे भूमात्मनोः सार्वात्म्यविरोधादभेदस्य चानवगतत्वेन बोधनीयत्वाल्लौकिके चाहङ्कारसम्भेदेनाप्यात्मनो भेदे तुल्योपदेशस्याभेदपरत्वाद् भूमात्मनोरभेद एव। तत्र च फलं भूम्नः पारोक्ष्यनिवृत्तिः। नैवमहङ्कारस्य सार्वात्म्यमुपदिश्यते, प्रकृतिपरिणामस्य तदयोगात्। आत्मनश्च द्विस्तदुपदेशानर्थक्यात्। नह्यस्मादुपदेशात् प्रागहङ्कारभेदः प्रतिपन्नः, येन तुल्योपदेशस्तदभेदफल उत्प्रेक्ष्येत। अहङ्कारमुपादायात्मन एव सार्वात्म्योपदेशप्रयोजनं त्वावेदितम्। न च लौकिकोऽहमभेदो बोधनीयः। एवं सति नात्मनोऽहङ्कारव्यतिरेकादन्यत् पृथक् तुल्योपदेशफलमालक्षयितुं शक्यमिति। न चैवम् 'अहं ब्रह्मास्मी'त्या-

---

१. 'षणम्म', २. 'ल्लोके' ख. पाठः.

---

* जैमिनीये तृतीयस्याध्यायस्य तृतीयपादे प्रथमाधिकरणम्।

द्युपदेशविरोधः, सत्तामात्रवाक्यार्थव्यवस्थापनात् । यत्तु — अहङ्कारात्मानौ परस्परं भिन्नौ, अज्ञातभेदत्वे सति पृथङ्निर्दिश्यमानत्वाद् व्यतिरेकेण ब्रह्मात्मवदिति । तदयुक्तम् । 'यजति', 'ददाति', देवो देवदत्तः, खण्डो मुण्डः इत्यादाविव शब्दान्तरत्वादहङ्कारात्मभेदस्य ज्ञातत्वादसिद्धेः । प्रागस्मादुपदेशादज्ञातभेदत्वे सतीति विशेषणे च भूमात्मभेदोऽपि तर्हि प्रागस्मादुपदेशादज्ञात एव, प्रतियोगिनो भूम्नोऽविज्ञानादिति व्यभिचारात्, सोऽयमित्यादावज्ञातभेदत्वे सति पृथङ्निर्दिश्यमानत्वेऽपि तदेतयोरभेदेनानैकान्त्याच्च, अभेदमानविधुरत्वस्योपाधित्वाच्च । न चाहमात्मा, ज्ञातृत्वाद् व्यतिरेकेण घटादिवदिति युक्तम् । अहंवृत्तेरसन्मते ज्ञानपदवृत्तिनिमित्तस्य तव ज्ञानत्ववदज्ञानत्वात् । संविदाश्रयत्वं चासिद्धम्, ज्ञानपदाभिधेयाश्रयतामात्रस्य तवानात्मनि विषयसंविदि व्यभिचारात् । लाघवेन घटादावज्ञानत्वमेवानात्मत्वप्रयोजकमित्यावेदितम् ॥

कर्मकर्तृविरोधचिन्ता ।

अपिचाहमात्मत्वे मामहं जानामीति कर्मकर्तृत्वानुभवविरोधः । स्यादेतत् । न तावत् तदनुभवयोरनैकान्त्यानुमेयज्ञानवत्स्वभावविरोधकल्पनाहेतुं पश्यामः । न च विषयविरोधः, नहि परसमवेतक्रियाफलशालित्वं कर्मत्वं, परत्र फलहेतुक्रियाश्रयत्वं वा कर्तृत्वं, येनैकत्राहमात्मनि ते विरुध्येयाताम् । वृक्षात् पर्णं पततीत्यादौ पर्णपतनक्रियाजन्यविभागफलशालिनो वृक्षस्यापि कर्मत्वापत्तेः । अथास्तिभवतियततितिष्ठत्यादयः कर्तृस्थभावाः । करोतिपचतिपठतिपश्यत्यादयः कर्मस्थभावाः । तत्रान्त्याः परत्र स्वजन्यफलाव च्छिन्ना धातुभिरभिधीयन्ते, नाद्याः । तथाच परसमवेतक्रियाप्रतिपत्त्यनुबन्धि तत्फलशालित्वं कर्मत्वमनतिप्रसङ्गीति चेद्, न । कुठारमुद्यच्छतीत्यादौ उद्यमनक्रियाप्रतिपत्त्यनुबन्ध्यूर्ध्वदेशसंयोगफलशालिनो देशस्यापि तत्प्रसङ्गात् । किन्तु करणव्यापारविषयत्वं कर्मत्वं, प्रकृतक्रियाश्रयत्वं च कर्तृत्वम् । तच्च मनोव्यापारविषयस्याहमो ज्ञातुरविरुद्धम्। न च तस्यैव तदैव तस्यामेव क्रिया-

यामेकस्य कर्तृतया कर्मतया च गुणप्रधानभावप्रत्ययविरोधः, रूपभेदोपपत्तेः। अन्यथा तस्मिन्नेव यागे तस्यैव कर्तृतया गुणत्वमधिकारितया प्राधान्यं चेति बादरिनयस्थितिव्याकोपादिति ।

अत्रोच्यते — 'कर्तुरीप्सिततमं कर्म', 'तथायुक्तं चानीप्सितम्' (१. ४. ४९, ५०) इति पाणिनीयं दर्शनं कर्तृसमवेतक्रियाविषयः कर्मेति पर्यवस्यति । अन्यथा इतरेतरमव्याप्तेः । तत्त्वं च तत्क्रियोद्देश्यतया तद्व्याप्यतया वा । साध्यत्वं स्वरूपेण वा स्यात् स्वगतविशेषेण वा । गामिच्छति द्वेष्टीत्यादौ च स्वसम्बन्धितयान्यथा च गवादेरपि साध्यत्वात् । 'अकथितं च' (१. ४. ५१) तद्रूपतां न व्यभिचरति । इच्छादिकरणमनोव्यापारविषयत्वं तु गामिच्छतीत्यादावव्याप्तम् । विषयसौन्दर्यादिज्ञानमपि तत्करणमिति चेत्, तथापि तस्य तद्विषयव्यापारान्तराभावादव्याप्तम् । कर्तृत्वं च न प्रकृतक्रियाश्रयत्वमेव, शरेण शूरेण हन्यत इत्यादौ हन्तिक्रियाश्रये करणेऽतिव्याप्तेः । प्रतिपत्त्यनुबन्धितत्क्रियाश्रयताकत्वमपि ह्यत्र न विशिष्यते, कर्मनिबद्धक्रियया कर्तृकरणान्वयाविशेषात् । किन्तु 'स्वतन्त्रः कर्ता', 'तत्प्रयोजको हेतुश्च' (१. ४. ५४, ५५) इति क्रियोपकरणप्रयोजकः कर्तेत्युच्यते । तत्प्रयोजकत्वं च फलावधिक्रियानुकूल्यापादनं क्रियया सङ्कल्पेन सन्निधिनैव वा स्यात्। तत्रैवं सत्यहङ्कारः कर्ता स्वसमवेतज्ञानक्रियया न साध्यः, स्वरूपेण प्रागेव सत्त्वात् । नापि ज्ञाततया, ज्ञानजज्ञाततानिरासात्[1] । अज्ञाननिवृत्तिश्च न ज्ञानादतिरिच्यते । अतिरिच्यमानयापि तया न ज्ञानक्रियाया उद्देश्यतया साध्यः । कर्तुस्तत्साध्यतोल्लेखनं ह्युद्देशोऽहमि ज्ञातेऽज्ञाते वा न युज्यते । अत एव न तद्व्याप्यतयापि विषयः । स्वयम्प्रकाशचिदात्मनो नित्यापरोक्षस्याज्ञाननिवृत्त्या स्वरूपावभासेन वा रूपान्तरेणापि साध्यत्वायोगात् । अहमात्मजाड्यमतेऽपि न ज्ञानादज्ञाननिवृत्तिरवभासो वातिरिच्यते, प्रागभावनिवृत्तिः प्रतियोगी अर्थप्रकाशो बुद्धिरिति चोपगमात् । नहि ज्ञानमुत्पद्याहमा सम्बध्यते , येन स्वसमवेतज्ञानसम्बन्धितयापि साध्येत । सम्बध्यैव तूत्पद्यते । निर्विषयाश्रयविषयसंवित्सत्त्वौनभ्युपगमात्[2] । अपिचैकत्रैकदैकस्य गुणप्रधानभावप्रत्ययो विरुध्यते । अत एव भिन्ननिरूप्योऽपि गुणप्रधानभावस्तस्यैव तदैवाशक्यज्ञानो

---

१. रव्या', २. 'त् ज्ञा', ३. त्ता' ख. पाठः.

विरोधादिति *'वाजपेयेन यजेते'त्यत्र द्रव्यपरतामपहाय वाजपेयपदस्य नामधेयत्वमाश्रितम् । 'सोमेन यजेते'त्यादौ मत्वर्थलक्षणा च । अत एव च भेदलिङ्गं 'कर्मकर्तृव्यपदेशाच्च' (ब्र० १. २. ४) इति सूत्रितम् । न च वयमेकस्यैकत्र रूपभेदेन गुणप्रधानभावं स्वतो विरुद्धमातिष्ठामहे, अपि तु प्रत्ययतः । तथाच यागे पुरुषस्याधिकारितया प्राधान्यप्रत्यये सत्याक्षेपात् कर्तृतया गुणत्वप्रत्यय इति नास्माकं बादरिनयविरोधः । तस्मादहङ्कारस्य ज्ञाता नाहमात्मेति सिद्धम् ॥

ज्ञातृत्वोपपत्तिः ।

कथं पुनरेवं मामहं जानामीत्यनुभवः, कथं च कर्तृसमवेतक्रियया साध्योऽहङ्कार इति ।

उच्यते — अहङ्कारोपाधिकमात्मनो ज्ञातृत्वमित्यनन्तरमेव वक्ष्यते । अहङ्कारविशिष्टस्य ज्ञानात्मन एव च तदुपधेयरूपभेदेन स्वाश्रितत्वावभासेन व्याप्त्या जडोऽहङ्कारोऽवभासेन साध्यते । यद्यपि तदभिव्यक्त्या तदवभासात्मनः स्फुरणस्य फलस्यैवाश्रितत्वावभासो न तदुपधेयमात्ररूपभेदस्य, तथाप्यस्याहमनुषङ्गादेव तदवभासस्फुरणाविवेकेन मामहं जानामीत्यवभासो न विरुध्यत इति । एतेनाज्ञानादिसाक्षित्वं व्याख्यातम् ।

यत्त्वेवमनहंसंविन्मात्रात्मवादेऽहं जानामीत्याद्यनुभवानुपपत्तिः, आरोपस्याप्यसम्भवादिति । तन्न । अनाद्यविद्योपादानाहङ्कारात्मसम्पिण्डस्यास्मदर्थस्यैव ज्ञातृत्वोपपत्तेः, नीरक्षीरसम्पिण्डस्योभयत्राभूतपरिमाणविशेषसम्प्रतिपत्तेः । न च तत्र द्रव्यान्तरमधिकपरिमाणमूनपरिमाणाभ्यां नीरक्षीराभ्यामेकं क्षीरजातीयमारभ्यते, वैजात्यात् । न च विजातीयमेवारभ्यं, प्रभूतं क्षीरमिति सर्वजनीनानुभवविरोधात् । न च नीरसम्भेदे क्षीरस्य प्रचयात् परिमाणभेदोपजनः, क्षीरसम्भेदे नीरस्यापि तदुपजने समपरिमाणनीरक्षीरसंयोगे परिमाणचातुर्गुण्यप्रसङ्गात् । तस्मादाविद्यके नीरक्षीरतादात्म्ये परिमाणविशेषवदहङ्कारात्मतादात्म्ये ज्ञातृत्वादेरनुभव उपपन्नः । यद्वा तस्यैवास्मदर्थस्याहङ्कारांशेन विकारोपजने संविदनुषङ्गादुभयसम्पिण्डस्य ज्ञानसंशब्दितस्य वृत्त्यंशेनाश्रयत-

---

* जैमिनीये अध्या० १. पा० ४. सू० ६, ७, ८.

याहङ्कारस्य ज्ञानाश्रयत्वं चिदात्मोपाधिकमारोप्यते दाहात्मकाग्न्युपाधिकमिवायसो दग्धृत्वं, यतोऽहं जानामीत्यनुभवः । तथाच स्मृतिः—

"आद्यो विकारः प्रकृतेर्महानात्मेति कथ्यते ।
विज्ञानशक्तिर्विज्ञाता ह्यहङ्कारस्तदुत्थितः ॥"

इति । अहमाश्रयवृत्त्यनुषङ्गावभासिसंविदाश्रयत्वं चिदात्मनि वाहमुपाधिकमारोप्यते लोहोपाधिकमिवाग्नौ चतुरश्रत्वादि, यत आम्नायते 'एष हि द्रष्टा श्रोते'त्यादि । एतदुक्तं भवति — अहम आश्रयता स्वभावः। औपाधिकी तु ज्ञानाश्रयता, तदाश्रितवृत्तेर्ज्ञानसंशब्दनस्य संविदनुषङ्गाधीनत्वात् । चिदात्मनस्तु ज्ञानं स्वभावः । तदाश्रयता पुनरौपाधिकी, संविदनुषङ्गवृत्त्याश्रयाहङ्कारसम्भेदाधीनत्वादिति । यत्तु एवं संविदहं वेदेति प्रतीयेत । अन्यथा निर्विशेषचिदात्मनः शुक्तिकादिवदंशभेदेन भानाभानायोगाद् निरधिष्ठानविभ्रमापत्तिरित्यादि । तत्र वदामः — नह्यधिष्ठानज्ञानमारोपहेतुः, नीलं नभो नीला बलाकेत्याद्यारोपात् । न चातः प्रागधिष्ठानद्रव्यमात्रदर्शनमुपपन्नम्, तस्य रूपदर्शनपूर्वकत्वनियमात् । रूपारोपेण तु नभोवलाके गृह्येते । एवमहमारोपेणैवात्माप्यवभासताम् । संशये कोट्युत्कटत्वस्य विपर्यये चारोप्यनियमस्य धर्मिधीहेतुत्वोपपादकस्य कपोताकाशादौ रूपसंशयारोपाभ्यामेव परिसंख्यानात् । तथाच कुतो निरधिष्ठानविभ्रमापत्तिः ॥

अहमितिद्विरूपावभासत्वम् ।

यद्येवं द्विरूपोऽहङ्कारो भासेत । ओम् । अधिष्ठानं हि प्रकाशात्मा भासत एव, अन्यथाहमनवभासप्रसङ्गात् । विषयो हि प्रकाशमानमेव प्रकाशमनुप्रकाशते । अन्यथा तिमिरमनुप्रकाशेत । नचाहमेव स्वयम्प्रकाश इत्यावेदितम् । 'अत्रायं पुरुषः स्वयं ज्योति'रिति ह्यात्मविषयः पुरुषशब्दो न तस्याहन्त्वमनहन्त्वं वापेक्षते, 'पूर्षु शेते तस्मात् पुरुषः', 'पूर्वमेवाहमिहासमिति तत् पुरुषस्य पुरुषत्वं', 'स यत् पूर्वोऽस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात् पुरुष' इत्यादावन्यनिमित्तत्वश्रवणात् । ननु पुरुषशब्दो लोके वेदे च सङ्घातभेदे रूढः प्रयुज्यते 'स्त्री पुरुषः', 'पुरुषाः पूरुषा नराः'

---

१. 'नाह' ख. पाठः.

'ताभ्यः पुरुषमानयत्', 'अन्नात् पुरुषः' इत्यादौ, आत्मनि गौणः स्यात् ।

"गौणं लाक्षणिकं वापि वाक्यभेदेऽपि वा स्वयम् ।
वेदो यमाश्रयेदर्थं को नु तं प्रतिकूलयेत् ॥"

इति हि तन्त्रविदः । स चाज आत्मा महान् ध्रुवः स्वस्य चोपचयापचयधर्मिणोऽहङ्कारस्य च रूपद्वयस्याहमित्येवैकरूपोऽवभासः, तन्निबन्धनो व्यवहारश्च, अनात्मनि देहादावात्मभावस्याहमित्येवैकरूपस्य सर्वसम्प्रतिपत्तेः । अन्यत्रापि तादात्म्यारोपे रूप्यं सर्प इत्येव शुक्तिरज्ज्वादेरप्यवभासः, अन्यथा निरात्मकरूप्याद्यवभासायोगात् । ख्यातिभेदा हि कणेहनिष्यन्ते । किन्तु तदेव पराग्भावादिदमित्यप्यारोप्यते, इदमिति शुक्त्यवभासव्यवस्थाहेत्वभावात् । दिशो मलिनाः नीलं नभः पीतः शङ्खः शुक्तिः रजतं चेत्याद्यारोपे च दिगादि न भासमानविशेषात्मनाधिष्ठानम्, आरोपस्याज्ञातविषयत्वात् । किन्तु स्वरूपेणानुगतात्मना । तच्च मलिना नीलमित्येवमेकरूपावभासं चेति । वस्तुतस्त्वस्मि भामि प्रियोऽहमित्यत्रापि द्विरूपावभासो गमयितव्यः । अहमोऽद्विरूपावभासत्वे तदाश्रयकामसङ्कल्पादिवृत्तिभेदोपजनापायानवभासप्रसङ्गात् । अपिच,

सुप्तिबोधप्रवाहेषु सर्गप्रलयसन्ततौ ।
लीनोत्पन्नेऽप्यहङ्कारेऽनुसन्धातानुवर्तते ॥

व्यावृत्तावनुवृत्तौ चाहमात्मानौ सम्पिण्डितावहमित्येवावभासेते युगपद् दुःखितया परमप्रेमगोचरतया च द्विरूपोऽहमवभासत इत्यप्याहुः ।

यत्त्वहं संवेद्मीति विशेषणभानायां संविदि ज्ञातृत्वाध्यासो न युक्त इति । तदसारम् । तथाभानस्य विषयवृत्त्यवच्छेदोपाधित्वात् । न खलु वयं विषयप्रकाशावस्थैव संविदात्मेत्युपगच्छामः, यतस्तद्भाने भासमानं ज्ञातृत्वमनध्यासः स्यात् । किन्तु निर्विषयाश्रयस्वभावात्मसंविदेव यथायोगं विषयावभासेति । तत्र चोक्तगत्या ज्ञातृत्वाध्याससम्भव इति । अवश्यं च ज्ञातृत्वमध्यासः, अविद्यावद्विषयत्वात् । **'देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ'** इत्यादि ह्युपपादितं भाष्ये । अहंममाभिमानहीनस्य हि प्रमातृत्वादि सुप्तादौ विनिवर्तते । संवित् पुनरविद्याविषये तद्बाधे च

सक्कादिव सिद्धा नाध्यासः स्यात् । नहि सुप्तौ मुक्तौ वा ज्ञातृत्वमनुवर्तते, अननुभवात् । नहि नित्यं ज्ञानमात्मधर्म इति च व्युदपीपदाम । एवञ्च यद् ज्ञातृत्वे श्रुतिरिति, तदपास्तम् । उपपत्तिविरोधेऽनुवादमात्रादर्थाव्यवस्थानात् । 'एष हि द्रष्टे'त्यादि हि न विधिरित्यगासिष्म । 'अथ यो वेदे'त्यादौ च घ्राणादिवृत्तिसाक्षितयानूदितया तदुपलक्ष्यस्यात्मतत्त्वविधानमनाबाधमवबुध्यते । एवं बोध्यबुद्ध्यनुरोधाददूरविप्रकर्षेण 'विज्ञातारमरे केने'त्यादिव्यपदेशाः 'न वाचं विजिज्ञासीत वक्तारं विद्यादि'त्यादिवत् । न खलु वक्तृत्वमात्मनः स्वभावः । अथ च व्यपदिश्यते 'वक्तारं विद्यादि'ति । तद्वदुपलक्षणत्वोपपत्तेः । 'दृष्टेर्द्रष्टा श्रुतेः श्रोते'त्याद्याः, 'न दृष्टेर्द्रष्टारं पश्येः', 'न श्रुतेः श्रोतारं शृणुयाः' इत्याद्याश्च व्यपदेशा द्रष्टृत्वादिकमौपाधिकमन्तर्हित्यानानुयन्तः 'अदृष्टो द्रष्टा अश्रुतः श्रोते'त्यादौ न तत् स्वाभाविकमुपाजेकर्तुमुत्सहन्ते ॥

अविनाशीवेत्यादिश्रुत्यर्थः ।

न चात्मा 'अनुच्छित्तिधर्मे'ति नित्यं ज्ञानमात्मधर्मः प्रतीयते, येन ज्ञातृत्वं सदातनमिष्येत । 'प्रज्ञानघन एवे'त्यात्मनो ज्ञानकैवल्यमाम्नाय 'न प्रेत्य संज्ञास्ती'त्युक्ते स्वरूपनाशो मा शङ्कीति ह्याम्नायते 'अविनाशी वा' इत्यादि । 'विनाशशीलो हि गुणप्रवाहः कदाचिदुच्छिद्यत' इत्युच्छित्तिः धर्मोऽस्येत्युच्छित्तिधर्मा, नैवमात्मेति । तत्र चानपेक्ष्यं धर्मनित्यत्वमिति । न हि तवापि सुषुप्तौ दृष्टिश्रुत्यादिविज्ञानावस्थाभेदा व्यवतिष्ठापयिषिताः, सुप्तिव्याघातात् । अतो 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते नहि श्रोतुः श्रुतेर्विपरिलोपो विद्यते' इत्यादिवृत्तिविषयानुषङ्गविलयेऽपि संवित्स्वरूपाविपरिलोपमेव सुप्तावुपदिशति । 'न तु ततोऽन्यद् विभक्तं यत् पश्येच्छृणुयान्मन्वीत विजानीयात्', 'न बाह्यं किञ्चन वेद नान्तरं', 'यत्र सुप्तो न कञ्चन स्वप्नं पश्यती'त्यादिप्रवृत्तिविज्ञानाभावाज्ञानाच्च । मुक्तौ च 'यत्र नान्यत् पश्यति', 'न शृणोति न विजानाति', 'यत्र त्वस्य सर्वमात्मैवाभूद्' निरस्तज्ञातृज्ञानज्ञेयभेदः प्रकाशकेवलः स्वमहिमप्रतिष्ठः । न तदा द्रष्टा श्रोता

---

१. 'त्मत्वदि' ख. पाठः.

मन्ता विज्ञाता वा प्रतिज्ञातुमात्मा शक्यः । 'सर्वं ह सर्वः पश्यती'ति चैक-विज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनेन व्याख्यातम् । 'एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इती'ति तु पदवृत्तिनिर्वचनमात्रं 'यदरोदीत् तद् रुद्रस्य रुद्र-त्वमि'त्यादिवत् । न ज्ञातृत्वपरम् ॥

ज्ञोऽत एवेतिसूत्रार्थः ।

'ज्ञोऽत एव' (ब्र० २. ३. १८) इति सूत्रे च घञर्थे कविधानमाश्री-यताम् । न खलु 'स्थास्नापाव्यधिहनियुध्यर्थमि'ति परिगणनम्, उदाहरणं तु । कृञ्छिदक्नसां के द्वित्वविधिसम्प्रत्ययात् । घञर्थश्चेह भाव इति । अ-थवा यद्यपि ज्ञातृत्वं प्रत्ययबलात् प्रतीयते, तथापि तन्न साधनीयम् । देहा-त्मवादिनोऽपि तदविगानात् । साङ्ख्यस्यापि प्रत्ययानुपश्यतया ज्ञातृत्वोपग-मात् । न च तत्स्वभावत्वमिह साध्यते, अध्याहारप्रसङ्गात् । यद् ज्ञानं तन्न ज्ञात्रिति व्याप्तिभङ्गेन ज्ञातृत्वे तस्य स्वाभाविकत्वे च श्रुतितात्पर्यवर्णने वाक्य-वृत्तिभेदप्रसङ्गात्, क्रियाभाविज्ञानाश्रयत्वस्यासार्वदिकत्वेनास्वभावत्वाद्, अक्रि-याभाविज्ञानाश्रयत्वेन च ज्ञातृत्वानिर्वाहाद्, धात्वर्थाश्रयत्वस्यैव कर्तृत्वपदार्थ-त्वाद्, उक्तन्यायविरोधाच्च । किन्त्वनया वचनभङ्ग्या ज्ञानात्म्यमेव साध्यते । एवं विषयवृत्त्युपधेयभेदेन संविदात्मा ज्ञाता नाम स्यात् । अन्यथा आत्मनो विषयतज्ज्ञानानवभासप्रसङ्गात् । एवं सति यद् ज्ञो जीवः आगमादनु भवाच्च, तदत एव येनोपाधिविविक्तस्वरूपेण नित्यः साधितः 'नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः' (ब्र० २. ३. १७) इति, एतस्मादेव चिद्रूपाद् न तु स्वधर्मत इति सूत्रयोजना च समञ्जसा भवति । परस्य तु ज्ञानात्मत्वस्यानिरस्यत्वाद् ज्ञो-ऽपीति स्यात् । नात्माश्रुतेरित्यत्र श्रुतेरितिच्छेदेऽपि तदनुत्पत्तिश्रुतेरिहात एवेति परामर्शेऽनन्वयात् । श्रुतिसामान्यद्वारा तद्विशेषलक्षणायां गौरवं च स्यादिति ।

एवं च यदवबोधादयो गुणा नित्या एवात्मन इति शौनकवचनमिति । तदपहेयम् । अथवा 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिविशेषणविशेष्यभावनिर्दे-

---

१. 'स्य' ख. पाठः.

शव्यपेक्षया नेयम् । अन्तर्गुणा भगवती परदेवतेति हि द्रमिडभाष्यमुदाहरन्ति । अथवाहङ्कारस्यैव चैतन्यबिम्बोद्ग्राहितया तदभिव्यञ्जकतया वा ज्ञातृत्वमारोप्यताम् । मुखबिम्बोद्ग्राहिदर्पणस्ये लोकाभिव्यञ्जककरतलस्येव वा तद्वत्त्वम् ।

नन्वचाक्षुषस्य प्रतिबिम्बानुपपत्तिः । को दोषः । कालादेरप्यस्तु प्रतिबिम्बः । चाक्षुषस्तु मा भूद्, अचाक्षुषीयत्वात् । अथवा इदानीमिहायमिति गृह्यमाणमेव कालादि प्रतिबिम्बः स्याद्, बाधकाभावात् ॥

आत्मनः शब्दादेश्च प्रतिबिम्बः ।

किमेवं शब्दादिरपि प्रतिबिम्बतु, किं विमर्शेन । गिरिगुहादिषु प्रतिध्वनिरूपप्रतिबिम्बोपलम्भात् । अन्यथा प्रतिलोमं प्रतिभासानुपपत्तेः । प्रतिलोमवातेन प्रतिस्रोतःप्रवृत्तिकल्पनेऽपि शब्दस्य निःस्पर्शस्याभिघातायोगेन परिवृत्त्यनियमात् परागाहूतिवदुपलभ्येत । नियमतश्च प्रत्यगाहूतिवदुपलभ्यते । तिश्रुदिति स शब्दस्य प्रतिबिम्ब इति युक्तम् । एतेन गन्धादिप्रतिबिम्बोऽपि वाय्वादिषु व्याख्यातः ।

विदूरे केसरामोदे विनष्टे वा कथं यदि ।
मरुति प्रतिबिम्बोऽस्य प्रतिमुद्रोपलभ्यताम् ॥

एवं हि वाय्वादौ सूक्ष्मतमावयवानुगमोऽतदनुरूपस्फुटगन्धोपलम्भोऽवयवह्रासे तुलितकस्तूरिकादावयवान्तरोपगम इत्याद्यनल्पं कल्पयितुं शङ्कितं स्यात् । उपपन्नं च

"पृथिव्यामेव तं विद्यादपो वायुं च संश्रितम्"

इति, बिम्बप्रतिबिम्बैकात्म्योपपत्तेः । अन्यथा अप्सु वायौ चोपलब्धमिति परिणम्येत । अपो वायुं च संश्रितं संश्रितत्वेनोपलब्धमिति वा पूर्येत । आस्तां वा शब्दादिप्रतिबिम्बोपपत्तिः । अशक्यमात्मनस्तु प्रतिबिम्बोऽनाश्रयितुं,

"यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥"

---

१. 'न्ति', २. 'ल्पमल्प' ख. पाठः.

"एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥"

"आकाशमेकं हि यथा घटादिषु पृथग् भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥"

इत्यादिश्रुतिस्मृतिदर्शनात् । 'अत एव चोपमा सूर्यकादिवत्' (ब्र० ३. २. १८) इति सूत्रम् ॥

आभास एव चेतिसूत्रार्थः ।

'आभास एव च' (ब्र० २. ३. ५०)' इति च । न चात्र प्रतिबिम्बभावोऽसन्ततेर्भोगाव्यतिकरहेतुरपेक्षितो न सूत्र्यते, प्रकृतानपेक्षिताप्रसक्तब्रह्माज्ञानप्रकाशतिरोधानादिकल्पनाहेत्वाभासता त्विति न्यायविदामनुरूपम् ।

यत्तु — नात्रात्मनः प्रतिबिम्बत्वं विधेयम्, एवकारोपहतविधिशक्तित्वात् । किन्तु तदर्थः साक्षाद् न ब्रह्म जीव इति निषेधः, अश्वमेधे 'षड्विंशतिरित्येव ब्रूयादि'ति हि 'चतुस्त्रिंशद् वाजिन' इत्यादिवैशेषिकाधिगुवचननिषेधार्थं व्यवस्थापितमिति । तन्न । एवं हि किमप्रसिद्धेनाभासग्रहणेन । कुतश्च स न साक्षाद् ब्रह्म । आभास इति हेतुगर्भमिति चेत्, प्राप्तं तर्हि तदर्थतात्पर्यम् । वृद्धिह्रासभाक्त्वस्य प्रतिबिम्बसाद्दश्यस्यानूदितस्य हेतुतामात्रतात्पर्यमिति चेद्, न । उपाध्यन्तर्भावेन तदनुविधायिन एव प्रतिबिम्बत्वात् । एवं सत्येवकारस्य न ब्रह्मैव जीवः न चात्यन्तमन्य इत्युभयार्थोपपत्तेः । दृष्टान्ते चैवकारोऽप्यनुवादः । 'न चतुस्त्रिंशदिति ब्रूयादि'ति प्रतिषेधविधेः प्रथमत्वात् । यदाहुः — 'न चतुस्त्रिंशदित्येव प्रतिषेधं विधत्ते' इति ॥

प्रवेशशब्दार्थः ।

अपिच 'पुरः पुरुष आविशत्', 'तदेवानुप्राविशत्', 'स एष इह प्रविष्टः' इत्यादिश्रुतेः प्रवेशो नात्मनोऽहेरिव बहिःस्थानावस्कन्दमन्तर्निलयनं, व्यापित्वात् । नापि व्यापिनामेव भूतानां गण्डशिलादौ मण्डूकादिभावेनेव जीवभावेन परिणामः, अविकारित्वात् । नापि गन्धरसादेरिव द्रव्ये गुणभावेनानुषङ्गः, स्वातन्त्र्यात् । किन्तु तदभिव्यक्तावभासत्वलक्षणः प्रतिबि-

म्बभाव एव । अथ सर्वाव्यवधानादात्मनः प्रतिबिम्बानुपपत्तिः, दर्पणादौ तदवयवाद्यप्रतिबिम्बनात् । भेदकल्पनया व्यवधाने वात्मनो बिम्बभूतस्येश्वरस्यासर्वगत्वासर्वज्ञत्वादिप्रसङ्गः । नैवम् । सर्वतः प्रसृतसवित्रालोकादेरादर्शादौ स्फटिकादौ चान्तर्गतयावकादेः प्रतिबिम्बदर्शनाद्, वस्तुशक्तिवैचित्रीवैषम्यस्यातर्क्यत्वाच्च । चाक्षुषप्रतिबिम्ब एव व्यवधानापेक्षा नान्यत्रेति वा व्यवस्थाप्यताम्, उदाहृतमानानन्यथासिद्धेः । प्रकृते च तदन्तर्भावेन तदधीनवृद्धिह्रासाभ्यामुपाधिषु स्फुटावभासित्वं प्रतिबिम्बनमवलम्बामहे । तथाच सूत्रितम् 'अम्बुवदग्रहणात् तु न तथात्वम्' (ब्र० ३. २. १९) 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (ब्र० ३. २. २०) इति । नेह प्रतिबिम्बता जुगौणयिषिता । किन्त्वन्यत्रान्यथा सा आत्मनः पुनरीदृशीति विशिशेषयिषितेति ॥

PALAKKAD. CASTE
AVANALLUR.

अहङ्कारात्मनोर्व्यङ्ग्यव्यञ्जकत्वनिर्वचनम् ।

आलोकसंविदात्माभिव्यञ्जकत्वं च करतलाहङ्कारादेः स्वाकारविकल्पावभासत्वापादनं, केवलस्यालोकस्य संविदात्मनो वा निर्विकल्पावभासत्वात् । इयांस्तु विशेषः । चिदात्मनः स्वत एवावभासः । तदधीनस्त्वालोकस्येति । विषयव्यञ्जकता पुनरालोकात्मनोर्विषयसत्त्वभानव्यवहारानुगुण्यापादकता तत्प्रकाशैतैव अतत्सम्बन्धे तमसि जडस्य स्वरूपेणैवानवभासात् । सा तु साक्षादेव चिदात्मनः । आलोकस्य तु तद्द्वारा, विषयेषु चाक्षुषाहंवृत्त्युपरक्तचित्प्रकाशव्यपेक्षत्वात् । एवञ्च यत् करतलमालोकस्य प्रतिहत्या बाहुल्यमात्रहेतुः न व्यञ्जकम्, बहुलश्च स स्वयमेव स्फुटतरमुपलभ्यते जडश्चाहङ्कारो न नित्यापरोक्षचिदात्माभिव्यञ्जक इति युक्तम्, अन्योन्यव्यङ्ग्यव्यञ्जकता च विरुद्धा, अभिव्यञ्जनं चोत्पादनं प्रकाशनं करणानुग्रहः कलुषापनयो वा नाहङ्कारेणात्मनि सम्भवतीत्यादि । सोऽयमस्थाने प्रत्यवस्थानसम्भ्रमः स्वविनेयदासेरकापशदपरिभवभयभरपर्याकुलचेतसो बालिशैरपि हसनीयः । निरुक्तव्यङ्ग्यव्यञ्जकत्वविवेकानाकलनात् । स्वाकारविकल्पावभासत्वापादनं हि व्यञ्जकत्वं व्यङ्ग्यस्यापि जडस्याहङ्कारस्य स्वयंज्योतिरात्मन्युपपन्नम् । न चेत्थं व्यङ्ग्य-

---

१. 'स्ति' ख. पाठः.

स्यापि चिदात्मनः स्वव्यञ्जकाहङ्कारव्यङ्क्तता तत्प्रकाशता विरुध्यते। न च तादृशमहङ्कारव्यङ्ग्यत्वमात्मनोऽचित्त्वमावहति, घटादावचित्त्वप्रयोजकव्यङ्ग्यत्वभेदात्। अन्यथा व्यञ्जकत्वेनैव ज्ञानस्यालोकवदज्ञानत्वप्रसङ्गात्। व्यञ्जनरूपविकल्पदूषणस्याभ्युपगताभ्युपगमत्वात्। निर्विवक्षितं च निरुक्तं व्यञ्जकत्वम्। अथवा अनावरणत्वापादनमेवात्मन्यहङ्कारकृतमभिव्यञ्जनमस्तु। तत् पुनरहमवभासात्मनि सहजम्। अन्यत्र तु मानवृत्त्यायत्तम्। न चैतदाहत्योपगम्यते। स्वतो वृत्त्या वा तदुपरागे हि सति संविदैव वस्तुरूपावभासे तदज्ञानमपोद्यते।

यत्तु — एवमात्मनोऽज्ञानाश्रयविषयत्वे ज्ञातृज्ञेयत्वापत्तिः, इतरथा अतदाश्रयविषयत्वं वेति। तन्न। घटादावज्ञानानाश्रयत्वादेरज्ञातृत्वाद्यप्रयोज्यत्वात्। परार्चीनत्वाचित्त्वादिप्रयुक्तं हि तत्। अन्वयप्रतिबन्धस्य च क्वाप्यसम्प्रतिपत्तेः। न चैवमज्ञानस्य समानाश्रयविषयज्ञाननिवर्त्यत्वानियमादन्यस्य[1] ज्ञानेऽन्यस्याज्ञानं[2] न स्यात्। तत्स्वरूपावभासस्तदज्ञानविरोधीति प्रमात्रव्यवहितविषयाज्ञाननिवृत्ताविष्टायां समानाश्रयविषयज्ञानापेक्षणात्। सामान्यसामग्र्यनुपपाद्ये हि कार्ये विशेषसामग्री कल्प्यते, यथा भ्रमादौ दोषादिः। आत्मनस्त्वहङ्काराश्रयेणापि ज्ञानेन स्वरूपावभासे तदज्ञानापनयोपपत्तौ न ज्ञातृज्ञेयताप्रसङ्गः। स्वप्रकाशचिदात्मन्येव चाज्ञानमुपपादयिष्यते।

यत्तु — एवमपि व्यङ्ग्यकस्यात्मस्थतया व्यङ्ग्याभिव्यञ्जनानियमादहमो न ज्ञातृत्वानुभवनिर्वाह इति। तन्न। प्रतिबिम्बनं तावदादर्शादावुपाधिस्थमुपलब्धम्। तडाकतरुप्रतिबिम्बोपलम्भो हि तन्निकटमटतो न नायनरश्मिगतिप्रतिहत्या तटतरूपलम्भ एव, अनभिमुखं प्राध्वंप्रसृताभिहतिविष्वग्गत्यादिकल्पनस्याभिनिवेशमात्रमूलत्वात्। अपिच प्रतिबिम्बिताभिव्यञ्जिता वा संविदहमोऽवभास इति तस्य तद्वत्त्वाभिमानः। अत एव हि विषयस्यावभासः स्फुरणं प्रकाशः प्राकट्यं ज्ञाततास्यं तदाश्रयमेवास्थितं कौमारिलैः। करतलादिप्रकाशालोकस्य च लोके तदाश्रयत्वोपलम्भाच्च। विषयाश्रयताभिमानस्तु न तद्व्यञ्जकालोकसंविदोः। विषयस्य ह्यन्यदभिव्यञ्जकत्वम्, अन्यच्च विषयिण इति निरकृक्षाम॥

---

१. 'स्याज्ञानं', २. 'ज्ञस्या' ख. पाठः.

नन्वेवं सर्वोऽपि विषयः स्वविकल्पेन संविदवभासहेतुरिति न ज्ञातृत्वाभिमानो व्यवतिष्ठेत । न । व्यवस्थितोपलब्धे हि तत्र निमित्तमुपपाद्यते । अपिचान्यस्य संविदभिव्यञ्जनेऽहङ्कारसङ्गापेक्षणात् तस्य चानन्यापेक्षतया वैशेष्यात् प्राणेन्द्रियादिवृत्त्या भोगपरिणामित्वाच्च पञ्चवृत्तिः प्राणो हि बुद्धेरेव क्रियाशक्तिवृत्तिभेदः । 'यो वै प्राणः सा प्रज्ञे'ति प्रज्ञाशब्दितबुद्ध्यभेदाम्नानात् । 'यः प्राणः स वायुरि'ति चान्नानाद् वायुवृत्तिभेदः प्राणो गम्यत इति चेद्, न । तस्य वायुस्वभावैकत्वविषयतोपपत्तेः । इन्द्रियाणि च बुद्धेरेव वृत्तिभेदा इत्युपपादितम् । अथापि तानि स्युरात्मोपादेयानि,

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"

इति श्रुतेः । भौतिकानि वा, 'अन्नमयं हि सोम्य ! मन आपोमयः प्राणस्तेजोमयी वागि'ति लिङ्गात् । तथापि तदुपकरणाया बुद्धेरेवाहम्भूताया भोगपरिणामिन्या ज्ञातृत्वाभिमानो नान्येषामिति व्यवस्थितोपलब्धे तत्र विनिगमकमुन्नीयताम् । एवञ्च स एवायमात्मनोऽपि तादात्म्यगृहीतस्य तदुपाधिको ज्ञातृत्वाभिमान इति, अनात्यन्तिकत्वादज्ञातृत्वस्यानहन्त्वस्य वा न घटादिवत्त्वप्रसङ्गः ॥

आत्मनोऽकर्तृत्वम्—यथा च तक्षेतिसूत्रार्थः ।

एवमेष्टृत्वकर्तृत्वादयोऽप्यहङ्कारोपाधिका व्याख्याताः । तथाच सूत्रं 'यथा च तक्षोभयथा' (ब्र० २. ३. ४०) इति । न चात्रेच्छानिच्छाभ्यां कर्तृत्वानैयत्यं बुद्धिकर्तृत्वव्यावृत्तये शक्यं वदितुं, सहकारिवशेन बुद्धेरेवेच्छया कर्तृत्वादिकादाचित्कत्वोपगमसम्भवात् । न चैवं तक्षेव करणोपादानानुपादानाभ्यामास्मैव कर्त्रादिरापादि । अन्यथा तक्षापि न कर्तैव स्यादिति वाच्यम् । करणोपादाने कर्तृत्वादि नान्यथेत्येतावति दृष्टान्तात् । तत्रैकस्य क्रियामयं वास्यादुपादानम्, अन्यस्य च मनोबुद्ध्यपादानमहमभिमानमयम् । अन्यथा क्रियामये तत्रापि करणोपादानापेक्षायामनवस्थानात् । तथाच स यथा देहोपादानेन तादात्म्याभिमानमयेन व्याप्रियते, एवमात्मा बुद्ध्युपादानेनाहमभिमानमयेन करोति कामयते वेति । 'प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यं-


---

१. 'कर्तृत्वादि' ख. पाठः.

श्रोत्रं चक्षुः शृण्वञ्च्छ्रोत्रं मन्वानो मन' इति प्राणितृत्वादौ तत्तदभेदव्यपदेशलिङ्गात्। अन्यथा मनोयोगेनात्मन एव कर्तृत्वादिविकारेऽनित्यत्वप्रसङ्गात् । न खल्वादिमत्त्वमेव विकारोऽनित्यत्वहेतुः, विकारमात्रं तु लाघवात् । नित्यत्वागमश्च नातत्प्रसङ्गं विरुन्धीत्यगदिष्म । अपिच विकारित्वलिङ्गस्यागमस्य चार्थविरोधे व्यवस्था वाच्या । जन्मवदन्यस्यापि विकारस्य व्याप्तिस्तावदुपलब्धा । अव्यक्तकालादेरप्यस्माभिरन्तोपगमात् । तत्रानात्मत्वे सतीति विशेषणमयुक्तम् । अपेक्षत्वे सतीति सर्वहेतुमुलभत्वात् । अस्माकं तु यस्य विकारित्वमौपाधिकस्यात्मनोऽपि तस्यान्तवत्त्वमिष्टमेव, ध्रुवत्वश्रवणस्य स्वरूपविषयत्वात् । तत्र च करणसम्बन्धकर्तृत्वादिविकाराभावात्। ननु सर्वोऽपि विकार आत्मन्येव कल्पितः। वस्तुविकारश्च तव न क्वापि। तत् कथमात्मनो विकारित्वादनित्यत्वं मा प्रापत्। स्वावधिबाधाविषयविकारस्यानित्यत्वहेतोरभावात् । अन्यत्रापि तत्र बाध्यस्यापक्षधर्मस्यालिङ्गत्वव्यवस्थानात् । आम्नायते चात्मनः क्रियाकारकासम्बन्धेनाकर्तृत्वं 'स यत् तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष' इति । कर्ता हि कृतेन कर्मणानुगम्येत ,

"यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
एवं पूर्वकृतं कर्म कर्तारमनुविन्दति ॥"

इति स्मृतेः । न त्वात्मा केवलोऽसङ्गत्वादकर्ता स्वप्नान्ते बुद्धान्ते वा दृष्टेन कृतवदुपलभ्यमानेन कर्मणानुगतो भवतीति ॥



असङ्गश्रुत्यर्थः ।

ननु "स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत् कर्म कुरुते, यत् कर्म कुरुते तदभिसम्पद्यते । तदेष श्लोकः —

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम् ।
तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे ॥

इति नु कामयमानः'' इति कामकृतकर्मणो बन्धकत्वमुक्त्वा 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येती'त्यकामकर्मणो बन्धकत्वाभाववचनात् कामत्यागो मोक्षोपाय इति विवक्षिते कामाभावे कर्मबन्धकत्वं स्वप्नोदाहरणेन दर्शयति 'स यत् तत्रे'त्याद्यसङ्गोऽकामो ह्ययं पुरुष इती'ति चेद्, एवं हि 'स वा एष तस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्टैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत् तत्रे'त्यादौ स आत्मा यत् पुण्यं पापं वा सम्प्रसादोपलक्षिते पूर्वस्वप्ने पश्यति, तेनानन्वागतो भवत्यस्मिन् स्वप्ने, अकामो ह्ययं पूर्वस्वप्ने पुरुष इत्यर्थविवक्षायामस्यानर्थक्यमापद्येत । 'स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वे'त्याद्यद्रवति बुद्धान्तायैव 'स यत् तत्रे'त्यादिनैव यदि हि स्वप्ने कामः स्यात् तत्र कृतं कर्मानुवर्तेत प्रबुद्धस्य जागरितेऽपि दिनान्तरकृतमिव । न चानुवर्तते, प्रबुद्धस्य श्राद्धस्यापि स्वप्नस्तेयादिप्रायश्चित्तानाचरात् । स्वप्ने स्तेनमपे (य पिबं ? यं पिबन्तं) वात्मानमाचक्षाणे विचक्षणानामविगानाच्च । नहि स्वप्नेऽगम्यामगमदित्येव प्रायश्चित्तीयते । किन्त्वयोनावस्कान्त्सीदित्येवेत्युपक्षिप्तोपपत्तिना कामाभावे विवक्षितकर्मबन्धकत्वसिद्धेः । अस्माकं तु क्रियाकारकसम्बन्धानर्हस्वभावतया कर्तुरात्मनः स्वप्ने जागरे वा कृतवदुपलभ्यमानकर्मानन्वयो विवक्षित इत्युभयमर्थवत् ।

ननु च 'न ह्यत्रानूयाजा इज्यन्त' इति हेतुनिगदादातिथ्येष्टेरन्यत्रापि व्याप्त्यैवानूयाजाभाववत्यष्टगृहीताभाववदत्रापि 'असङ्गो ह्ययमि'ति हेतुव्यपदेशादवस्थान्तरेऽपि व्याप्त्यैवाकर्तृत्वादिसिद्धौ 'स वा एष एतस्मिन् स्वप्ने रत्वे'त्यादि व्यर्थमिति चेत् ।

उच्यते । अस्ति तावत् स्वप्ने कामः, अनुभवात् । 'यथाकामं परिवर्तते', 'स ईयते मृतो यत्र काममि'ति श्रुतेः । कामप्रतिभासाभिप्रायत्वकल्पने गौरवाद्, अनन्वयाच्च । कामो हि चेष्टाहेतुः न तत्प्रतिभासः । अन्यथासिद्धेः, वासनामयविषयविज्ञाने सति कामोद्भवसम्भवाच्च । तदुपादानबुद्ध्यविवेकस्य तदानीमप्यनपायात्, 'स धीः स्वप्नो भूत्वे'ति श्रुतेः । 'तदेतत् सत्त्वं येन स्वप्नं पश्यती'ति स्वप्नदर्शनस्य सत्त्वसंशब्दितबुद्ध्युपाधिकत्वावगमात् ।

'गृहीता वाग् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मन' इति मनोविरामवचनस्य प्रायदृष्ट्या करणविषयत्वाद्, बहिर्विषयवृत्त्यपेक्षत्वाद् वा । अन्यथा स्वाप्ययापत्तेः । न च 'तद्वा अस्यैतदतिच्छन्दा अपहतपाप्मा अभयं रूपमि'ति स्वप्नज एव कामाभाव उच्यते । 'अहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक' इति प्रकृतात्मस्वरूपस्य कामकर्मफलात्ययपरत्वात् । अतिच्छन्दा इति ह्याह, न त्वसच्छन्दमिति । तच्च सत्यपि कामे असङ्गस्य स्वभावादुपपद्यते । न च 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यती'ति न विशेष्येत यदि स्वप्ने कामः स्याद्, 'यत्र न कामयत' इत्येव स्वप्नव्यावृत्तेरिति वाच्यम् । नहि स्वप्नजागराभ्यां सुप्तं व्यावर्तयामीत्येव विशेषयति श्रुतिः, अनतिप्रयोजनत्वात् । किन्तु सुप्तौ कामकर्मविवेकेनासङ्गमात्मानं कार्यकरणसंयोगक्रियाफलश्रमविधुरं दर्शयिष्यामीति । मृत्युं कामकर्मादिलक्षणं तद्रूपं च क्रियाफलमतिक्रान्तस्य विशुद्धस्यात्मनः प्रकृते मुमुक्षवे दिदिक्षितत्वात् । तथाच 'असङ्गो ह्ययं पुरुष' इत्यसङ्गता अकर्तृत्वे हेतुरुक्ता । उक्तं च पूर्वं कर्मवशात् 'स ईयते मृतो यत्र काममि'ति । कामश्च सङ्गस्ततोऽसिद्धो हेतुरित्याशङ्क्यार्थं 'स वा एष एतस्मिन् स्वप्ने रत्वे'त्यादि । तथाच वार्त्तिकम्—

"असङ्गत्वादकर्तेति नन्वसिद्धोऽयमुच्यते ।
स्वप्ने कामस्य दृष्टत्वाद् यत्र काममिति श्रुतेः ॥
इत्यस्य परिहारोऽयं स वा इत्यादिकं वचः ।"

इति । स्वप्ने सन्नपि कामो नात्मनः । यदि स स्वप्ने कामी सङ्गवान् स्यात्, तत्सङ्गजैर्दोषैराद्रुतो बुद्धान्तायापि लिप्येतेति । यद्यपि कामकर्तृत्वाभिमानः स्वप्ने जागरे वा न विशिष्यते, तथापि रूपान्तरावेशेन स जागरितादौ बाध्यत इति दृष्टम् । एवं तात्त्विकरूपापेक्षया श्रौते असङ्गत्वे सह कामेन क्रियाकारकसम्बन्धानर्हत्वे अकर्तृत्वादौ चेयतैव सिद्धे अलं वा स्वप्नमालम्ब्य, जागरेऽप्येवमित्युच्यते — 'स यत् तत्र बुद्धान्ते किञ्चित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष' इति ।

---

१. 'लाफलात्य', २. 'दित', ३. 'र' ख. पाठः.

अपिच यदि कामाभावेनैव स्वप्ने कर्तुरेवात्मनोऽकर्मानुगमो विवक्ष्येत, अकामकृतेन प्रामादिकहिंसादिना नानुबध्येत । तत्र प्रायश्चित्ताद्युपदेशानर्थक्यं चापद्येत । कर्तृत्वादेव च कर्मानुगमे 'असङ्गो ह्यं'ति हेतुनिगदानर्थक्यमसाधकत्वात् । बुद्धान्ते च कामकृतेनानुबध्येत । तत्र च बुद्धान्तविषयमुदाहृतानन्वागमवचनमुपरुध्येत । न चात्र तत्रेति स्वप्नपरामर्शः, व्यवधानाद् बुद्धान्तस्य च सन्निधानात् । स यत् किञ्चित् पश्यतीत्येव प्रकृतस्वप्नाधिकरणलाभे तत्रेति वैयर्थ्याच्च । बुद्धान्तस्य पुनरधिकरणत्वलाभः प्रयोजनम् । एवम् 'आद्रवति स्वप्नायैव स यत् तत्रे'त्यत्रापि स एव स्वप्नः परामृश्यते, सन्निधानात् । तत्र शब्दार्थवत्त्वोपपत्तेश्च । अथापि स्यादुभयत्र व्यवहितावमर्शः । कथमात्मा कामकर्तृत्वाभिमानाविशेषे स्वप्नकृतेन नानुगम्येत, जागरे बाधात् । अश्रौतो ह्ययं हेतुः 'असङ्गो ह्यं'त्याह श्रुतिः । स्वप्नसत्त्वमते च तदयोगः । तस्मादात्मस्वभावालम्बनोऽसङ्गत्वादिवादो बुद्धान्तेऽपि तुल्यन्यायनेयः ।

अपिच, द्विरुच्यते 'स एष सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च स्वप्नायागतो यत् तत्र सम्प्रसादे किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः', 'स एष स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च बुद्धान्तायागतो यत् तत्र किञ्चित् पश्यती'त्यादि । सम्प्रसाद इति हि पूर्वस्वप्नो लक्ष्यते, रतिचरणाद्युपपत्तेः । किं प्रयोजनं, बुद्धान्तात् स्वप्नं स्वप्नात् सम्प्रसादं सम्प्रसादात् स्वप्नं स्वप्नाद् बुद्धान्तमित्यनुगच्छन् विगच्छद्भिरवस्थाभेदैः सह प्रकारैः कामकर्तृत्वादिभिः कथमात्मा संबुद्धो बुध्येतेति । एवमन्वयव्यतिरेकापेक्षया चासङ्गो ह्ययं इति सिद्धवदुपन्यासः सङ्गंस्यते ।

अपिच 'आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येती'त्यात्मज्योतिषः सङ्घातव्यापारानुग्राहकतया कौटस्थ्यमनुश्रूयते । न चायमित्यात्मा गृह्येत । 'किं ज्योतिरेवायं पुरुष' इति प्रश्ने 'आदित्येनैवायं ज्योतिषास्त' इत्युत्तरे च सङ्घातरूपस्य प्रसिद्धपुरुषस्य प्रस्तावात् । 'कतम आत्मे'त्यग्रे दर्शनाद्, अनात्मज्ञजनकप्रश्ने 'अयं पुरुष' इति शुद्धात्मपरिग्रहानुपपत्तेः । स एव च 'आत्मनैवायमि'त्यत्रापि स्याद्, ऐकार्थ्यसम्भवात् । तस्मादसङ्गतया अकर्तृभोक्तृस्वभाव आत्मा । अन्यथा यदि यत्राधारत्वं[1] कर्तृत्वं यदि वा स्पन्दा-

---

१. 'त्वं य' ख. पाठः.

श्रयत्वं यदि वा धात्वर्थमात्राश्रयत्वं, सर्वथैव तस्य स्वाभाविकत्वे स्यादात्मनो विकारित्वा[1]नित्यत्वं घटादिवदित्युक्तम् । नचैवमेवाकर्तृत्वादनात्मत्वं, सुप्तेऽपि प्रसङ्गात् । सार्वदिकत्वेन प्रतियोग्यसामानाधिकरण्येन वा विशेषणे च गौरवात् । भवनादिक्रियाकर्तृत्वेन घटादौ साधनवैकल्याद् लाघवेनाचित्त्वस्यानात्मत्वोपाधित्वाच्च ॥

कर्तृत्वश्रुत्याद्यन्यथासिद्धिः ।

नन्वागमिकमात्मनः कर्तृत्वम् 'अन्तः प्रविष्टः कर्तारमि'त्यादि चोदाहार्ष्म । न । अन्यामिते चाफले चातात्पर्यात् । तदुपन्यासमुखेनात्मस्वरूपमुपलक्षयिष्यति, सफलत्वादनधिगमाच्च । हन्तैवं कर्तृत्वादेरनुभवः शास्त्रं वा निर्विषयमापद्येत । न च बुद्धिः कर्त्री भोक्त्री वा, अचैतन्यात् । साङ्ख्यपरिसङ्ख्यानाच्च आत्मन एव प्रयोज्यौपाधिकं सन्निधिमयमहमादिप्रयोजकत्वं कर्तृत्वं भविष्यति । सुखादिपरिणमयितृत्वं च भोक्तृत्वम् । न कश्चिद् दोषः । अथवा ज्ञातृत्वक्रमोऽत्र सङ्क्रमणीयः । करणीयोपाधिना ह्यहङ्कारे कृतिवृत्त्या विक्रियमाणे व्याप्रियमाणे[2] वा शरीरादौ तादात्म्येन तदनुपश्यतयात्मापि कर्तेत्यभिमानः, सुप्तादौ केवलव्यतिरेकात् । चिदचिद्ग्रन्थिनिब्रन्धनं वा कर्तृत्वादि स्याद्, अहं जानामि कामये करोमीत्याद्यनुभवात् । 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र० २. ३. ३३) इति चात्मनि परोपाधिकमपि कर्तृत्वाद्यनिच्छतः साङ्ख्यस्य दूषणम् । औपाधिकेऽपि कर्तृत्वे शास्त्रार्थवत्त्वादिकमुपपादितं भाष्ये । किन्त्वात्मशुद्ध्युपयोगितया 'पिप्पलं स्वाद्वत्ती'तिवत् 'कामः सङ्कल्प' इत्यादि 'एतत् सर्वं मन एवेति' निगम्यते । अन्यथा कामादेश्चेतनधर्मत्वानुभवस्य 'स यथाकामो भवती'त्यादिश्रुतेश्च विरोधात् । अथ किमचिदन्तर्भावेन, आत्मन्येवाहन्त्वमन्यच्चारोप्यताम् । न । कामादिमनोधर्मत्वाज्ज्ञानात् । व्यतिरेकानुगमादेश्च प्रकृतिपरिणामाहङ्कारतादात्म्यादेव, देहादिवदात्मनोऽहन्त्वाद्यवभास इति प्रमाणबलायातत्वात् । तथाच श्रुतिः— 'स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीवे'ति ॥

---

१. 'क्रि', २. 'मन्यारो' ख. पाठः.

ससमानःसन्नितिश्रुत्यर्थः।

यत्तु पर आह — समानशब्द एकतावचनः । एकः सन्निहपरलोकावनुसञ्चरति । अत्र दृष्टान्तः ध्यायतीव लेलायतीवेति । यथा कश्चिद् ध्यायति नदीं गत्वा स्नात्वा सन्ध्यामुपास्य गृहमुपेत्याग्निहोत्रं करिष्यामीति, तथैव च करोति । अन्यो लीलयोद्यानं गत्वा विहृत्य पुनर्गृहमेति । एवमयं जीवोऽस्माल्लोकादमुं लोकं गत्वा पुनरिमं लोकमागच्छतीति । न तु बुद्धितादात्म्याद् ध्यानचलनादिमानिव भवतीति ।

तदिदं देवगुह्यं देवानांप्रिय एव वेदितुमर्हति । न तु पण्डिताः प्रमाणकृतबुद्धिशरणाः । समानशब्दो हि न क्वचिदेकत्वसङ्ख्यापरः प्रयुज्यते । प्रयुज्यते त्वभेदपरः । 'समानं वृक्षं परिषस्वजाते' समानाधिकरणमित्यादौ । यस्तु समानशब्दपर्याय एकशब्दः प्रयुज्यते एकाधिकरणमित्यादौ सोऽभेदपरः । 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः', 'एकशीलाश्च मित्रत्वं भजन्ते' इत्यादिदर्शनात् । तथाच 'योऽयं विज्ञानमय' इति प्रक्रमाद् विज्ञानशब्दितया बुद्ध्याहमेकतापन्नः सन्निति शक्यमवगन्तुम् । एवं हि 'समानः सन्नि'त्यर्थवत् स्यात् । बुद्धितादात्म्यभवनस्य सञ्चरणादिहेतुत्वात् । अन्यथा सन्निति वैयर्थ्यात् । 'एकः प्रसूयते जन्तुरि'त्यादिवत् । अथवा समानशब्दः सदृशपरः, प्रसिद्धेः । तत्र सन्निधानाद् 'विज्ञानेने'ति गंस्यते, तदभेदेन तत्क्रियत्वं च सादृश्यं, तत् प्रत्यक्षं दर्शयति 'ध्यायतीव लेलायतीव' न तु स्वतो ध्यायति लेलायति वेति । अन्यथा दृष्टान्तपरत्वे यथा कश्चिदिति कल्पनाप्रसङ्गात् ।

कश्चित्त्वाह — स्वयं ध्यायतीव लेलायतीव न त्वेवमिति जीवस्य स्वव्यापारे परमेश्वरतन्त्रता सूच्यते । यद् वा विकलः करोतीवेत्यादिवत् प्रायशो जीवस्य ध्यानादिवैफल्यं सूच्यत इति । तन्न । स्वतन्त्रोऽनन्यप्रयुक्त इव ध्यायतीत्यध्याहारप्रसङ्गात् । आख्यातानाख्येयत्वेऽपि साक्षात् कर्तृत्वस्य ध्यानादौ स्वातन्त्र्यस्य सम्प्रतिपत्त्या परस्यानिवार्यत्वात् । विकलः करोतीवेत्यादौ सफलकारिणः सकलस्येव प्रकृते सफलध्यायिनोऽसन्निधानाच्च । अपिचैवमत्र मते केन समानः सन्ननुसञ्चरतीत्युच्यते । ईश्वरो हि न प्रकृतः । अपिच सन्नित्यनर्थकम् । नहीश्वरवत् स्वतन्त्रभवनं सञ्चरणादिक्रियाया लक्षणं हेतुर्वा । उपगतपारतन्त्र्येऽपि भृत्यादौ तददर्शनात् ।

---

१. 'नी' ख. पाठः,

एतेन 'उत मोऽपवदेयुः' । 'उत मे पाप्मानमपहन्युरि'ति 'वीव नृत्येत्', 'प्रेव चलेदि'त्यादावपवादप्रयोजकविनृत्यादिहेतून्मादाभाव इवेह ध्यायतीवेति ध्यानादिहेत्वभावः सूच्यत इति निरस्तम् । हेत्वभावे क्रियानुपपत्तेः । अपारतन्त्र्यादेस्तदहेतुत्वाच्च । तस्मात् तादात्म्येन विज्ञानं बुद्धिमहङ्कारमनुविदधानोऽनुसञ्चरति न स्वयमित्यस्य प्रदर्शनाय 'ध्यायतीवे'त्यादीत्येव युक्तमिति ॥

अकर्तृत्वे स्मृतिः ।

तथाच स्मृतिः —

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥"

"तथात्मा प्रकृतौ सङ्गादहंमानादिदूषितः ।
भजते प्राकृतान् धर्मान् यतस्तेभ्यो हि सोऽव्ययः ॥"

इत्याद्या परोपाधिकमेवात्मनः कर्तृत्वादि दर्शयति ।

"प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥"

"निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः ॥"

इति विशुद्धात्मनि तद्व्यतिरेकस्मरणात् ।

"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।"

इत्यत्र कर्तेत्येवाहङ्कारमुपादाय

"तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥"

इति शुद्धात्मनि कर्तृत्वदर्शनापवादाच्च ।

यत्त्वाह — अधिष्ठानादिदैवान्तापेक्षया कर्तारमेवात्मानं केवलं कर्तृत्वे तदनपेक्षं यः पश्यति, न स पश्यति इत्युच्यत इति । तन्न । उदाहृतकैवल्यवचनविरोधात् । अधिष्ठानादिसापेक्षमेव कर्तारं पश्येदिति पर्यवसाने फलाभावाच्च ।

---

१ 'प्र' ख. पाठः,

"यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाल्लोकान् न हन्ति न निबध्यते ॥"

इत्युत्तरानाञ्जस्याच्च । असङ्गस्यात्मनोऽकर्तृत्वेन बन्धाभावाभिधानात् ।

यदपि 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि', 'प्रकृत्यैव च कर्माणि क्रियमाणानि',

"नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति"

इत्यादि नात्मकैवल्यपर्यवसानाभिप्रायम् । किं तर्हि सांसारिकप्रवृत्तिषु कर्तृत्वमात्मनः सत्त्वादिगुणसंसर्गकृतं न स्वतः,

"कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते"

इत्यादिलिङ्गात् । तद्गुणानामेव कर्तृत्वोपचार इति । तदपि वैदिकसमयहट्टाटनचटुलस्य स्वमनीषितचरणाजीवतान्त्रिकसारमेयस्य परीक्षकोद्यतात्मतत्त्वविषयवचनदण्डशतपातपरिहारव्यग्रताविष्करणमेव ॥

हन्ताचेदित्यादिश्रुत्यर्थः ।

"हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥"

इत्यादिनिषेधात् । यदि हि हैतुकमपि स्यादात्मनः कर्तृत्वं, हन्तिविषयमपि स्यादिति न निषिध्येत नायं हन्तीति । न चायमर्थः हन्ता स्वेन हतं मन्यमानः, हतश्च हन्तुं, हन्तेस्तुन् । हन्तारं मन्यमानो न विजानीतः । कुतः, नायं हन्ति न हन्यते । किं तर्हि, परमात्मा । तथाच स्मृतिः—

"कः केन रक्ष्यते जन्तुर्जन्तुः कः केन हन्यते ।
हन्ति रक्षति विश्वात्मा जगत् सर्वं चराचरम् ॥"

इति । न चात्यन्तमहन्तैव जन्तुः । प्रायश्चित्तादिविधिविरोधात् । स्वातन्त्र्यं तु कर्तृत्वेऽवक्षिप्यते नायं हन्तीति । तथाच सूत्रं 'परात् तु तच्छ्रुतेः' (ब्र० २. ३. ४१) इति । 'अन्तः प्रविष्टः शास्ता जनानाम्', 'एष ह्येव साधु कर्म

कारयती'त्याद्या च श्रुतिरिति । अन्वयव्यवधानात् । हन्ता चेदात्मानं हन्तुं मन्यते हतश्च हतमात्मानमित्युपस्थितिलाघवेनान्वयार्जवे सम्भवति मन्यतिकर्मविनिमितोपस्थितिकल्पनायोगात् । उभयथा हन्तृत्वनिषेधस्यानतिप्रयोजनत्वेन हन्तव्यत्वनिषेधस्याप्यवश्यवाच्यत्वात् । अत एवात्मनो नित्यत्वेन हन्तव्यत्वाभाव एवोच्यत इति निरस्तम् । 'नायं हन्ति न हन्यत' इत्युभयवैफल्यात् । हन्ता हत इति चानुवादस्थं यथाप्राप्तसम्पिण्डविषयमिति हन्ता हन्तुं हतश्च हतं मन्यमानौ न विजानीत इति न विप्रतिषिद्धम् । तन्निषेधस्य विशुद्धात्मविषयत्वात् ।

"य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥"

इति हि भगवानगायत् । नायं हन्तीति च नानन्यप्रयुक्तत्वनिषेधः सम्भवति, अप्रसक्तेः । साक्षात्कर्तृत्वं च स्वातन्त्र्यं प्रत्याख्येयामिति चाख्याम । 'कः केन रक्ष्यते' इत्यादि परहन्तृत्वादौ जन्तोरीश्वरायत्तत्वपरम्, अन्तर्यामिविषयत्वात् । प्रकृतं च विशुद्धात्मविषयमित्यनैकाश्र्यादनुदाहार्यम् ।

"नवद्वारे पुरे देही[२] नैव कुर्वन्न कारयन् ।"
"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥
नादत्ते कस्यचित् पापं न चैवं सुकृतं विभुः ।"
"अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय! न करोति न लिप्यते ॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥"

इत्यादि च विशुद्धात्मविषयमसङ्गाकर्तृत्वादिवचनमुदाहरणीयम् । तस्मादात्मनो ज्ञातृत्वमेमृत्वं कर्तृत्वमन्यद् वा यच्च किञ्चन धर्मत्वेनोल्लेक्ष्यते, तत् सर्वमेव न स्वधर्मिभावानापन्नपरोपाधिकं, दृश्यत्वात् । मनुष्यत्वादिवत् । न चाप्रयोजकता, स्वरूपेणैव दृश्यत्वे ज्ञातृत्वादेरात्मधर्मत्वासिद्धेः । तद्धर्मतया दृश्यत्वे

१ 'अयथा', २. 'हे' क. पाठः.

च तन्निरूपकतया दृगात्मनोऽपि दृश्यत्वापत्तावदृशित्वप्रसङ्गात्। व्याख्यिष्म चेदं संविदः स्वगतभेदं निरस्यन्तः। दृश्यत्वं च दृगात्मनः प्रागुदसीषदाम। ननु सर्वमेव दृश्यमात्मनो धर्मः, तदुपादानत्वात्।

"तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन"

इत्यादिश्रुतेश्च। न, स्वरूपेण तद्धर्मकत्वानुपगमात्। अविद्याश्रयत्वमपि ह्यविद्ययैवेति वक्ष्यते। उपादानावस्थः पुनरात्मा मायोपाधिः सर्वदृश्यधर्मक उपेयत एव, तत्र तदबाधात्। तदेवम् —

अहङ्कारोत्तीर्णा विगतविषयाश्लेषकलुषा
दृशिः सत्तामात्रस्फुरणपरिशेषात्ममहिमा।
गिरां दूरे तत्त्वं किमपि परमात्मेति तमसः
परस्तादात्मा मे जगदपगिरन्ती विजयते॥

स च न दृश्य इत्यव्यभिचारात्। सिद्धमव्यक्तादिविशेषान्तं मिथ्याबाध्यं दृश्यत्वात् शुक्तिरूप्यादिवदिति। न चायमासुरवादः,

"असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्"

इति स्मरणादिति शङ्कयम्। सदायतनतया सदात्मतया वा सति साधु सत्यं, सज्जगत्। असत्यं तद्विपरीतम्। अत एव शून्यावधिकमप्रतिष्ठमिति वदतामेवासुरत्वाभिप्रायात्॥

मिथ्यात्वे सूत्राविरोधः।

ननु तदैव तत्रैव सदसत्त्वपर्यवसायि मिथ्यात्वं बाध्यत्वं निराकारि सूत्रकृता। 'नैकस्मिन्नसम्भवात्' (ब्र० २. २. ३३) इति उपलभ्यमानस्यार्थस्याभावश्च सुगतोक्तो निरासि 'नाभाव उपलब्धेः' (ब्र० २. २. २८) इति, 'वैधर्म्याच्च न स्वप्नादिवत्' (ब्र० २. १. २९) इति च सूत्रितम्। सर्वमिथ्यात्वे च स्वप्नवैधर्म्यायोग इति।

---

१. 'श्यत्वध', २. 'ह्यं' ख पाठः

अत्रोच्यते — देशकालमानसम्बन्धार्हत्वमर्थक्रियासमर्थत्वं वा सत्त्वं, विपरीतं चासत्त्वमनुपाधिकमेकस्मिन्निराचिकीर्षितम् । नान्यत्, तादृक्सत एव तद्देशकालनिषेधप्रतियोगित्वस्य बाध्यत्वस्याविरोधेन सम्भवात् । एवञ्च ख्यातिबाधौ न व्यवहितविषयौ कल्प्येयाताम् । किमेवमुक्तं भवति । नैकत्र भावाभावौ विरोधेनासम्भवादिति । किमेवं सति ख्यातिर्बाधो वा व्यवहितविषयः कल्प्यताम्, विरोधो वा समसत्ताकभावाभावविषयोऽवस्थाप्यताम् । नान्त्यः कल्पः, वस्तु च मिथ्या चेति सत्तावैषम्ये सति भावाभावयोरविरोधः । अविरोधे च तयोरसमा सत्तेत्यन्योन्याश्रयात् । अपिचैवमविरोधे कथमनयोरसमा सत्ता । इतरेतरः स्वदेशकालनिषेधप्रतियोगित्वाविशेषात् । अपिचैवं प्रत्ययोऽपि न विरुध्येत, सामग्रीयौगपद्यात् । दोषस्य च विरोधिधीप्रतिबन्धकत्वादिति । नैवम् । यत्र यदा यस्य प्रतिपत्त्यनुबन्धिसत्त्वं, यत् स्वरूपावभासपरिपन्थिदोषाधीनं, यत् स्वरूपानवबोधाधीनं वा, तत्र तदा तस्य तन्निषेधप्रतियोगित्वं मिथ्यात्वमिति वैशेष्यात् । एवं तदनवबोधाधीनत्वानधीनत्वाभ्यामेव सत्ताभेदादविरोधेऽनन्योन्याश्रयात् । अत एव न प्रत्ययौगपद्यापत्तिः । अन्यतरस्यान्यतरानवबोधाधीनसत्त्वात् । किमनवबोधाधीनं कस्य सत्त्वमिति को निगमः । उभयं चावबुध्यते । पौर्वापर्यं चातन्त्रमिति । अयं तावद् हेतुतः स्वरूपतः कार्यतो वा यस्य विसंवादः तस्येतरानवबोधाधीनं सत्त्वमिति । 'नाभाव उपलब्धेः' (ब्र० २. २. २८) इति च देशादिसम्बन्धार्हमर्थक्रियासमर्थं वस्तुस्वरूपमपलपतः सुगतस्य दूषणं, न तदभिलपतामस्माकम् । अन्यथा सत्ख्यातावन्यथाख्यातौ वा तत्रोपलभ्यमानस्य न नाभाव इति नाभावः सत्त्वादिति विपरिणेयं सूत्रमापद्येत । स्वप्नवैधर्म्यं चोभयसत्यत्ववदुभयमिथ्यात्वेऽपि कथञ्चिन्नेयम् । यत्तु पुनः **'वैधर्म्यं बाधाबाधाविति ब्रूमः'** इति भाष्यम्, **'नैवं जागरितोपलब्धं वस्तु* कस्याञ्चिदवस्थायां बाध्यते'** इति च, तत् सत्युपलब्धरीति पूरयितव्यमिति ॥

---

१. 'ध', २. 'त्वाभ्या', ३. 'न', ४. 'त । सत्य' ख. पाठः.

* 'स्तम्भादिकं कस्याञ्चिदप्यवस्थायामि'ति मुद्रितभाष्ये दृश्यते ।


भेदमानजातस्य प्रबलाभेदमानबाध्यत्वनिगमनम् ।

तदेवमागमानुमानाद्युपपाद्ये भेदमिथ्यात्वे अविद्यादिदोषमूलत्वसम्भावनया शिथिलबलं प्रत्यक्षादिभेदमानजातमपवर्जितनिरवशेषदोषशङ्काकलङ्कतया निरूढबलाय निर्विशेषात्मतत्त्वनिगमाय न वैरायितुमुत्सहते । किन्तु तेन बाध्यत एवेति ॥

* निगमशिरसामन्वादेशान्निरूढरसोदया
दधति यमिनां पत्युः श्रीरामभद्रगुरोर्गिरः ।
विनतजनताविद्यालक्ष्मीस्वयंवरमङ्गले
सु(र)भिलदलन्मल्लीमाल्यौघदृष्टिविडम्बनाम् ॥

तृतीयो भागः ।

शुभं भूयात् ।



---

* अयं श्लोकः क. पुस्तके न दृश्यते ।

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Sri Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalilâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalilâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dikshita	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvati	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mimâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1st & 2nd Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1st & 2nd Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II, 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dipaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III, 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvasva of Vandyaghatiya Sarvânanda (Part I, 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Sri Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Sri Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya Sarvananda (Part II, 2nd Kanda 1–6 Vargas)	2	8	

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nilakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tikâsarvaswa of Vandyaghatiya Sarvananda (Part III, 2nd Kanda 7 –10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvaswa of Vandyaghatiya Sarvananda (Part IV, 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatindra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa)	0	8	0
No. 57—रघुवीरचरितम् (Kavya)	1	4	0

	RS.	AS.	P.
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Sri Kri-shnânanda Saraswati (Part III)	2	0	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.